ISSN : 2350-0700

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपत्रिका

A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

शोधज्योतिः
Śodhajyotiḥ

वर्षम् – ०३ अङ्कः-०३ जनवरी–दिसम्बर – २०२१

Chief Editor
Dr. Lalitkumar Patel

Managing Editor
Dr. Satrughna Panigrahi

Editors
Dr. Lalitkumar Patel
Dr. Narendra Pandya
Dr. Janakisharan Acharya
Dr. Vidushi Bolla

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

ISSN : 2350-0700

शोधज्योतिः
ŚODHAJYOTIḤ

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुनरीक्षिता सन्दर्भिता शोधपत्रिका
A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

Year-3, Vol.-3 **January-December-2021**

Chief Editor
Dr. Lalitkumar Patel

Managing Editor
Dr. Satrughna Panigrahi

Editors
Dr.Lalitkumar Patel
Dr. Narendrakumar Pandya
Dr. Janakisharan Acharya
Dr. Vidushi Bolla

SHREE SOMNATH SANSKRIT UNIVERSITY, VERAVAL

Publisher:

Dr. Dashrath Jadav
Registrar, Shree Somnath Sanskrit University, Veraval

Advisory cum Peer-Review Committee:

Prof. Vasant Kumar Bhatt
Retired Professor, Department of Sanskrit, Gujarat University, Ahmadabad

Prof. Mansukh Molia
Department of Sanskrit, Saurashtra University, Rajkot.

Prof. Rabindra Kumar Panda
Professor, Department of Sanskrit, Pali & Prakrit, The M. S. University, Vadodara

Prof. Ramanuj Upadhyaya
Department of Veda, Shri Lal Bahadur Shastri National Sanskrit University, Delhi

Prof. Gajendra Kumar Panda
Department of Sanskrit, L.D.Arts College, Ahmadabad

Dr. Lalitkumar A. Patel
Dean, Faculty of Vijnan & Abhinav Vidya, Shree Somnath Sanskrit University, Veraval

Dr. Narendrakumar L. Pandya
Principal, University Constituent Sanskrit College, Veraval

Managing Editor

Dr. Satrughna Panigrahi

Editorial Committee

Dr. Lalitkumar Patel
Dr. Narendrakumar Pandya
Dr. Janakisharan Acharya
Dr. Vidushi Bolla

Note : The statements and views expressed by the authors of articles in this Journal are their own and not necessarily of the Editorial Committee. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research articles and that Shree Somnath Sanskrit University accepts no responsibility for them.

ISSN : 2350-0700
Registration No. : GH/SH/4/GSU/2997/1607/Pt-III/KH-1 dated 11-04-2005
Published by : Shree Somnath Sanskrit University, Veraval, Gujarat – 362266
Price : Rs.100 Annual Subscription (For India)
Address : Shree Somnath Sanskrit University,
Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat, India-362266
Telephone : (+91-2876) 244531, 244532
Email : shodhjyoti@gmail.com
Website : www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

ŚODHAJYOTIḤ

A Peer Reviewed Research Journal of Shree Somnath Sanskrit University

FORM IV

(See Rule & under Section 5 of the Press and Registration of Book Act. 1867)

1.	*Place of the Publication:*	Shree Somnath Sanskrit University, Veraval, Gujarat – 362266
2.	*Periodicity of its Publication :*	Annual (Yearly)
3.	*Printer's Name :*	Jalaram Graphics & Offset
	Nationality :	Indian
	Address :	B/h, Hotel Kavery, Nr. Paramhans Appartment, S. T. Road, VERAVAL, Dist. Gir Somnath, Gujarat – 362266
4.	*Publisher's Name :*	The Registrar
	Nationality :	Indian
	Address :	Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir Somnath, Gujarat – 362266
5.	*Editor's Name :*	Dr. Lalitkumar Patel
	Nationality :	Indian
	Address :	Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir Somnath, Gujarat – 362266
6.	*Names & Address of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital :*	Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir Somnath, Gujarat – 362266

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

(Dr. Dashrath Jadav)
Signature of Publisher

शुभाशंसा

ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वम्पूषन्नपावृणु सत्यधर्माय दृष्टये॥
ॐ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं व्विधेम॥

'ॐ विद्ययाऽमृतमश्नुते' इति ईशावास्योपनिषदः वचनम्। अत्र विद्या नाम अध्यात्मविद्या। विद्यामिमामधिगन्तुं वैदिककालादारभ्य ऋषीणां प्रयासः दृश्यते। तदर्थं वेद-वेदाङ्ग-धर्मशास्त्र-स्मृतिशास्त्र-इतिहास-साहित्यादिग्रन्थानां सृष्टिर्जाता। येन समाजः गतिशीलो जातः। आधुनिकसमाजे जनाः आदर्शप्राणाः विवेकशालिनश्च भवन्तु इति मनसि निधाय श्रीसोमनाथसंस्कृतविश्वविद्यालयः एका **"शोधज्योतिः"** इति नाम्ना वार्षिकी शोधपत्रिका प्रकाशयति। शोधः साहित्यस्य आधारस्तम्भः। शोधरहितं साहित्यं सत्यस्योद्घाटने असफलं भवति। यतोहि शोधस्य मुख्यमुद्देश्यमस्ति सत्यस्योद्घाटनम्। **"सत्यो वै देवा अनृतो वै मानवाः"** इति शतपथब्राह्मणस्य वचनम्। अत्र सत्यस्य अन्वेषणं नाम शोधस्यान्वेषणम्। श्रीसोमनाथसंस्कृतविश्वविद्यालः राष्ट्रियशिक्षानीतिम् अनुसृत्य विविधान् विशिष्टान् नवाचारान् उपक्रमान् च विरच्य गुणवत्तायुक्तसंशोधनकर्मणि रतो वर्तते। तत्र विशिष्टोऽयमुपक्रमः 'शोधजयोतिः' इति। तदर्थं 'शोधज्योतिः' इति पत्रिकामाध्यमेन श्रीसोमनाथसंस्कृतविश्वविद्यालयः गवेषणायाः कृते गवेषकाणां शोधफलानि पाठकानां पुरः स्थाप्यन्ते। अस्याः पत्रिकायाः इयं विशेषता वर्तते यत् अत्रत्याः शोधलेखाः पुनरीक्षिताः सन्दर्भिताश्च वर्तन्ते। अस्मिन् तृतीयाङ्के साहित्य-वेद-व्याकरण-दर्शन-ज्योतिषादीनधिकृत्य लेखाः प्रकाशनं प्राप्ताः। अत्र ये विद्वांसः स्वीयानां शोधलेखानाम् अप्रणं कृतवन्तः तेभ्यो धन्यवादार्पणं विधाय अग्रेऽपि अनेन प्रकारेण सर्वेऽपि विद्वद्वरेण्याः अस्याः 'शोधज्योतिः' इति पत्रिकायाः समुन्नतये स्वीयान् शोधनिबन्धान् सम्प्रेष्योपकुर्युरिति मम निवेदनं वर्तते। पुनश्च अस्याः शोधपत्रिकायाः प्रकाशनकर्मणि ये विश्वविद्यालयस्य प्राध्यापकाः कर्मचारिणश्च संयुक्ताः सन्ति तेभ्यः सर्वेभ्यः धन्यवादान् वितनोमि। 'शोधज्योतिः' गवेषणात्मक-पुनरीक्षित-वार्षिकपत्रिकायाः प्रकाशमानोऽयं तृतीयोऽङ्कः सर्वजनहृद्यं भवेदिति मनसि निधाय सुधीजनानां हस्तेषु समर्प्यते।

(डॉ. ललितकुमारः पटेलः)
का.कुलपतिः

सम्पादकीयम्

भगवतः श्रीसोमनाथमहादेवस्य हरस्य, भगवतः श्रीद्वारकानाथस्य हरेश्च अनुग्रहेण हरिहरक्षेत्रे प्रभासक्षेत्रे प्राचीसरस्वतीतीर्थे विराजमानस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रतिवर्षं प्रकाश्यमाना 'शोधज्योतिः' इति शोधपत्रिका संशोधनधनानां शोधरसिकानां जिज्ञासूनां विदुषां च विदे मुदे कल्पते इत्यत्र निवेदयन् हर्षमनुभवामि। संस्कृतसाहित्यवाङ्मयं विशालं विद्यते। वेदाः, पुराणानि, वेदाङ्गानि, धर्मशास्त्रं, न्यायशास्त्रं, मीमांसाशास्त्रम् उपवेदाः इति महान् ज्ञानराशिः संस्कृतभाषायां निहितः हिताय सौहित्याय च भवति जिज्ञासूनां कृते। एतेषां वेदादिशास्त्राणाम् अधीतिः, बोधः, आचरणं प्रचारणम् इति क्रमेण चतुर्विधप्रकारैः विद्याराधनां कुर्वन्तः जिज्ञासवो ज्ञानिनश्च तदाराधनायां क्रियमाणायां यत्किञ्चित् संशोधनपीयूषम् आस्वदन्ते तदेतत् संशोधनपीयूषम् अन्यानपि पिपासून् पाययन्तः प्रसीदन्ति। अध्ययन-बोधा-चरण-प्रचारणप्रसङ्गेषु यत्किञ्चित् नूतनं नूतनरीत्या वा ज्ञानम् अर्ज्यते तत्संशोधनरूपेण परिवेष्य सुधीभिः सुधिया सरस्वती समर्च्यते। शोधज्योतिरिति विश्वविद्यालयस्य शोधपत्रिका संशोधनस्य ज्योतिः प्रदीपयन्ती राराज्यते। अत्र वेदः, पुराणम्, दर्शनम्, व्याकरणम्, साहित्यम्, ज्योतिषम्, योगः, धर्मशास्त्रम्, न्यायशास्त्रम्, वेदान्तशास्त्रम् इत्याद्यान् विविधान् विषयान् अवलम्ब्य शोधपत्राणि आमन्त्र्यन्ते। प्राप्तानां शोधपत्राणां परामर्शनं विषयविशेषज्ञैः कारयित्वा प्रकाशनं विधीयते। अत्र प्रकाशितानां शोधपत्राणां माध्यमेन संस्कृते निहितस्य महितस्य महतो ज्ञानराशेः सरलतया सौलभ्यं स्यात्तदर्थं ग्रन्थरूपेण ई-पुस्तकरूपेण च प्रकाशनं भवति। अस्याः शोधपत्रिकायाः प्रकाशने सम्पादने च विश्वविद्यालयस्य शोधज्योतिः सम्पादनसमितेः सदस्याः, विश्वविद्यालयस्य प्रकाशनसमितेः सदस्याः अपरे च अधिकारिणः कर्मचारिणश्च सहयोगं कुर्वन्ति, तेषां समेषां साभारं स्मरणं करोमि। अस्याः शोधपत्रिकायाः अधिकाधिकं लाभं सर्वे गृह्णीयुः इति श्रद्दधे।

॥ इति शम् ॥

सम्पादकाः

डॉ. ललितकुमारः पटेलः
डॉ. नरेन्द्रकुमारः पण्ड्या
डॉ. जानकीशरणः आचार्यः
डॉ. विदुषी बोल्ला

विषयानुक्रमणिका

१. "प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्" परिभाषार्थपरिशीलनम्	- प्रो. विनोद कुमार झा	१
२. माहेश्वरतन्त्रे श्रीकृष्णोपासनानिरूपणम्	- प्रि. डॉ. नरेन्द्रकुमार पण्ड्या	१०
३. पुराणेषु विश्वबन्धुत्वभावना	- डॉ. अमृतलाल भोगायता	२०
४. कालिदाससाहित्ये पशुपक्षिणां सङ्गीतकलायाः परिशीलनम्	- डॉ. हीरालाल दाशः	२५
५. आचार्य-उव्वटस्य वैदिकभाष्यपद्धतिः	- डॉ. शत्रुघ्नपाणिग्राही	३९
६. शास्त्रे सतां लक्षणम्	- डॉ. पङ्कजकुमार एस. रावलः	४५
७. श्रीमद्भगवद्गीतायां त्वम्पदार्थनिरूपणम्	- डॉ. जानकीशरणः आचार्यः	५६
८. भाष्यकृद्दिशा स्थानिवदादेशोऽनल्विधौ इति सूत्रविमर्शः	- डॉ. विदुषी बोल्ला	६६
९. श्रीमद्भगवद्गीतायां कर्तव्याकर्तव्यस्य परिशीलनम्	- डॉ. गीताञ्जली नायकः	७६
१०. ज्योतिषशास्त्रदृष्ट्या नेत्ररोगविचारः	- सुश्री अपूर्वा अग्रवालः	८४
११. अप्रकाशितदृष्टान्तशतकपाण्डुलिपिः - विवरणात्मकः परिचयः	- सौ. भारती विजय कोळेकरः - प्रो. नन्दा पुरी	९३
१२. अद्वैतविशिष्टाद्वैताऽक्षरपुरुषोत्तमेतिदर्शनत्रयाऽऽलोके कठोक्ताऽव्यक्तशब्दयोजना	- आचार्यः साधुज्ञानतृप्तदासः	१०३
१३. प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः	- सागरः आचार्यः	११३
१४. श्रीशङ्करदेशिकाष्टकवृत्तिः	- अङ्कुरः नागपालः	१२१

१५. 'तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये' : श्रीमद्भगवद्गीतायाः अष्टमाध्यायान्तर्गतानां
'पदम्', 'धाम', 'स्थानम्' च शब्दानां विवेचनम् - आचार्यः रावलः जिज्ञेशः १३१

१६. वैदिक वाङ्मय में सविता और सूर्य : तुलनात्मक समीक्षा - डॉ. हेरम्ब पाण्डेयः १४२

१७. Relevance of the glorious teachings of the Vedas - Prof. Narasingha Ch. Panda
in Modern age : A Realistic Approach - Dr. Bijaya Kumar Shadangi १४८

१८. About ऋ (ṛ) and ऌ (ḷ) in Sanskrit - Dr. Dipesh Vinod Katira १५८

१९. Sun as a Source of All Energy in Taittrīya Samhitā - Dr. Sambhunath Mondal १६९

२०. Music of Sāmagāna - Dr. Rishiraj Pathak
- Nikhil Gaur १७९

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

"प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्" परिभाषार्थपरिशीलनम्

प्रो. विनोद कुमार झा[१]

अवतरणम् - ननु कर्तुमिच्छति इत्यर्थे समानकर्तृकाद्[२], इष्-धातोः कर्मणः[३]**कृ** धातोः **"धातोःकर्मणः समानकर्तृकादिच्छायां वा"** सूत्रेण 'सन्' प्रत्यये, तत्रानुबन्धलोपे[४], सकारस्य आर्धधातुकसंज्ञायाम्[५], प्राप्तेडागमस्य[६] **"एकाच उपदेशेऽनुदात्तात्"**[७] सूत्रेण निषेधे,**"अज्झनगमां सनि"**[८] सूत्रेण 'कृ' धातोरच ऋकारस्य दीर्घे, **"इको झल्"**[९] सूत्रेण झलादेः सनः कित्वे, प्राप्तगुणस्य[१०] निषेधे[११] **"ऋत इद्धातोः"**[१२] सूत्रेण इत्वे, **"उरण् रपरः"**[१३] सूत्रेण रपरत्वे, **"हलि च"**[१४] सूत्रेण इकारस्य दीर्घे, अभ्यासादिकार्ये[१५],

---

[१] आचार्यः अध्यक्षश्च - व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलम्- 362266

[२]समानः कर्ता यस्य सः समानकर्तृकः, तस्मात् समानकर्तृकात्

[३]कर्मकारकात्

[४]**"हलन्त्यम्"** इत्यनेन नकारस्य इत्संज्ञा,**"तस्य लोपः"** इत्यनेन इत्संज्ञकनकारस्य लोपः।

[५]आर्धधातुकं शेषः- 3/4/114

[६]आर्धधातुकस्येड् वलादेः- 7/2/35

[७]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/2/10

[८]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/16

[९]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/2/9

[१०]सार्वधातुकाऽऽर्धधातुकयोः- 7/3/84

[११]क्ङिति च- 1/1/5

[१२]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/1/100

[१३]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/51

[१४]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/2/77

"आदेशप्रत्यययोः"[१६] सूत्रेण षत्वे **"सनाद्यन्ता धातवः"**[१७] सूत्रेण सन्नन्तस्य **चिकीर्ष** इत्यस्य धातुसंज्ञा भवति। सन्नन्तस्य अर्थो भवति - सन् अन्ते यस्य सः **सन्नन्तः**[१८]। **चिकीर्ष** इत्यत्र सन् अन्ते अस्ति **चिकीर्ष** इत्यस्य अतः तस्य धातुसंज्ञा भवति। अत्र प्रश्नो भवति यत् यथा सन् प्रत्ययः **चिकीर्ष** इति समुदायस्य अन्ते अस्ति तथैव **देवदत्तश्चिकीर्षति** इत्यत्र **देवदत्तश्चिकीर्ष** इति समुदायस्यापि अन्ते अस्ति, तस्माद् **देवदत्तश्चिकीर्षति** इत्यत्र **देवदत्तश्चिकीर्ष** इत्यस्यापि **"सनाद्यन्ता धातवः"** सूत्रेण धातु-संज्ञा स्यात् कथन्न भवति? अस्याः समस्यायाः समाधानाय परिभाषा क्रियते- **प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्।**

परिभाषार्थः – यत्र शास्त्रे प्रत्ययमात्रबोधकस्य पदस्य ग्रहणं भवति तत्र तदादेः तदन्तस्य च ग्रहणं भवति अर्थात् प्रत्ययमात्रपदघटिते शास्त्रे इयं परिभाषा तदादि-पदस्य उपस्थितिं कारयति। उपस्थितं तदादि-पदं विशेष्यं भवति तथा च प्रत्यय-पदं तदादि-पदं प्रति विशेषणं भवति। अनन्तरं **"येन विधिस्तदन्तस्य"**[१९]सूत्रेण तदन्तविधिर्भवति। येन प्रत्ययान्ततदादेर्ग्रहणं भवति। तदादि-शब्दे स आदिर्यस्य असौ तदादिरिति बहुव्रीहिः समासः क्रियते। अत्र **स** इति शब्देन कस्य ग्रहणं स्यादिति जिज्ञासायां परिभाषायाः **यस्मात्स विहितः** इति पदम् आगच्छति अर्थात् तदादि-शब्देन प्रकृतिभागस्य ग्रहणं भवति। प्रत्ययान्त-शब्देन प्रत्ययानन्तरभागस्य ग्रहणं न भवति, अपितु प्रत्ययस्य ग्रहणं भवति। एवम्प्रकारेण प्रत्ययान्ततदादि-शब्देन प्रकृतिप्रत्यययोः समुदाययोः ग्रहणं भवति न तु तदतिरिक्तस्य।

परिभाषाद्वारा समस्यायाः समाधानम् - प्रकृतपरिभाषा कथयति - प्रत्ययमात्रपदघटिते शास्त्रे प्रत्ययान्ततदादेः अर्थात् प्रकृतिप्रत्यययोः समुदाययोः ग्रहणं भवति, अतः कृ-धातोः विहितेन सन्-प्रत्ययेन कृधातुविशिष्टस्य सन्-प्रत्ययस्य अर्थात् चिकीर्षशब्दस्य ग्रहणं भवति न तु तदतिरिक्तविशिष्टस्य **देवदत्तश्चिकीर्ष** इत्यस्य।

---

[१५]**"लिटि धातोरनभ्यासस्य"** सूत्रेण **कीर्** इत्यस्य द्वित्वम्, **"पूर्वोऽभ्यासः"** सूत्रेण पूर्वस्य कीरः अभ्याससंज्ञा, **"हलादिः शेषः"** सूत्रेण हलादिः शेषः, **"ह्रस्वः"** इत्यनेन ह्रस्वः, **"अभ्यासे चर्च"** इत्यनेन खयः ककारस्य स्थाने चर् चकारः।

[१६]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/3/59

[१७]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/1/32

[१८]बहुव्रीहिः समासः

[१९]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/72

परिभाषायाः प्राप्तिः - "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्"[२०] सूत्रे **यस्मात्प्रत्ययविधिस्तदादि प्रत्यये** इति योगो विभज्यते। अनन्तरं गृह्यमाणे तथा च उपतिष्ठते इति पदद्वयम् अध्याह्रियते। एवम्प्रकारेण विभक्तस्य योगस्य अर्थो भवति- प्रत्यये गृह्यमाणे तदादिरुपतिष्ठते। अर्थात् प्रत्ययमात्रबोधकपदघटिते शास्त्रे तदादेरुपस्थितिर्भवति। तदादि-पदेन कस्य ग्रहणं स्यात् तदर्थं **यस्मात्प्रत्ययविधिः** इत्यंशस्य उपस्थतिर्भवति, अर्थात् यस्मात् प्रत्ययो विधीयते स प्रकृतिभागः तदादि-शब्देन गृह्यते। तदादि-भागः विशेष्यं तथा च तस्य प्रत्यय-भागः विशेषणं भूत्वा प्रत्ययः तदन्तस्य बोधको भवति। येन प्रकृतपरिभाषायाः प्राप्तिः **"यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्"**सूत्रेण भवति।

प्रथमं ध्यातव्यम्- तदादि-पदं विशेष्यत्वेन तथा च प्रत्यय-पदं विशेषणत्वेन स्वीकृत्य तदन्तविधिस्तत्रैव भवति यत्र तदाद्यतिरिक्तस्य विशेष्यान्तरस्य अभावो भवति। यथा- **"सनाद्यन्ता धातवः"** सूत्रेतदाद्यतिरिक्तस्य विशेष्यान्तरस्य अभावकारणाद् अनेन सूत्रेण तदन्तविधिद्वारा सन्नन्त-तदादेः धातु-संज्ञा भवति। यदि कश्चन विशेष्य: शब्द: स्यात्तर्हि तदादिरूपाद्भिन्नो विशेष्यशब्दो न स्यात्। अर्थात् एकस्तदादिरूपो विशेष्यशब्द: पूर्वत: स्यात् पुन: द्वितीयस्तदादिरूप एव विशेष्यशब्द: समुपस्थितो भवेत्।एतादृशेषु स्थलेषु उभावपि तदादिशब्दौ विशेष्यौ भवत:। अत्र प्रथमो विशेष्यवाचक: तदादिशब्द: द्वितीयस्य विशेष्यवाचकस्य तदादिशब्दस्य विशेषणं भवति तथा च तत्र तदन्तविधि: क्रियते। यथा- **"हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्**[२१] सूत्रे प्रथमस्तदादिशब्द: प्रत्ययवाचकाभ्यां **ङ्याब्शब्दाभ्याम्** उपस्थितो भवति तथा द्वितीयस्तदादिशब्द: प्रत्ययवाचकै:**सुतिसि**-शब्दै:उपस्थितो भवति। प्रथमं तदादिशब्दं प्रतिप्रथमप्रत्ययवाचकपदस्य विशेषणत्वात् तत्र तदन्तविधिद्वारा **ङ्याब्भ्याम्** इत्यनेन **ङ्याबन्ताभ्याम्** इत्यर्थस्य लाभो भवति। पुन: द्वितीयं तदादिशब्दं प्रति द्वितीयप्रत्ययवाचकपदस्य विशेषणत्वेऽपि प्रत्ययवाचकै:**सुतिसि**-शब्दै: तदन्तविधिर्न भवति, **"प्रत्ययग्रहणे चापञ्चम्याः"**[२२]परिभाषया तदन्तविधेर्निषेधात्, कारणं **सुतिसि**-शब्द: पञ्चम्यन्तस्य **ङ्याबन्ताभ्याम्** इत्यस्य अनन्तरम् आगच्छति। अत्र प्रथमो विशेष्यवाचक: तदादिशब्द: द्वितीयं विशेष्यवाचकं तदादिशब्दं प्रति विशेषणं भवति तथा च अत्र तदन्तविधिर्भवति[२३]। अत एव **"हल्ङ्याब्भ्यो**

---

[२०]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/13

[२१]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/68

[२२]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, परिभाषासंख्या- 24

[२३]येन विधिस्तदन्तस्य-1/1/72

दीर्घात्सुतिस्यपृक्तं हल्" सूत्रस्य अर्थो भवति- ङ्यन्तः, आबन्तो यस्तदादिः, तस्मात् तदन्ताच्च तदादेः परस्य **सुतिसि**-सम्बन्धिनः अपृक्तसंज्ञकस्य हलः लोपो भवति।अत्र ङ्यन्ततदादेः उदाहरणम् अस्ति- **श्रेयसी** तथा च ङ्यन्तान्ततदादेः उदाहरणम् अस्ति- **बहुश्रेयसी**।

द्वितीयं ध्यातव्यम्-यत्र तदादिभिन्नः अन्यः कश्चन विशेष्यशब्दः पूर्वत एव विद्यमानो भवति अर्थात् विशेषाख्यस्य धर्मिणः पूर्वत एव विद्यमानत्वात् तत्र विशेष्यभूतस्य तदादिशब्दस्य उपस्थितिर्न भवति, अपितु केवलं तदादित्वधर्मस्य एव उपस्थितिर्भवति प्रकृतपरिभाषया। यथा- **"हृदयस्य हृल्लेखयदण्लासेषु"**[२४] सूत्रस्य उत्तरपदाधिकारे सत्त्वात् सूत्रेऽस्मिन्विशेष्यभूतस्य उत्तरपदस्य अधिकार आगच्छति। अतः विशेष्यभूतस्य उत्तरपदस्य पूर्वतः सत्त्वात् सूत्रगतेन प्रत्ययबोधकेन **अण्**-प्रत्ययेन विशेष्यभूतस्य तदादेरुपस्थितिर्न भवति, किन्तु केवलं तदादित्व-धर्ममात्रस्य उपस्थितिर्भवति। अत एव **"हृदयस्य हृल्लेखयदण्लासेषु"**सूत्रस्य अर्थो भवति- तदादित्वविशिष्टं यद् अणन्तम् उत्तरपदं, तस्मिन् परे **हृदय**-शब्दस्य **हृद्** आदेशो भवति।

प्रश्नः- न च प्रकृतिं विना प्रत्ययस्य असत्त्वात् प्रत्ययद्वारा प्रकृतेराक्षेपात् प्रत्ययेन प्रकृतिरवयवो यस्य समुदायस्य तथाभूतस्य समुदायभूतशब्दस्य आक्षेपो भविष्यति। अत्र आक्षेप-शब्दस्य अर्थो विद्यते- अनुमानम्। कथनस्य तात्पर्यम् इदं विद्यते यत् प्रत्ययद्वारा आक्षिप्तायाः प्रकृतेः विशेष्यत्वात् तथा च तां प्रति प्रत्ययस्य विशेषणत्वात् **"येन विधिस्तदन्तस्य"** सूत्रेण तदन्तविधिर्भवति, तस्मात् प्रत्ययेनैव स्वप्रकृत्यवयवकसमुदायस्य ग्रहणात् प्रकृतपरिभाषा अनावश्यकी विद्यते, यथा- **प्रत्ययेन स्वप्रकृत्यवयवकसमुदायाक्षेपात् तद्विशेणत्वेन तदन्तविधिरिति।**[२५] इति वाच्यम्।

उत्तरम्- प्रकृतिं विना प्रत्ययस्य असत्त्वात् प्रत्ययद्वारा प्रकृतिरनुमीयते अस्य नियमस्य व्यभिचारेण=प्रभावहीनत्वेन=असार्वत्रिकेण प्रकृतस्थले प्रत्ययद्वारा प्रकृतेराक्षेपो न भविष्यति। यथा- **इदम्**-शब्दात् **वतुप्**-प्रत्यये[२६], तत्रानुबन्धलोपे[२७] इदम्+वत् इत्यवस्थायां वकारस्य स्थाने घकारादेशे[२८],

---

[२४]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/3/50

[२५]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 98

[२६]किमिदम्भ्यां वो घः- 5/2/40

[२७]**"हलन्त्यम्"** इत्यनेन पकारस्य इत्संज्ञा,**"उपदेशेजनुनासिक इत्"** इत्यनेन उकारस्य इत्संज्ञा,**"तस्य लोपः"** इत्यनेन इत्संज्ञकनकारोकारयोः लोपः।

[२८]किमिदम्भ्यां वो घः- 5/2/40

तस्य इयादेशे[२९], इदम्-शब्दस्य ईशादेशे[३०], तत्रानुबन्धलोपे[३१] इ+इयत् इति दशायां इकारस्य भ-संज्ञायाम्[३२], **"यस्येति च"**[३३]सूत्रेण भ-संज्ञकस्य इकारस्य लोपे प्रत्ययमात्रम्**इयत्** इति अवशिष्यते। अस्य **इयत्** इत्यस्य प्रथमाविभक्तौ एकवचने **इयान्**[३४] इति रूपं सम्पन्नं भवति। एवम्प्रकारेण वयं पश्यामः यत् **इयान्** इत्यत्र केवलं प्रत्ययभाग अवशिष्यते। मूले यथा- **तन्न इयानित्यादौ तस्य तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात्।**[३५] अतः प्रत्ययद्वारा तदादिविशिष्टस्य तदन्तस्य ग्रहणाय प्रकृतपरिभाषा आवश्यक्येव विद्यते।

प्रश्नः- राम+भ्याम् इत्यवस्थायां रामशब्दस्य अङ्गसंज्ञायाम् **"सुपि च"**[३६] सूत्रेण यञादौ सुपि **भ्याम्** इति परे अदन्ताङ्गस्य रामस्य दीर्घो भूत्वा **रामाभ्याम्** इति रूपं सम्पन्नं भवति।किन्तु**"सुपि च"**सूत्रे **सुप्** इति प्रत्ययमात्रबोधकं पदं विद्यते, अतः अत्रापि प्रकृतपरिभाषाद्वारा तदादिविशेष्यकतदन्तविधिसत्त्वात् **"सुपि च"** सूत्रस्य अर्थो भवति- सुबन्तं यत् तदादिपदं, तस्मिन् परे तदव्यवहितस्य पूर्वत्वविशिष्टस्य अदन्ताङ्गस्य दीर्घो भवति। एतदर्थानुसारं सुबन्तं तदादिपदं विद्यते- **रामाभ्याम्**, तस्मिन् परे तदव्यवहितं पूर्वत्वविशिष्टम् अदन्ताङ्गमस्त्येव नहि यस्य स्थाने दीर्घः स्यात्। अस्यां परिस्थितौ **रामाभ्याम्** इति रूपं कथं सम्पन्नं स्यात्।

उत्तरम्- यत्र सूत्रे प्रत्ययो निमित्तत्वेन आश्रीयते, तत्र केवलं परिभाषायाः तदादिरिति अंशस्य उपस्थितिर्भवति न तु तदन्तांशस्य अर्थात् तदन्तविधिर्न भवति। मूले यथा उक्तं विद्यते- **यत्र प्रत्ययो**

---

[२९]आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्- 7/1/2

[३०]इदंकिमोरीश्की- 6/3/89

[३१]**"हलन्त्यम्"** इत्यनेन शकारस्य इत्संज्ञा **"तस्य लोपः"** इत्यनेन इत्संज्ञकशकारस्य लोपः।

[३२] यचि भम्- 1/4/18

[३३]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/148

[३४]**"कृत्तद्धितसमासाश्च"** इत्यनेन **इयत्** इत्यस्य प्रातिपदिकसंज्ञा, **"स्वौ...ङ्योस्सुप्"** सूत्रेण एकत्वविवक्षायां सु-प्रत्ययः, तत्रानुबन्धलोपः, **"सुडनपुंसकस्य"** सूत्रेण सकारस्य सर्वनामस्थानसंज्ञा, **"अत्वसन्तस्य चाधातोः"** इत्यनेन उपधादीर्घः, **"उगिदचां सर्वनामस्थानेऽचाधातोः"** इत्यनेन नुमागमः, तत्रानुबन्धलोपः, **"अपृक्त एकाल् प्रत्ययः"** सूत्रेण सकारस्य अपृक्तसंज्ञा, **"हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्"**सूत्रेण अपृक्तसंज्ञकसकारस्य लोपः, **"संयोगान्तस्य लोपः"** सूत्रेण संयोगान्तसकारलोपः।

[३५]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 98

[३६]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/3/102

निमित्तत्वेनाश्रीयते तत्र तदादीत्यन्तांशमात्रोपस्थितिरिति अङ्गस्य इति सूत्रे भाष्यकैयटयोः[३७]।एवम्प्रकारेण **"सुपि च"**सूत्रे प्रत्ययस्य निमित्तत्वेन आश्रितत्वात् तदन्तविधेरभावाच्च सूत्रार्थो भवति- यञादौ सुपि परे अदन्ताङ्गस्य दीर्घो भवति।

प्रश्नः- तॄ+क्त[३८]इत्यत्रअनुबन्धलोपे[३९] **तॄ+त**इत्यवस्थायां **तॄ-**शब्दस्य अङ्गसंज्ञायाम्[४०], **त** इत्यस्य आर्धधातुकसंज्ञायाम्[४१], प्राप्तगुणस्य[४२] निषेधे[४३], प्राप्तेडागमस्य[४४]निषेधे[४५],ऋकारस्य स्थाने इत्वे[४६], तस्य रपरत्वेन उपस्थितौ[४७]**तिर्+त** इति दशायाम्**"हलि च"**[४८]सूत्रेण तकारोत्तरवर्तिनः इकारस्य दीर्घे, **"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"**[४९] सूत्रेण रेफात् परस्य तकारस्य स्थाने नकार:**"रषाभ्यां नो णः समानपदे"**[५०] सूत्रेण नकारस्य णकारो भूत्वा स्वादिकार्ये सति **तीर्णः** इति रूपं सम्पन्नं भवति। किन्तु**"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"** सूत्रे **निष्ठा** इति प्रत्ययमात्रबोधकं पदं विद्यते, अतः अत्रापि प्रकृतपरिभाषाद्वारा तदादिविशेष्यकतदन्तविधिसत्त्वात् **"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"** सूत्रस्य अर्थो भवति- रदाभ्यां परं यन्निष्ठान्तं तदादिपदम्, तस्य अवयवभूतस्य तकारस्य स्थाने नकारो भवति। एतदर्थानुसारं यन्निष्ठान्तं तदादिपदं विद्यते- **तीर्णः**, तत्पदं **रदाभ्यां** परं नास्ति, अतः अत्र **"रदाभ्यां**

---

[३७]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 98

[३८]**"निष्ठा"** सूत्रेण

[३९]**"लशक्वतद्धिते"** इत्यनेन ककारस्य इत्संज्ञा **"तस्य लोपः"** इत्यनेन इत्संज्ञककारस्य लोपः।

[४०]यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्-1/4/13

[४१]आर्धधातुकं शेषः- 3/4/114

[४२]सार्वधातुकाऽऽर्धधातुकयोः- 7/3/84

[४३]क्ङिति च- 1/1/5

[४४]आर्धधातुकस्येड् वलादेः- 7/2/35

[४५]श्र्युकः किति- 7/2/11

[४६]ऋत इद्धातोः- 7/1/100

[४७]उरण् रपरः- 1/1/51

[४८]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/2/77

[४९]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/2/42

[५०]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/4/1

निष्ठातो नः पूर्वस्य च दः"सूत्रस्य प्रवृत्तिर्न भवति। **दृषद्+तीर्ण:**अत्र **"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"** सूत्रस्य प्रवत्तिर्भवितुं शक्नोति, किन्तु एतत् सूत्रोदाहरणं नास्ति।

उत्तरम्- यत्र सूत्रे प्रत्ययमात्रबोधकं पदं भवतितथा च तत्पदं पञ्म्यन्तपदानन्तरम् आगच्छति तत्रापि केवलं परिभाषायाः तदादिरिति अंशस्य उपस्थितिर्भवति न तु तदन्तांशस्यापि अर्थात् तदन्तविधिर्न भवति। अनन्तरम् तस्य तदादिपदस्य किं भवतीति जिज्ञासायाम् उच्यते- पञ्चम्यन्तत्वेन विपरिणामः। मूले यथा उक्तं विद्यते- **एवं यत्रापि पञ्चम्यन्तात्परः प्रत्यय आश्रीयते तत्रापि तदादीत्यन्तांशोपस्थितिः, परन्तु तत्र पञ्चम्यन्तता।**[५१] एवम्प्रकारेण केवलं तदादिरिति अंशस्य उपस्थित्यनन्तरं तस्मिन् पञ्चम्यन्तत्वेन विपरिणमिते सति तस्य पञ्चम्यन्त-तदादे:**रदाभ्यामि**तिपञ्चम्यन्तं विशेषणं भवति तथा**रदाभ्यामि**तिविशेषितं तदादिपदं प्रत्ययस्य विशेषणं भवति।अनन्तरं**"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"** सूत्रस्य अर्थो भवति- रेफान्तं दकारान्तञ्च यत् तदादिपदं तस्मात्परस्य अव्यवहितस्य निष्ठातकारस्य स्थाने नकारो भवति। एतदर्थानुसारं **तीर्+त** इति दशायां रेफान्तं तदादिपदं **तीर्** विद्यते तस्मात्परस्य अव्यवहितस्य निष्ठातकारस्य स्थाने नकारो भवति। **दृषद्+तीर्ण:** इत्यत्र दकारान्तं तदादिपदं **दृषद्**वर्तते किन्तु तस्मात्परोऽव्यवहितो निष्ठातकारोनास्ति, अतः तस्य नकारो न जायते।

प्रश्नः- हे राम+सु इत्यत्र सु-प्रत्ययस्य सम्बुद्धिसंज्ञायाम्[५२], तत्रानुबन्धलोपे **हे राम+स्** इत्यवस्थायां रामशब्दस्य अङ्गसंज्ञायाम् **"एङ्ह्रस्वात्सम्बुद्धेः"**[५३] सूत्रेण **राम** इति ह्रस्वान्ताद् अङ्गात् परस्य सम्बुद्धिसम्बन्धिनः हलः सकारस्य लोपो भूत्वा **हे राम** इति रूपं सम्पन्नं भवति। किन्तु **"एङ्ह्रस्वात्सम्बुद्धेः"** सूत्रे **सम्बुद्धि** इति प्रत्ययमात्रबोधकं पदं विद्यते, अतः अत्रापि प्रकृतपरिभाषाद्वारा तदादिविशेष्यकतदन्तविधिसत्त्वात् **"एङ्ह्रस्वात्सम्बुद्धेः"** सूत्रस्य अर्थो भवति- सम्बुद्ध्यन्तं यत् तदादिपदं, तस्य हलः सकारस्य लोपो भवति। एतदर्थानुसारं सम्बुद्ध्यन्तं तदादिपदं विद्यते- **राम+स्**, तत्पदं विहाय ह्रस्वान्तम् अङ्गं विद्यत एव नहि यस्मात् परः एतत् स्यात्। अस्यां परिस्थितौ **हे राम+स्** इति रूपं कथं सम्पन्नं स्यात्।

---

[५१]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 98

[५२]एकवचनं सम्बुद्धिः- 2/3/49

[५३]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/69

उत्तरम्- यथापूर्वं **"एङ्ह्रस्वात्सम्बुद्धेः"** सूत्रे **सम्बुद्धिरि**तिप्रत्ययमात्रबोधकं पदं भवति तथा च तत्पदं **एङ्ह्रस्वात्** इतिपञ्म्यन्तपदानन्तरम् आगच्छति अत:अत्रापि केवलं तदादिरिति अंशस्य उपस्थिति: तथा च तस्य पञ्चम्यन्तत्वेन विपरिणामो भवति। तस्य पञ्चम्यन्त-तदादे: **एङ्ह्रस्वादि**तिपञ्चम्यन्तं विशेषणं भवति। अनन्तरं **"एङ्ह्रस्वात्सम्बुद्धेः"** सूत्रस्य अर्थो भवति- एङन्तं ह्रस्वान्तश्च यत् तदादिपदं तस्मात्परस्य सम्बुद्धिसम्बन्धिन: हलः सकारस्य लोपो भवेत्। एतदर्थानुसारं **हे राम+स्** इत्यत्र ह्रस्वान्तं तदादिपदं **राम** वर्तते तस्मात्पर:सम्बुद्धिसम्बन्धिन: हलः सकारस्य लोपो भूत्वा **हे राम** इति रूपं सम्पन्नं भवति।

तृतीयं ध्यातव्यम्- यत्र सूत्रे सप्तम्यन्तं प्रत्ययमात्रबोधकं पदं निमित्तत्वेन आश्रीयते तत्र उपस्थितस्य तदादि-पदस्य प्रत्यसमभिव्याहृतपदेन सह समानाधिकरणेन अन्वयो भवति।[५४] यथा **"सुपि च"** सूत्रे सप्तम्यन्तं प्रत्ययमात्रबोधकं पदं विद्यते- **सुपि।** तत्पदं निमित्तत्वेन आश्रीयते। अतः अत्रोपस्थितं तदादिरिति पदं अधिकारद्वारा प्राप्तेन **अङ्गस्ये**ति[५५] प्रत्ययसमभिव्याहृतेन षष्ठ्यन्तपदेन सह सामानाधिकरण्येन अन्वितं भवति। सामानाधिकरण्येन अन्वयानन्तरं **"सुपि च"** सूत्रस्य अर्थो भवति- यञादौ सुपि परे अदन्ताङ्गस्य दीर्घो भवति।

प्रकृतपरिभाषाया: प्रयोजनान्तरं **"येन विधिस्तदन्तस्य"** सूत्रे **परमगार्ग्यायण:** उक्तं विद्यते। अत्र **परमगार्ग्यस्य अपत्यं पुमान्** इत्यस्मिन् अर्थे **"यञिञोश्च"**[५६] सूत्रेण य: **फक्** प्रत्यय: क्रियते स: परमगार्ग्यशब्दावयवाद् यञन्ततदादे:गार्ग्यशब्दाद् भवति न तु तद्विशिष्टात् परमगार्ग्यशब्दात्। कारणं गर्गशब्दात् **यञ्**-प्रत्ययस्य[५७] विधानेन यञन्ततदादि: गार्ग्यशब्द एव विद्यते, न तु परमगार्ग्यशब्द:।

न च परमश्चासौ गार्ग्य इति परमगार्ग्यः[५८]। **परमगार्ग्यस्य अपत्यं पुमान्** इत्यस्मिन् विग्रहे पर्याप्तिसम्बन्धेन एकार्थीभावः परमगार्ग्ये तिष्ठति न तु गार्ग्ये, अत: परमगार्ग्यशब्दादेव **फक्** इति

---

[५४]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, हिन्दीव्याख्यायाम्, पृष्ठसंख्या- 99-100

[५५]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/1

[५६]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 4/1/101

[५७]गर्गादिभ्यो यञ्- 4/1/105

[५८]कर्मधारय-समासः

तद्धितप्रत्ययः स्यादिति वाच्यम्, एकार्थीभावरहितात् गार्ग्यशब्दादपि तद्धितवृत्तेः सत्त्वात्। मूले यथा- **निष्कृष्य तावन्मात्रेणैकार्थीभावाभावेऽपि वृत्तिर्भवत्येव**[५९]।

प्रकृतपरिभाषेयं प्रत्ययमात्रबोधकपदघटितशास्त्र एव प्रवृत्तिमर्हति, न तु प्रत्ययाप्रत्ययबोधकपदघटितशास्त्रे। अतः उगित्-पदेन उगित्-प्रातिपदिक-भवतु-शब्दस्य तथा च उगित्-प्रत्यय-मतुबादेः ग्रहणात् **"उगितश्च"**[६०] सूत्रे प्रकृतपरिभाषाया न तु प्रवृत्तिर्भवति नैव उगित्-पदेन तदादिविशिष्टतदन्तस्य ग्रहणं भवति। तस्मात् मत्वन्ततदादिभिन्नात् निर्यवमत्-शब्दात् **"उगितश्च"** सूत्रेण स्त्रीत्वविवक्षायां ङीप्-प्रत्ययो भवति। इयं परिभाषा अङ्गसंज्ञासूत्रस्य भाष्ये स्पष्टा विद्यते।

एवम्प्रकारेण इदं सिद्धं भवति यत् प्रत्ययमात्रबोधकपदघटितशास्त्रे प्रकृतपरिभाषाद्वारा तदादिविशिष्टतदन्तस्य ग्रहणं परिभाषार्थे किञ्चित् परिमार्जनपूर्वकं भवति।

सन्दर्भग्रन्थसूचिः

1. श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेतः **परिभाषेन्दुशेखरः** प्रकाशक- चौखम्भा संस्कृत प्रकाशन, वाराणसी। पुनर्मुद्रित संस्करण-2009
2. बालमनोरमा-तत्त्वबोधिनीसहिता **वैयाकरणसिद्धान्तकौमुदी** प्रकाशक- मोतीलाल बनासीदास, दिल्ली, वाराणसी, पटना पुनर्मुद्रण दिल्ली, 1979
3. अष्टाध्यायी सूत्रानुक्रमणिका (App) Directed by- Prof. M. M. Jha, Developed by-Srujan Jha

[५९]श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 98

[६०]पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 4/1/6

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

माहेश्वरतन्त्रे श्रीकृष्णोपासनानिरूपणम्

प्रि. डॉ. नरेन्द्रकुमार पण्ड्या[१]

माहेश्वरतन्त्रपरिचयः

अक्षरातीतस्य भगवतः पुरुषोत्तमस्य श्रीकृष्णपरमात्मतत्त्वस्य प्रकाशकं माहेश्वरतन्त्रं विद्यते। पुरुषोत्तमः श्रीकृष्णपरमात्मा रसानन्दस्वरूपः विद्यते। स्वलीलाद्वैतस्वरूपिणः श्रीकृष्णस्य नामरूपलीलाधाम्नां व्याख्याकारकं माहेश्वरतन्त्रं विद्यते। **"रसो वै सः" "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति"** (तै.-२/७) इत्यादिश्रुतिवचनात् भगवतः रसरूपत्वं प्रमाणितं भवति।

माहेश्वरतन्त्रे एकपञ्चाशत् (५१) अध्यायाः सन्ति। एतेषु अध्यायेषु विविधा विषयाः श्रीकृष्णभक्तिसाधनामन्त्रानुष्ठानसेवापूजाप्रकारादयः निरूपिताः सन्ति। माहेश्वरतन्त्रे आदितः श्लोकानां समष्ट्यङ्काः भान्ति ३०६० (त्रिसहस्राधिकं षष्टिः)

माहेश्वरतन्त्रग्रन्थस्य प्रयोजनम्

इदमत्रानुभूयतां यदस्य माहेश्वरतन्त्रस्य प्रयोजनं किं वा आवश्यकता या विद्यते तद्विषये उक्तं यथा-

> **"इदं माहेश्वरं तन्त्रं समाधौ यच्छ्रुतं मया।**
> **प्रबोधसाधनी(जागनी जागृति)भूतं प्रियाणामिति मे मतिः॥**
> **अन्यथेश्वरविज्ञानान्नान्यदेतत्प्रयोजनम् ॥१५॥**

अर्थात् अस्य मानुषस्य माहेश्वरतन्त्रम् उद्बोधकं जागृतिकारकं वर्तते।

इदं माहेश्वरतन्त्रं शिवपार्वत्योः संवादात्मकं विद्यते। पार्वत्या पृष्टानां प्रश्नानां शिवेन समाधानात्मकानि उत्तराणि प्रदत्तानि। अस्मिन् तन्त्रे अपूर्वं तत्त्वविज्ञानं प्रकटीकृतमस्ति। यथोक्तम्-

---

[१] प्राचार्यः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावल, गुजरात

"त्वया प्रोक्तानि तन्त्राणि चतुःषष्टिमितानि भोः।
न तेषु तत्त्वविज्ञानं प्रकटीकृतमीश्वर॥
तत्प्रकाशय देवेश प्रवक्तुं यदि मन्यसे॥" (मा.त.-१/१५-१६)

अत्र न हि निन्दा निन्दितुं प्रवर्तते अपि तु विधेयं स्तौति इति न्यायेन माहेश्वरतन्त्रोक्तविषयाणां प्राशस्त्यमभिव्यज्यते।

माहेश्वरतन्त्रे ज्ञानस्य स्वरूपं महिमा च

माहेश्वरतन्त्रे ज्ञानस्य स्वरूपमर्धश्लोकेन सुन्दररीत्या सुस्पष्टतया च प्रतिपादितम्। तद्यथा- **"ज्ञानं तत्तु विजानीयात् येनात्मा भासते स्फुटः। अज्ञानेनावृतो नित्यं मोहरूपेण नित्यदा॥"** (मा.त.-१/२२) आत्मनः स्फुटभासनं ज्ञानेन भवति। अज्ञानावृतो जीवात्मा स्फुटं न भासते। अज्ञानं तु मोहरूपमिति निरूपितम्। यावदज्ञानं विद्यते तावत्संसारः, मोहः, भयम्, अहं ममेति असद्भावः विस्मृतिः स्वरूपस्य, दुःखदर्शनम्, नानाधर्मानुरागः, कर्मणां फलेषणा, बन्धमोक्षविभागः, जडदेहाद्यहङ्कारः, पाषाणप्रतिमादिषु ईश्वरभावः, जलादौ तीर्थबुद्धिः इत्यादिकं जायते यदा परिज्ञानस्य उदयो जायते तदा मोहभ्रमभयादिकं निवर्त्तते। यथोक्तम्-

"तावत्संसारभावः स्याद्यावदज्ञानमुल्लसेत्।
तावन्मोहो भ्रमस्तावत्तावदेषु भयं भवेत्॥

अहं ममेत्यसद्भावो विस्मृतिर्दुःखदर्शनम्।
नानाधर्मानुरागश्च कर्मणां च फलेषणा॥

बन्धमोक्षविभागश्च जडदेहाद्यहङ्कृतिः ।
तावदीश्वरभावः स्यात्पाषाणप्रतिमादिषु ॥

जलादौ तीर्थभावश्च यावदज्ञानमुल्लसेत्।
उदिते तु परिज्ञाने नाऽयं लोको न कल्पना॥" (मा.त.-१/२३-२६)

ज्ञानस्य परिस्फुरणेन मोहात्मकस्य अज्ञानस्य निवृत्तिर्जायते यथा शुक्तिकायां रजतस्य भ्रान्तिः भवति किन्तु यथार्थज्ञानेन भ्रान्तिः निवर्त्तते रज्जौ च सर्पभ्रान्तिः निवृत्ता भवति। मोहस्य सत्त्वेन अक्षरे ब्रह्मणि सकलं जगत् भाति मोहनाशे तु साक्षादक्षरम् अव्ययं परं ब्रह्म अवशिष्यते।

सद्गुरूपासनया ज्ञानोदयः

माहेश्वरतन्त्रस्य अष्टाविंशे पटले पार्वती परमेश्वरं महादेवं कं गुरुमुपासीत? कथं ज्ञानोदयो भवेत्? इति पृच्छति। एतस्य प्रश्नस्य अभिनन्दनं विधाय एतज्ज्ञानस्य गोपनीयतां च रक्षितुं सूचयित्वा भगवान् शिवः सद्गुरोः शरणागतिं गृहीतुमुपदिशति।

"मायाग्रस्तमिदं विश्वं नानादुःखभयातुरम्।
अनित्यभवसन्तापपरितप्तं समन्ततः॥

कालदण्डभुजङ्गेन ग्रस्तमानमहर्निशम्।
दृष्ट्वा विरक्तः सततं स्वात्मनः शिवहेतवे॥
सद्गुरोः शरणं यायात् शुद्धभावेन भामिनि॥" (मा.त.-२८/३-५)

अत्र माहेश्वरतन्त्रानुसारं सूर्यवत् सर्वदीपकाः गुरवो दुर्लभाः सन्ति। गुरुः कीदृशः उपासनीय इति प्रश्नानुरोधेन गुरोः लक्षणानि निरूपितानि तदनुसारं शिष्यहृत्तापहारकः, शुद्धान्वयः, शुद्धचेताः, शुद्धवेशः, शुभाकृतिः, शुभवादी, शुभाचारः, शुद्धभावः, शुचिः, वेदशास्त्रार्थतत्त्वज्ञः, लोकसङ्गविवर्जितः, अलोलुपः, सुशीलश्च, दयादाक्षिण्यसंयुतः, त्यागी, विरागी, गुणवान्, गुणज्ञः, शिष्यवत्सलः, सन्तुष्टः, शरण्यः, क्रोधवर्जितः, स्वसिद्धान्तार्थतत्त्वज्ञः, मितवाक्, लोकवल्लभः, पवित्रः, संशयच्छेत्ता, कृष्णप्रेमप्लुतः इति गुरोर्गुणाः निगदिताः। एतादृशं गुरुमुपेत्य प्रणामं विधाय प्रार्थयते। तद्यथा-

भो नाथ करुणासिन्धो संसारार्णवतारक।
भ्रान्तं संसारगहने नानातापसमाकुले॥

अत्यन्तदीनहृदयं सर्वसाधनवर्जितम्।
अज्ञानपङ्कनिर्मग्नं मामुद्धर दयानिधे ॥

अहं त्वां शरणं प्राप्तः शरण्यस्त्वं दयानिधिः।
अविलम्बेन संसारविच्छेदं कुरु मे प्रभो॥

इत्थं प्रार्थितः गुरुः शिष्यमुपदिशति।

न वर्णेषु तदा कश्चित् ब्राह्मणक्षत्रियादिषु।
न देवोऽसि न गन्धर्वो नासुरः पन्नगोऽपि वा॥

न त्वं देहो न त्वद्देहो नेन्द्रियाणि तथा मनः।
न च प्राणो बुद्धिस्त्वं नाहङ्कारो भवान्मतः॥ (मा.त.-२८/३७-३९)

श्रीकृष्णस्य प्रिया चासि पूर्णस्य परमात्मनः।
उद्बुद्ध्य स्वप्नतश्चित्ते प्रियाभावं निजं श्रयः॥

तिरोभूय च शनकैर्मायादेहमनीप्सितम्।
क्षरं चैवाक्षरं हित्त्वा स्वपतिं पुनरेष्यसि॥ (मा.त.-२८/४३-४४)

एवमुपदिष्टाय गुरुः मन्त्रराजोपदेशं करोति।

मन्त्रराजोपदेशः

मन्त्रराजस्य श्रवणमात्रेण सर्वमन्त्रफलं भवति। ईदृशस्य मन्त्रराजस्य निरूपणाय प्रार्थितः परमेश्वरः एतन्मन्त्रराजमाहात्म्यं ब्रूते। अयं मन्त्रराजः महान् गोप्यतरो विद्यते। अस्य सकृत् जपादपि पापानि प्रलीयन्ते। अस्य मन्त्रराजस्य लेखनं कृत्वा देयः अन्यथा पापमवाप्नुयात्। श्रीकृष्णं प्रति वासनाया निर्धारत्वे तत्प्रेमोद्गमे सत्येव मन्त्रमुपदिशेत् अन्यथा कृष्णघातकदोषो भवति। एवमुक्त्वात्र एकोनपञ्चाशद्वर्णात्मकः उपदिष्टः। मन्त्रराजस्य पद्यैरेव निरूपणं दर्शितमस्ति।

श्रुणु मन्त्रं प्रवक्ष्यामि सावधानेन चेतसा।
स्वर आद्यश्चतुर्थश्च आकाशस्तदनन्तरम्॥

वायुबीजं ततः पश्चात् अग्निबीजमतः परम्।
ततो वरुणबीजं च भूबीजं स्यात्ततः परम्॥

श्रीकृष्ण परमानन्द ते प्रियास्मीति वै वदेत्।
मामङ्गीकुर्विति चोक्त्वा दर्शयेति द्वयं वदेत्॥

प्रबोधयेति द्वितयं मोहेति च ततो वदेत्।
मपाकुरुद्वयं चोक्त्वा नमोन्तोयं महामनुः॥ (मा.त.-२९/९-१२)

अँ-अक्षरबीजम्, ईँ-मायाबीजम्, (**इच्छाज्ञानक्रियात्मा च कालत्रितयरूपिणी। अग्निसोमार्करूपा च सर्वत्रितयरूपिणी॥**) (मा.त.-२९/२१) हँ तःलँ पञ्च महाभूतानि-बीजानि।

अयं मन्त्रः चूडामणिमन्त्र इति कथ्यते। **"मन्त्रचूडामणिं ज्ञात्वा मुच्यते सर्वसंशयात्। विज्ञाते मन्त्रराजन्ये ज्ञातव्यं नावशिष्यते॥ शाब्दं वपुः परानन्दवपुषः परमेश्वरि। मन्त्रचूडामणिरयं मया ते परिकीर्तितः॥"** (मा.त.-२९/३५-३६)

यथा चिन्तामणौ लब्धे अन्यधनसञ्चयानामपेक्षा नावशिष्यते तथा मन्त्रराजे लब्धे अन्यसाधनापेक्षा न भवति।

तज्जपस्तदर्थभावनेति नयात् मन्त्रार्थभावनया चित्तशुद्धिः जायते मायामालिन्यमपैति विवेकोपलब्धिश्च जायते।

"एतन्मन्त्रार्थविज्ञानं मन्त्रसिद्धान्तसूचकम्।
यो नित्यं भावयेच्चित्ते वासना तस्य शुद्ध्यति॥

विहाय मायामालिन्यं देहेन्द्रियनिबन्धनम्।
वासना सम्मुखीभूयाद्विवेकं प्रतिबिम्बवत्॥" (मा.त.-२९/४२-४३)

श्रीकृष्णसेवापूजाप्रकारनिरूपणम्

माहेश्वरतन्त्रस्य एकत्रिंशे पटले प्रभोः श्रीकृष्णस्य सेवापूजाप्रकारः व्यवहारविधिश्चेति पृष्टं पार्वत्या।

ब्रूहि सेवाप्रकारं मे येन तुष्येत्स्वयं प्रभुः। कथं पूजा प्रकर्तव्या व्यवहारश्च कीदृशः॥ (मा.त.-३१/१) एवं पृष्टे सति शिव उपदिदेश यत् चतुर्थप्रहरे समुत्थाय ब्रह्मरन्ध्रे गुरुं ध्यात्वा पञ्चभूतात्मकैः पञ्चोपचारैः गुरुं समर्च्य तद्गतं आत्मानं स्मरेत्। ततो नमस्कुर्यात् **"नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे। यस्य वागमृतं हन्ति विषं संसारसंज्ञकम्॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवः सदाशिवः। गुरुरेव परं तत्त्वं तस्मै श्रीगुरवे नमः॥"** (मा.त.-३१/६-७) ततश्च- **"ध्यायेत्कृष्णं हृदम्बुजे"** ततः पञ्चोपचारैः पूजयेत्। ततः प्रार्थयेत् तद्यथा-

"अहं नाथ त्वदीयास्मि पतिस्त्वं मेऽसि भो प्रभो।
भ्रमितास्मि त्वया नाथ मायागहनवर्त्मनि॥

त्वत्पार्श्वं नय मां नाथ विरहो मां प्रबोधत।
अनन्यगतिका चाहं तस्मात् कुरु यथोचितम्॥" (मा.त.-३१/१०-११)

एवं सम्प्रार्थ्य ततः भूमिं प्रार्थयेत्- **"समुद्रमेखले देवि पर्वतस्तनमण्डले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥** (मा.त.-३१/१३-१४) ततः शौचादिकं विधाय स्नानादिकं विधाय गोपिकाचन्दनं धृत्वा चक्र-तुलसीमालाधारणं कृत्वा पूजनागारं प्रविश्य प्रभुमुत्थापयेत्- प्रभोस्तु उत्थापनं सुगीतैः मङ्गलनादैः कर्तव्यम्। भगवन्मूर्तिपूजायां विविधा मूर्तयः भवन्ति मनोमयी, सौवर्णी, राजती, शैली, काष्ठी, पाषाणी, रत्नमयी, मृण्मयी, पैत्री इत्यादि। तत्र मनोमयी श्रेष्ठा मूर्तिः कथ्यते। एतां मूर्तिं शुभैः उपचारैः पूजयेत्। उपचारेषु पाद्यार्घाचमनस्नानमधुपर्काङ्गप्रोञ्छनवस्त्राभरणदर्पणालोकन-

गन्धपुष्पधूपागरुदीपनैवेद्यपानीयाचमन-हस्तवासस्ताम्बूलानुलेपनीराजनादिकगीतवाद्यनृत्यस्तुति-प्रदक्षिणपुष्पाञ्जलिनमस्कारसाष्टाङ्गप्रणतिरूपैः उपचारैः प्राणनाथं प्रभुं पूजयेत्।

द्विविधं पूजनम्

पूजनं द्विविधं मतम् एकम् अनिर्माल्यं द्वितीयं च निर्माल्यम्। तत्र मनोभवैः दिव्यैः पुष्पैः गन्धद्रव्यैश्च भक्तैः यदर्चनं क्रियते तत् अनिर्माल्यम्। उक्तं च-

"दिव्यैर्मनोभवैः पुष्पैर्गन्धद्रव्यैर्मनोहरैः।
भक्तैर्यत्क्रियते सम्यगनिर्माल्यं तदर्चनम्॥" (मा.त.-३१/४९)

एतदर्चनं मानसी पूजा इत्यपि वक्तुं शक्यते। पुष्टिमार्गे तनुजा वित्तजा मानसी चेति त्रिविधा सेवा मता तत्र तनुजा-वित्तजासेवापेक्षया मानसी सेवा परा श्रेष्ठा मन्यते।

यानि प्राकृतपुष्पचन्दनादीनि भवन्ति तानि निसर्गतः जातमात्राणि एव पञ्चभिः महाभूतैः, सूर्येण, चन्द्रेण, भ्रमरादिभिः, प्राणिभिश्च घ्रातानि भवन्ति, अत्र विषये संशयो न विद्यते। एतैः प्राकृतैः ग्रामारण्यादिसम्भूतैः मनोहरैः पूजाद्रव्यैः यदर्चनं क्रियते तत् सनिर्माल्यं पूजनं कथ्यते। एतेन अर्चनेन दिव्यभोगापवर्गप्राप्तिः भवति। सनिर्माल्यपूजनेन अल्पफलं सिद्ध्यति अनिर्माल्यात् मानसात् पूजनात् महत् फलं प्राप्यते। **"जातमात्राणि पुष्पाणि घ्रातान्येव निसर्गतः। पञ्चभिश्च महाभूतैर्भानुना शशिनापि च॥ प्राणिभिश्च द्विरेफाद्यैः पौष्पैरेव न संशयः। यदर्चनं सनिर्माल्यं दिव्यभोगापवर्गदम्॥ ग्रामारण्यादिसम्भूतैः पूजाद्रव्यैर्मनोहरैः। घ्रातपुष्पात्फलं सिद्ध्येदल्पं नो मानसात्तथा॥"** (मा.त.-३१/४९-५१)

सनिर्माल्यं बाह्यं पूजनमपि दिव्यभोगापवर्गप्रदत्वात् अवश्यम् अपरिहार्यम् एकं च बुद्धिशुद्ध्यै पूजनं विधेयम्। **"तस्मादपरिहार्यत्वादन्यथा चाप्युपायतः। बुद्धिशुद्ध्यै ततो देवि बाह्यद्रव्यैः प्रपूजयेत्॥"** (मा.त.-३१/५२)

उत्तमादिभेदेन पूजायास्त्रैविध्यम्

उत्तमा, मध्यमा अधमा इति त्रिविधा कृष्णपूजा कथिता। तत्र सकलैः विहितैः उपकरणैः(उपचारैः) विधीयमाना कृष्णपूजा उत्तमा, यथालब्धैः निष्पाद्या मध्यमा एवं पत्रपुष्पाम्बुनिष्पाद्या पूजा अधमा, उक्तं च यथा- **"पुनस्त्रेधा कृष्णपूजा चोत्तमाधममध्यमा। यथोपकरणैः कृत्स्नैः क्रियमाणोत्तमोत्तमा॥ यथालब्धैर्विनिष्पाद्या द्रव्यैः पूजा तु मध्यमा। पत्रपुष्पाम्बुनिष्पाद्या पूजा चाऽधमसंज्ञिका॥"** (मा.त.-३१/५३-५४)

पूजाक्रमनिरूपणम्

मानसी पूजा बाह्यपूजा इति द्विविधा पूजा प्रोक्ता। तत्र पूर्वं मानसी पूजा कर्तव्या तदनन्तरं बाह्यपूजा विधेया। तत्र बाह्यपूजायां नीराजनान्तं पूजनं विधाय जितेन्द्रियः सन् जपं कुर्यात् जपे अपि तुलसीकाष्ठमणिभिः कृतया मालया त्रिसन्ध्यं शतं सहस्रं वा जपः करणीयः। तदुक्तं- **"आदौ तु मानसीं कृत्वा ततो बाह्यां प्रवर्त्तयेत्। नीराजनान्तमासाद्य जपं कुर्याज्जितेन्द्रियः॥ तुलसीकाष्ठसम्भूतैर्मणिभिः कृतमालया। जपेच्छतं सहस्रं वा त्रिसन्ध्यास्वपि तं जपेत्॥"** जपावसरे कम्बलकौशेयवस्त्रदर्भासनादिनिर्दिष्टासनं करणीयम्।

ज्ञानोदये साधनसम्पत्तिः

साधकः जपपूजाज्ञानमात्रेण (Only Information) जपपूजादिकरणेन विना परत्र इह च लोके कल्याणं न प्राप्नोति। विहितानुष्ठानं विधेयमेव। साधकः अहिंसादिसद्गुणसाधनसम्पन्नोऽपि स्यात्। ते च सद्गुणाः अहिंसासत्यास्तेयब्रह्मचर्यार्जवक्षमाधैर्यमिताहारास्तिक्यदानवैराग्यविवेकशमश्रद्धादममुमुक्षता-समाधानाख्याः सन्ति। एतत्साधनसम्पत्त्या दारिद्र्यशमनं ज्ञानं सम्पद्यते। यथोक्तं-

"न गृही ज्ञानमात्रेण परत्रेह च मङ्गलम्।
प्राप्नोति चन्द्रवदने जपपूजादिभिर्विना॥

अहिंसासत्यमस्तेयं ब्रह्मचर्यदमार्जवम्।
क्षमा धैर्यं मिताहारं आस्तिक्यं दानमेव च॥

वैराग्यं च विवेकश्च शमः श्रद्धा दमस्तथा।
मुमुक्षता विवेकश्च समाधानं तथाऽऽत्मनः॥

एतत्साधनसम्पत्तिं कुर्वतां परमेश्वरि।
ज्ञानं दारिद्र्यशमनं भविष्यति न संशयः॥" (मा.त.-३१/६०-६३)

अत्र उद्देशतः अहिंसादिकं निरूप्य पुनस्तत्तद्गुणानां लक्षणानि कथितानि।

मन्त्रराजपुरश्चरणविधिः

माहेश्वरतन्त्रस्य द्वात्रिंशपटले पार्वतीप्रश्नानुसारं भगवान् शिवः पुरश्चरणविधिं प्रोक्तवान्। सेवया सद्गुरोः प्रसादेन च मन्त्रं लब्ध्वा तन्मन्त्रजागरणार्थं जपहोमार्पणादिकमनुष्ठेयम्। जपादिपुरश्चरणाय शून्यागार-गिरि-तीर्थस्थानोद्धानसिद्धपीठप्रयागपुष्करनर्मदातटविन्ध्याद्रिशुभस्थल-माश्रयणीयम्।

एतादृशशुभस्थलेषु मन्त्रराजजपानुष्ठानेन सिद्धिः सञ्जायते। जपादिपुरश्चरणकर्ता जितेन्द्रिय-जितक्रोध-दृढव्रत-जितचित्त-दृढवैराग्यसम्पन्न-देहाहङ्कारवर्जित-सर्वभूतदयालु-भूतबाधापराङ्मुख-सङ्कातङ्कादिरहित-रागद्वेषविवर्जित-परित्यक्तदेहगेहादिचित्त-प्रशान्तधी-मन्त्रध्यानपर-नित्यलीलाध्यानपरायण-त्रिधास्त्रीसङ्गत्यागि-ध्यानमुद्राधर-मौनि-त्रिषवणस्नायि-शुचिदेह-श्वेताम्बर-वर्णाश्रमक्रियायुक्त-विश्वासि-देवब्राह्मणगोनिन्दारहितानसूयकलोभवर्जितः भवन् पुरश्चरणं कुर्यात्। मनसा कल्पितनियतक्षेत्रसीमाया दिग्रक्षणं कृत्वा तत्रैव अवस्थाय तद्बहिः अगत्वा पुरश्चरणं कुर्यात्। औदासीन्यभयक्रोधनिन्द्रातन्द्रादिवर्जनं कृत्वा दुग्धपानफलाहारभिक्षान्नकन्दमूलफलपत्रायाचिताहारेण दैहिकवृत्तिं कल्पयेत्। इन्द्रियविकारान् विहाय वाङ्मनःकायकौटिल्यं सर्वथा परित्यज्य जपादिकं करणीयम्। जपं कुर्वन् श्रान्तः लीलाध्यानं कुर्वीत। मध्यन्दिनपर्यन्तं जपं कुर्यात् ततः मनसा लीलां ध्यायेत्। प्रतिदिनं मन्त्रजपदशांशेन होमं कुर्यात्। अथवा लक्षपर्यन्तं जपं कृत्वा होमं कुर्यात्। अथवा समाप्तावपि यथासम्भवं होमं कुर्यात्। पुरश्चरणे प्रत्यक्षरं लक्षं जपेत्।

अष्टचत्वारिंशल्लक्षजपानुष्ठानेन ब्रह्मपुरश्रीदर्शनम्, सुधासिन्धौ वृन्दावनस्थितम् उत्तमं पुरुषं ध्याने साक्षादिव पश्यति साधकः।

"उत्तमं पुरुषं पश्येत् ध्याने साक्षादिव स्वयम्।
ततस्तापो भवेत्तीव्रविरहेण फलात्मकः॥
तदा च नियमाः सर्वे कृता वाप्यकृता अपि।
समाप्यन्ते महेशानि स्वास्थ्याभावस्वभावतः॥" (मा.त.-३२/७९-८०)

सुदुर्लभतापावस्थानिरूपणम्

मन्त्रराजपुरश्चरणविधिं श्रुत्वा पार्वती तापावस्थां परिपृच्छति तापावस्थानुभवेन पूर्णरसानुभूतिः सम्यक् सञ्जायते। इमं प्रश्नं समाधातुं सदाशिवः उपदिशन्नाह यथा- **ब्रह्म रसात्मकं रसभोक्तृ चास्ति।** रसेषु आदौ प्रोक्तः शृङ्गारः संयोगविप्रलम्भात्मा द्विविधः। तत्र विप्रलम्भात्मा रसः परमं फलं कथितम्। तापोदयेन विना विप्रलम्भस्य सिद्धिः न भवति।

"दशावस्था भवन्त्येताः तापे विरहसम्भवे।
तास्ते वक्ष्यामि देवेशि शृणुष्वैकाग्रमानसा॥
अभिलाषस्तथा चिन्ता स्मरणंच ततः प्रिये।
उद्वेगाधिप्रलापश्च जडतोन्माद एव च॥
गुणानां कीर्तनं चैव मरणं दशमं स्मृतम्।
अत्युग्रविरहे देवि अवस्था दशमी भवेत्॥" (मा.त.-३३/८-१०)

यथा कश्चिद्राजपुत्रः दैवाद् वनेचरैः सह वसन् आत्मानं विवशं वनेचरं जानाति स्वस्य प्रभुत्वशौर्यधैर्याद्यान् धर्मान् विस्मृतवान् कृपणधीः मन्दः दीनः पशुमांसोपजीवनः आत्मापह्नवमापन्नः केनचित् तत्स्वरूपविदा बुधेन बोध्यते **"न वनेचरपुत्रोऽसि राजपुत्रोऽसि सर्वथा।"** एवं सद्गुरुणा जीवः तत्स्वरूपं बोधयित्वा अभिलाषजागरणं विधीयते शिष्ये।

"एवं सद्गुरुणा वाक्यामृतैरासेचिता यदा।
निर्वाप्य मोहभुजगविषज्वालां व्यथाकरीम्॥
अभिलाषवती भूयात् परानन्दपतिं प्रति।" (मा.त.-३३/५५-५६)

ततः क्रमेणापरास्तापावस्थाः जायन्ते।

मानसीसेवासिद्धिपर्यन्तं बहिःसेवा आवश्यकी

विरक्तस्य योगिनो मनो ध्यानरतं भवति तद्वत् साधकस्य सम्यक् प्रजातया स्मृत्या मनो लीलारतं भवति। स्मृत्याख्यावस्थया मानसी सेवा प्रसिद्ध्यति अन्यथा न। तस्मात् यावत् स्मृतिसिद्धिः स्यात् तावत् अन्तर्बहिः सेवा कार्या। स्मृतिं विना बहिःसेवात्यागः न कार्यः। अन्यथा प्रत्यवायः भवेत्। मार्गभ्रष्टश्च भवेत्। यथोक्तं-

"स्मृतिं विना तु देवेशि बहिःसेवां परित्यजेत्।
प्रत्यवायमवाप्नोति मार्गभ्रष्टो भवेदपि॥

स्मृत्यवस्थैव देवेशि मानसीमूलमुच्यते।
मानस्यां जायमानायां बाह्यसेवा निवर्त्तते॥

प्रियसेना प्रियाधर्मो यावत्सर्वेन्द्रियक्रिया।
सर्वेन्द्रियक्रियाभावान्मानसी सा प्रवर्त्तते॥" (मा.त.-३७/३-५)

अष्टचत्वारिंशादिपटलेषु कृष्णपूजाया विस्तृतं वर्णनं प्राप्यते। एवमिह माहेश्वरतन्त्रे श्रीकृष्णोपासनाया निरूपणं प्राप्यते तदवगत्य सेवां कर्तुं शक्नोति साधकः।

नैष्कर्म्यमय्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्। (भाग.-१/५/१२)

शास्त्रमवगत्य कायवाङ्मनोभिः कृष्णः सेव्यः। (तत्त्वदीपिकानिबन्धे महाप्रभुः श्रीवल्लभाचार्यः)

॥इति शम्॥

सन्दर्भग्रन्थाः

(१) श्रीमाहेश्वरतन्त्रम्, डॉ. वंशीधर शर्मा, प्रका.-श्रीरामरत्नदास ट्रस्ट(राज.), श्रीनिजानन्द आश्रम, शेरपुर, मु.पो. जडादेपण्डा, जि. सहरानपुरा, उत्तरप्रदेश

(२) श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर

(३) तत्त्वार्थदीपिकानिबन्धः, श्रमद्वल्लभाचार्यविरचितः

(४) तैत्तिरीयोपनिषद्

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

पुराणेषु विश्वबन्धुत्वभावना

डॉ. अमृतलाल भोगायता[१]

यद्यप्यत्र नैके विषयाः प्रदत्ताः तथा च सर्वेषामपि प्रदत्तविषयाणां विद्यतेऽनल्पं महत्त्वम्। अस्यां स्थितावपि "पुराणेषु विश्वबन्धुत्वभावना" विषयोऽयं मन्मानसं गुणोत्तंसस्य हंसस्य मानसमिव बलात् सहजप्रीत्या विशेषप्रासङ्गिकत्वाच्च कर्षति। सर्वेषु युगेषु विश्वबन्धुत्वभावना महत्त्वपूर्णाऽवर्ततैव। श्रीमद्भागवतपुराणे समुद्रमन्थनावसरे देवासुराणां, ततश्च रामरावणयुद्धं, ततश्च पाण्डवकौरवाणां, ततश्च षड्रिपूणां युद्धोल्लेखो दृश्यते। सत्युगे देवदानवसङ्घर्षकारणादेतस्या भावनाया अनिवार्यताऽऽसीत्, त्रेतायां स्वर्गस्थं युद्धं रामरावणव्याजेन भूमिं प्राप्तं परं द्वापरे देशयोर्मध्ये तद् युद्धं प्रवृत्तम्, मानवराक्षसयोर्मध्ये तद् युद्धमवर्तत, ततो द्वापरयुगे पाण्डवकौरवाणां मध्ये नामैकस्मिन्परिवारे युद्धं प्रवृत्तम्, कलौ तु मानवाः स्वस्थैः षड्रिपुभिरेव युध्यन्ते तस्मादेव स्वस्थैर्युध्यमाना न ते मानसिकशारीरिकस्वस्थाः। अत एव सम्प्रति "अभयं नः पशुभ्यः" इति न प्रार्थनीयं परं "अभयं नो मानवेभ्यः" इति तथा च "शं नो मित्रः शं वरुणः शं नो भवत्यर्यमाः" इत्यस्य स्थाने "शं नो मानवः" इति वक्तुमवसर आगतः। सत्युगत अधुना यद् वयं विलोकयामश्चेद् युद्धस्यान्तरं न्यूनीभूतमत एव सम्प्रति विश्वबन्धुत्वभावनाऽनिवार्या न च निवार्या। सर्वे देशा दैनन्दिनं शस्त्रवृद्धिपरायणाः सन्ति तेषां युद्धभूमिं प्रति धावतां विविधविदेशवाजिनां वागुरीभूता भविष्यन्ति इमानि वचांसि। पुरा विश्वबन्धुत्वभावनायै वेदैरित्थमुपदिष्टम्- "माता भूमिः पुत्रोऽहं पृथिव्या" इति अथर्ववेदस्य पृथिवीसूक्ते पुनश्च तत्रैव अथर्ववेदे "यत्र विश्वं भवत्येकनीडम्" सन्देशं प्रदाय निखिलमपि जगदेकगृहरूपेण समुपस्थापितम्। ऋग्वेदे तु "संगच्छध्वं सं वदध्वं शं वो मनांसि जानताम्" इति विलिख्य विश्वमैत्रीभावना दर्शिता। समतायाः सद्भावनायाः सामञ्जस्यं तत्रैव ऋग्वेदे पुनः इत्थमपि प्राप्यते।

समानीव आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति ॥

---

[१] प्राचार्यः, ब्रह्मर्षिसंस्कृतमहाविद्यालयः, नडियाद

इमे मन्त्रा अस्मान् मैत्रीभावरक्षणाय प्रेरयन्ति। वेदानामुपबृंहणं नाम पुराणानि। त एव विचाराः पुराणेषु सन्निहिताः सन्ति। मार्कण्डेयपुराणे-

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥ - मा.पु.-८१/७

अत्र भगवति समस्तजगतां हेतुः नाम जननी प्रोक्ता। इदं सर्वमपि विश्वं तस्या एव अंशभूतमिति भावः।

देवी प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवी चराचरस्य॥ - मा.पु.-८८/२

अत्रापि हे विश्वेश्वरि! जगदम्ब! त्वं समस्तं विश्वं पाहि, न केवलं भारतभूमिखण्डमित्यत्र ऋषेर्विश्वबन्धुत्वभावनापुष्टिं प्रयाति। महाभारते आदिपर्वणि भगवता व्यासेन प्रोक्तं यथा-

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

इत्यस्य आचरणं चरत एव शान्तिं जनयति। ईदृगाचरणमेव विश्वबन्धुत्वबीजमिति भावः। भगवद्गीतायां तु सर्वभूतेषु समभावेन दृष्टिः करणीयेति प्रोक्तं न तत्र भेदो वा द्वैतं रक्षणीयमिति यथा-

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥ - श्रीमद्भगवद्गीतायाम्-१३/२७

सर्वत्र यदि परमात्मा एक एवेति मत्त्वा व्यवहारः क्रियते तर्हि समदृष्टिर्भविष्यति। धर्म एव सम्प्रति विश्वबन्धुत्वभावनायां साधकोऽयं जनानामज्ञानात् बाधकः संवृत्तः। अत एव "एकं सद्विप्रा बहुधा वदन्ति" स्वीकृत्य सर्वत्र समानमेव परमात्मानं पश्यति स एव पश्यति तं विहाय सर्वेऽन्येऽज्ञा अन्धा एव। भागवतपुराणे तु प्रोक्तं यथा-

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः।
मया सन्तुष्टमनसः सर्वाः सुखमया दिशः॥ - भागवते-११/१४/१३

प्रायः युद्धस्य कारणानि इमानि भवन्ति यथा- धनलोभः-मतभेदः-असन्तोषश्च परमत्र प्रोक्तम् अकिञ्चनेन भाव्यम्, औदार्यं रक्षणीयम्, शान्तिः परिपालनीया समता रक्षणीया सन्तोषश्चावधारणीयः इत्थं क्रियते चेत् विश्वस्मिन् विश्वे सर्वत्र सुखमेवास्ते। "सर्वा आशा मम मित्राणि भवन्तु" कथनस्य आवश्यकतैव न भविष्यति। पुनः भागवतपुराणे प्रोक्तं यथा-

अहिंसा सत्यमस्तेयकामक्रोधलोभता।
भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः॥ - भागवते-११/१७/२१

अर्थात्- हिंसा न करणीया, सत्यं रक्षणीयम्, चौर्यं न कार्यम्, महेच्छा न करणीया, क्रोधो न पालनीयः, लोभो न वर्धनीयः, सर्वेषां जीवानां जनानां यथा हितं भवेत् तथा विचारणीयं स एव धर्मः। व्यवहारोऽयं विश्वबन्धुत्वपोषकः। पुराणेषु सर्वत्र व्यवहार एव तथा निर्दिष्टो येन वसुधैव कुटुम्बकम् इत्यस्य भावना सहजैवोद्भवति।

श्रीमद्भागवतपुराणे वैरभावस्त्याज्य इति प्रोक्तं "नास्ति मूलं कुतः शाखा" इति न्यायेन यदि वैरभाव एव न स्यात् तर्हि विश्वबन्धुत्वं सुखं निर्बाधं विकसत्येव। यथा-

भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति। - भागवते-३/२१/२३

पुनश्चेदमपि ज्ञेयं वर्तते।

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥

अत्र न कस्यापि जातिविशेषस्य, जनविशेषस्य, राज्यविशेषस्य, देशविशेषस्य कृते प्रोक्तमपि तु सर्वजनसुखाय सर्वजनहिताय प्रोक्तम्। पुनश्च तत्रैव भागवते-

सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु।
दयां मैत्री प्रश्रयं च भूतेष्वद्धा यथोचितम्॥ - भागवते-११/३/२३

अत्र मानवस्य परमाद्यं चेदमेव कर्तव्यं वर्तते यत् सर्वभूतेषु दया, मैत्री आदरश्च करणीय इति इयं शिक्षा यदि सर्वत्र भवति तर्हि न कुत्रचिदपि आतङ्कवादस्यातङ्को भवेत्।

अग्निपुराणे तु-

एकमेवमिदं विद्धि न भेदः सकलं जगत्। - अग्निपुराणे-अ.३८०/५४

अत्र यत्र भेदो भवति तत्र भयं भवति परं यत्र अद्वैतं तत्र बन्धुत्वमिति भावः।

भगवद्गीतायामपि प्रोक्तम्-

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ। - गीतायाम्-३/११

अतः विश्वबन्धुत्वमेव श्रेयस्करमिति पुराणेषु मुक्तकण्ठेनोद्घोषितम्।

अन्यो न दृष्टः सुखदो हि मार्गः पुराणमार्गो हि सदा वरिष्ठः।
शास्त्रं विना सर्वमिदं न भाति सूर्येण हीना इव जीवलोकाः॥

शिवपुराणे, उमासंहितायाम्-१३/४२

अत्र पुराणेषु न केवलं मनुजानां समाजे परं पशूनां समाजेऽपि बन्धुत्वं रक्षणीयमिति उपदिष्टम्। यथा- भगवतः शिवस्य परिवारे पार्वत्या वाहनं सिंहः तथा च शिवस्य वाहनं वृषभः, गजाननस्य वाहनं मूषकः तथा च भगवतः शङ्करस्य कण्ठे सर्पः, षडाननस्य वाहनं मयूरः तथा च महादेवः नागेन्द्रहारो विराजते। एकस्मिन्नेव कुटुम्बके सति विरोधेऽपि बन्धुत्वभावादेव विगतवैराः सन्तः सर्वे एकस्मिन्नेव हिमगिरौ सुखं वसन्ति।

द्रोहबुद्धिः वैरबुद्धिः विनाशविचारः एतत् सर्वमपि हानिकरं भवति। तस्मादेव भागवतपुराणे वसुदेवमुखेन कंसं प्रति व्यासो वदति यथा-

तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम्॥ - भा.-१०/१/४४

कस्यचिदपि द्रोहः क्रियते चेत् आत्मनः इह परत्र च कल्याणं न भवति तथा च शत्रवो वृद्धिं यान्ति सत्सु शत्रुषु कुतः सुखम्? अतः मानवेन अजातशत्रुणा भाव्यम्। अथर्ववेदेऽपि अयमेवोपदेशः प्रदत्तः यथा-

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभिहर्षत वत्सं जातमिवाघ्न्या॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिदाम्॥
मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥ ३/३०/१-३

अत्र मन्त्रेषु सर्वैः परस्परं सुष्ठु व्यवहारः कर्तव्य इति उपदिष्टम्। यतो हि-

न कश्चिद् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥

अतः सर्वैः स्वव्यवहारो रक्षणीयः। महाभारतेऽपि तदेव कथ्यते-

यदा न कुरुते पापं सर्वभूतेषु कर्हिचित्।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा॥ - महाभारते आदिपर्वणि-७६/५२

सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः।
कर्मणा मनसा वाचा स धर्मं वेद जाजले॥

भगवद्गीतायां तु प्रोक्तम्-

"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि" एवं वेदेषु पुराणेषु च सर्वत्र विश्वबन्धुत्वरक्षणायैव उपदिष्टम्। यथा वृक्षः फलं यच्छति त्यजति चेत् स अन्येषां कल्याणं कुर्वन् आत्मनोऽपि कल्याणमधिगच्छति। यदि स परोपकारं न कुर्यात् तर्हि तदेव फलं तत्रैव गलितं सत् कृमिपूर्णं भूत्वा वृक्षमेव हन्यात् अतस्तस्य परोपकारो न वृथा। जना अपि अन्येषां कृते कल्याणं कुर्युश्चेत् तत्फलं पुनस्तैर्लभ्यत एव नात्र संशयावकाशः।

पुराणानामयं सारः बन्धुत्वं रक्ष्यतां ध्रुवम्।
नष्टे भावेऽखिलं विश्वं नाशमेष्यति सर्वथा॥
भोगायताऽमृतेनेयं विश्वबन्धुत्वभावना।
अलिख्यत पुराणेभ्यः वेदमूला न निर्मूला॥
सतां चेतः प्रसादाय तद्विदां वेदनाय च।
विश्वबन्धुत्वभावोऽयं भूयात् भूतस्य भूतये॥

॥ अस्तु शम् ॥

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

कालिदाससाहित्ये पशुपक्षिणां सङ्गीतकलायाः परिशीलनम्

डॉ. हीरालाल दाश[१]

प्रस्तावना

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखण्डिभिः ।।

संस्कृतवाङ्मये साहित्यशास्त्रे राराज्यमानेषु महाकविषु कविकुलगुरोः कविकुलचक्रवर्तिनः कविताकामिनीकान्तस्य कवीश्वरस्य महाकवेः कालिदासस्य स्थानं सर्वोत्कृष्टं भजतेतराम् । तस्य च कालिदास-कालदास-चन्द्रमौली-देवव्रत-ईश्वरकृष्ण-दीपशिखादयः नामविशेषाः श्रूयन्ते। महाकवेः कालिदासस्य काव्यकला तादृशी भवति यत्र चित्रकलाः मूर्तिकलाः नृत्यकलाः सङ्गीतकलाश्च अनस्यूततया प्रवहमानाः दरीदृश्यन्ते ।

सम् (सम्यक्) इत्युपसर्गपूर्वकं गै इति धातुना क्त प्रत्यये सङ्गीतशब्दोऽयं समजनि । आचार्यभरतमुनेः स्पष्टमिदं मतं भवति यत् गीतं नाटकस्य नैकेषु प्रमुखाङ्गेषु श्रेष्ठं भवति । वाद्यं नृत्यं तु गीतस्य अनुगामी भवति। नाट्यान्तर्गततया गीतं वाद्यं नृत्यञ्च प्राचुर्येण अधुना परिलक्ष्यते । तेन नाटकं **तौर्यत्रिक**मिति संज्ञया आख्यायते । अत एव गीतं वाद्यं नृत्यरूपं सङ्गीतस्य उपादानानि निर्दिश्य मेघदूते सङ्गीतार्थपदं प्रयुक्तं महाकविना कालिदासेन।प्रसङ्गेऽस्मिन् उक्तं हि –

शब्दायन्ते मधुरमनिलः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नराभिः ।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।1

---

[१] Associate Professor, Dept.of Sanskrit, MSCBD University, Keonjhar Campus, Keonjhar, Pin- 758002 (Odisha)

विष्णुधर्मोत्तरपुराणानुसारं वाद्यं नृत्यञ्च गीतस्य अनुगामिनौ भवतः । भारतीयजनश्रुतिरपि वर्तते यत् वैवस्ततमन्वन्तरे त्रेतायुगारम्भे एकदा इन्द्रादयः देवाः भगवन्तं ब्रह्माणं प्रार्थयन् दृश्यं श्रव्यञ्च क्रीडनीयकमभिलषितवन्तः।उक्तं हि नाट्यशास्त्रे प्रथमाध्याये –

त्रेतायुगे संप्रवृत्ते मनोर्वैवस्ततस्य च ।।
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः ।
क्रीडनीयकमिच्छामः दृश्यं श्रव्यं च यद्भवेत् ।।2

महर्षिः भरतोऽपि नाट्यवेदस्य शिक्षां प्राप्य स्वपुत्रान् शिक्षाम् अददात् । भगवान् ब्रह्मा स्वातिस्तथा तस्य शिष्यान् वाद्यं एवञ्च नारदं गन्धर्वं च गानकार्येषु नियोजयामास । उक्तं हि –

स्वातिर्भाण्डानियुक्तस्तु सह शिष्यैः स्वयम्भुवा ।
नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः ।। 3

कालिदाससाहित्ये नैके पशवः पक्षिणश्च सुवर्णिताः निरूपिताश्च अभुवन् । स च महाकविः तेषां पशूनां पक्षिणां च माध्यमेन सङ्गीतस्योत्पत्तिः अनुभवश्च नैकेषु स्थानेषु वर्णयामास। प्राचीनपरम्परानुसारं सङ्गीतस्य ये सप्तस्वराः सन्ति, तेषामुत्पत्तिः पशुपक्षिणां ध्वनिषु अभूत्। दामोदरपण्डितस्य सङ्गीतदर्पणानुसारं मयूरात् षडजः, चातकात् ऋषभः,अजात् गान्धारः, क्रौञ्चात् मध्यमः, कोकिलात् पञ्चमः दर्दुरात् धैवतं, तथा गजात् निषादस्योत्पत्तिरजायत । प्रसङ्गेऽस्मिन् उक्तं यथा –

षड्जं वदति मयूरः पुनः स्वरमृषभं चातको ब्रूते ।
गान्धाराख्यं छागो निगदति च मध्यमं क्रौञ्चः ।।
गदति पञ्चममञ्चितवाक् पिको रटति धैवतमुन्मददर्दुरः ।
शृणिसमाहतमस्तककुञ्जरो गदति नासिकया स्वरमन्तिकम् ।।4

शार्ङ्गदेवेन प्रणीते सङ्गीतरत्नाकरे सङ्गीतस्य स्वरूपं निरूपितमवलोक्यते । गायनं,वादनं,नृत्यञ्च त्रयः मिलित्वा सङ्गीतं भवति। उक्तं यथा –

गातं वाद्यं तथा नृत्यं त्रयः सङ्गीतमुच्यते ।।5

भर्तृहरेः मतानुसारं मनुष्यकोटिषु परिगणयितुं साहित्यसङ्गीतयोरावश्यकता अवश्यमेव स्वीकर्तव्यम् । येषां साहित्यसङ्गीतयोः ज्ञानं नास्ति ते अस्मिन् मर्त्यलोके मनुष्यरूपेण स्थित्वापि पशुवत् जीवन्ति । उक्तं हि नीतिशतके –

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।6

नैषधीयचरितस्य कर्ता महाकविः श्रीहर्षोऽपि तौर्यत्रिक-नृत्य-गीत-वाद्यत्रयं सङ्गीतम् आनन्दस्वरूपं तथा आनन्दसाधनरूपं भवतीति प्रमाणीचकार।तेन वने राजा नलः स्मरेण उपतप्तोऽतौर्यत्रिकम् अनुभवतीति निरूपितम् । प्रसङ्गेऽस्मिन् उक्तं यथा –

विलासवापीतटवीचिवादनात्
पिकालिगीतेः शिखिलास्यलाघवात् ।
वनेऽपि तौर्यत्रिकमारराध तं
क्व भोगमाप्नोति न भाग्यभाग्जनः ।।7

एवञ्चात्र पशुपक्षिणामपि सङ्गीतकला स्वस्वकूजनादिषु कथनमनुमीयते । तत्सर्वमपि कालिदाससाहित्ये प्रमाणीकर्तुं शक्यते । तदत्र किञ्चित् प्रमाणपुरस्सरम् अधस्तान्निरूप्यते ।

शोधपत्रस्यास्य उद्देश्यम्

कविताकामिनीकान्तस्य कनिष्ठिकाधिष्ठतस्य महाकवेर्कालिदासस्य काव्यानामुपरि बहुधा बहुभिश्च अध्ययनं शोधप्रबन्धाश्च लिखिताः वर्तन्ते। तस्य साहित्ये न्याय-वेदान्त-मीमांसादीनि दर्शनानि ,कामशास्त्राणि,मूर्तिकलाः,सङ्गीतकलाः,शृङ्गाररसस्य अन्येषां च रसानां प्रवाहमानाः दरीदृश्यन्ते । परन्तु कालिदासः न केवलं शृङ्गारी कविः अपि तु पर्यावरणस्योपरि तथा पशूनां पक्षिणाञ्चोपरि तस्य दृष्टिः विचित्रैव भवति। सच्च महाकविः तेषां पशुपक्षणिणां स्वरादिकं नृत्यवाद्यगीतादीन् वर्णयितुं समर्थोऽभूत्।तेषां पशुपक्षिणां सुसमीचीनं वर्णनं कालिदासेन कृतम्। अत एव तस्य साहित्ये नैकेषु काव्येषु च पशुपक्षिणां सङ्गीतकलायाः उपरि शोधपत्रमिदं लिखितं वर्तते । तेन शोधपत्रस्यास्य शीर्षकं **"कालिदाससाहित्ये पशुपक्षिणां सङ्गीतकलायाः परिशीलनम्"** इति स्थापितम्। शोधपत्रमिदं निश्चितरूपेण साहित्यरसपिपासकानां सङ्गीतकलाया उपरि महत्वं प्रदत्तवतां सहृदयानां मनः आकर्षयतीति विश्वस्यते ।

कालिदाससाहित्ये पशूनां सङ्गीतकलायाः परिशीलनम्

कविताकामिनीकान्तस्य कविचक्रवर्तिनः महाकवेः कालिदसस्य प्रायः सर्वेष्वपि काव्येषु पशूनां गर्जनादिकं रवः , तेन च सङ्गीतस्य भावः अभिव्यज्यते । सङ्गीतस्य यः अन्तिमः स्वरः निषादः, तेन कुञ्जरस्य (गजस्य)स्वरः स्वीक्रियते । मदोन्मत्तस्य गजस्य गम्भीरगर्जनेनापि सङ्गीतस्य स्वरूपं भवतीति कालिदासः प्रमाणयति । यत्तु गर्जनं वीररसम् अभिव्यनक्ति। कुञ्जरगर्जनस्य नैकान्युदाहरणानि कुमारसम्भवस्य चतुर्दशसर्गे परिलक्ष्यन्ते ।

कुञ्जरगर्जनम्

कुमारसम्भवे महाकाव्ये कार्तिकेयः तारकासुरस्य मारणाय देवैस्सह जगाम । तस्मिन् समये तस्य सैन्यविभागे नैकाः मत्ताः गजाः गम्भीररूपेण गर्जन्ति स्म , तत्र युद्धकाले गजानां गर्जनेन अन्यत् सर्वमपि वाद्यादिकं तिरस्कृताः अभूवन् । उक्तं हि तत्र –

घण्टारवैः रौद्रतरैर्निरन्तरंविसृत्वरैर्गर्जरवैः सुभैरवैः ।
मत्तद्विपानां प्रथयांबभूविरे न वाहिनीनां पटहस्य निःस्वनाः ।। 8

कालिदासस्य ऋतुसंहारेऽपि वृष्टिवर्णनप्रसङ्गे कालिदासः यथासंख्यालङ्कारमाध्यमेन मत्तगजानां समीचीनं नादं वर्णयति । प्रसङ्गेऽस्मिन् उक्तं यथा –

वहन्ति वर्षन्ति नदन्ति भान्ति
रुदन्ति नृत्यन्ति समाश्रयन्ति ।
नद्यो घनाः मत्तगजाः वनान्ताः
प्रियाविहीना शिखिनः प्लवङ्गाः ।।9

एवञ्च मत्तगजानां अन्येषु काव्येष्वपि महाकविः कालिदासः वर्णनं व्यदधात् । परन्त्वत्र स्थालीपुलकन्यायेन किञ्चिदालोचितम् ।

अश्वहेषितम्

आनन्दसमये क्रोधे च अश्वस्य यः ध्वनिः सः हेषितः, हेषा वा इत्युच्यते । तस्मिन् अश्वहेषितेऽपि सङ्गीतस्य ध्वनिः परिकल्पयितुं शक्यते । कुमारसम्भवे तारकासुरेण सह युद्धसमये प्रस्थानं कुर्वतां देवसेनानाम् अश्वाः तथा भयङ्करेण हेषिताः, मत्तगजाश्च बृंहिताः येन ताडिताः घनाः (वाद्यविशेषाः) अपि तिरोहिताः निःस्वनाः च अभूवन् । प्रसङ्गेऽस्मिन् उक्तं हि-

महागजानां गुरुबृंहितैस्ततैः सुहेषितैर्घोरतरैश्च वाजिनाम् ।
घनै रथानां गुरुचण्डचीत्कृतैस्तिरोहितोऽभूत्पटहस्य निःस्वनः ।। 10

मृगाणां सङ्गीतप्रियता

मृगाः सङ्गीतप्रियाः भवन्तीति ज्ञायते।वादोऽस्ति यत् मृगयार्थं ये गच्छन्ति ते यदि सङ्गीतं गायन्ति तर्हि मृगाःआकर्षिताः भवन्ति,तच्छ्रोतुं बहु दूरं गच्छन्तः मृगाः स्वप्राणान् त्यजन्ति। रघुवंशे वाल्मीक्याश्रमे मृगाः यदा किन्नरकण्ठयुक्तलवकुशाभ्यां प्रस्तुतं रामचरितमानसं शृण्वन्ति, तदा ते मन्त्रमुग्धाः निःस्पन्दाश्च अभुवन् । तेन निःस्वन्देन ज्ञायते यत् मृगा अपि सङ्गीतप्रिया एव भवन्ति । उक्तं यथा –

भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् ।
मैथिलीतनयोद्गीतनिःस्पन्दमृगमाश्रमम् ।।11

हरिणाङ्गनानां विलोलदृष्टिः तत्र सङ्गीतकलायाः परिकल्पना च

नृत्यसमये नेत्रयोः विविधप्रकारेण सञ्चालनं विधीयते,मानवनर्तकी भवतु पशुजातिर्वानेत्रच्छटा नृत्यस्य एकमङ्गमस्ति । मृगाङ्गनाः नेत्रविलासे विशेषरूपेण निपुणाः भवन्ति। कुमारसम्भवे पार्वती आयताक्षी तथा मन्दपवनैः धूनीतनीलकमलमिव सुन्दररूपेणनेत्रच्छटा प्रकटयति स्म । येन सा मृगाङ्गनया नेत्रच्छटा शिक्षितवती, उत मृगाङ्गनाः पार्वतीतः इति सन्देहो जायते, इत्थमेव मृगाणां वर्णनम् कुमारसम्भवे परिलक्ष्यते।उक्तं यथा –

प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्याः ।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ।। 12

एवञ्च मृगाङ्गनानां विषये तासां सङ्गीतस्य च सङ्केतः नैकेषु पद्येषु कालिदाससाहित्ये परिलक्ष्यते । परन्तु विशेषरूपेण **राजहंस-सारस-सारिका-शुक-मयूर-पारावतादीनां** पक्षिणां वर्णनानि तत्काव्येषु परिलक्ष्यन्ते। तस्योपरि क्वचित् अधस्तान्निरूपयिष्यते ।

कालिदाससाहित्ये पक्षिणां सङ्गीतकलायाः परिशीलनम्

सङ्गीतं तादृशी रुचिरकला वर्तते, यस्यानुभुतिः न केवलं मानवानाम् अपि तु पशुपक्षिणामपि भवति । आनन्दप्राप्तये न केवलं मनुष्याः अपि तु पशुपक्षिणः अपि सङ्गीतस्य प्रयोगं कुर्वन्तीति महाकविः कालिदासः स्वीयकाव्येषु प्रमाणयति। कालिदाससाहित्ये तेषां पशुपक्षिणां माध्यमेन सङ्गीतकलायाः प्राचुर्येण निरूपणं परिलक्ष्यते ।

संस्कृतसाहित्ये पशुपक्षिणां सङ्गीतविषये नैकानि तत्थ्यानि परिलक्ष्यन्ते। कालिदासीयकाव्येष्वपि तथैव कस्य पशोः पक्षिणः वा सङ्गीतस्य सङ्केतः कथं भवतीति विषयः

कालिदासस्य सर्वेष्वपि काव्येषु विलसति। तस्य महाकवेः कृतिषु येषां पक्षिणां सङ्गीतस्य तथा सङ्गीतप्रियतायाः समुल्लेखः प्राप्यते । तेषां नामानि यथा –

1. **मयूरः**
2. **कोकिलः**
3. **भ्रमरः**
4. **राजहंसः**
5. **सारसः**
6. **क्रौञ्चः**
7. **चातकः**
8. **शुकः**
9. **सारिका (मैना)**
10. **पारावतः**

प्रसङ्गेऽस्मिन् पक्षिणां सङ्गीतसन्दर्भे गानं नृत्यं च भवति। तदत्र क्वचित् समालोच्यते ।

षड्जसंवादिनी केकारवः (मयूरः)

मयूरः अस्माकं राष्ट्रियपक्षी भवति।सङ्गीतस्य आद्यस्वरः षड्जस्योत्पत्तिः मयूरेणैव भवतीति स्वीक्रियते। रघुवंशे प्रथमसर्गे एकोनचत्वारिंशत्तमे पद्ये मल्लिनाथटीकायामुद्धृतोऽस्ति । तदुक्तं मातङ्गेन -**षड्जं मयूरो वदति** । मयूरेणोद्भूतध्वनिः केका इत्युच्यते । तथाहि –

के मूर्ध्नि कायन्ति ध्वनन्तीति केका मयूरवाण्यः ।
केका वाणी मयूरस्य इत्यमरः ॥13

केकाइति पदस्य प्रयोगं महाकविः कालिदासःबहुवारं व्यदधात् । रघुवंशे महाराजः दिलीपः स्वपत्न्या सुदक्षिणया सह स्वगुरोः महर्षिवशिष्ठस्याश्रमं प्रति जगाम , तदा तस्य दिलीपरथस्य ध्वनिं श्रुत्वा मेघध्वनिमिति विचिन्त्य वने मयूराः उद्गीवाः सन्तः सहर्षं केका इति ध्वनिना ननृतुः । यस्य नृत्यस्य केकाध्वनेश्च सम्बादः षड्जस्वरेणाभूत्। एवञ्च केकाध्वनिं श्रुत्वा दिलीपः सुदक्षिणा च मार्गे अगमत्। प्रसङ्गेऽस्मिन् उक्तं यथा –

मनोभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केकाः द्विधा भिन्नाः शिखण्डिभिः ।।14

पूर्वस्मिन् पद्ये ' **द्विधा भिन्नाः ' " षड्जसंवादिनी केका "**इति पदद्वये संगीतस्य सङ्केतो जायते। अत्र महाकविना कालिदासेन केका इति शब्दस्य वर्णनं कृतं यत् षड्जसंवादिनी वर्तते । तत्तु मयूरस्य ध्वनिरपि अस्ति । तस्य संवादः सङ्गीतस्य षड्जस्वरेण भवति। मयूरादेव षड्जस्योत्पत्तिः स्वीक्रियते । षड्जोत्पत्तेः अपरमपि व्याख्यानं विधाने उच्यते यत् षड्जस्योत्पत्तिः षड्स्थानेभ्यो भवति। तेनैव सङ्गीतस्य प्रथमः स्वरः षड्ज एव । उक्तं हि –

नासाकण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् ।
षड्भ्यः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः ।।15

प्रियस्य सान्निध्ये यत् विषयसुखमनुभूयते,तदेव प्रियविरहेण सातिशयं दुःखमुत्पादयति,असह्यं च जायते । प्रसङ्गेऽस्मिन् रामः सीतां ब्रूते यत् - सीतायाः विरहेण मयूराणां स्निग्धकेकारूपसङ्गीतध्वनिरपि असह्य आसीत्। उक्तं हि -

गन्धश्च धाराहतपल्वलानां कादम्बमर्द्धोद्गतकेसरं च ।
स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे ।। 16

महाकविना कालिदासेन उत्तरमेघे पक्षिणां गीतनृत्यादीन् वर्णयन् अलकापुर्य्याः सौन्दर्यं निरूपितम् ।तस्याः अलकायाः अलौकिकसमृद्धिं वर्णयन् केकाध्वनिना मयूराणां नृत्यं स्पष्टयति , अपि च भ्रमराणाम् । तस्मिन् प्रसङ्गे हे मेघ ! यस्याम् अलकायां वृक्षाः नित्यपुष्पाः, अत एवोत्कटमधुकरैः शब्दायमानाः सन्ति। पद्मिन्योऽनवरतपद्माः अत एव हंसपङ्क्तिरचितमेखलाः सन्ति,क्रीडामयूराः सततोज्ज्वलबर्हाः,अत एव केकोत्कण्ठाः सन्ति,रात्रयोऽनवरतचन्द्रिकाः,अत एव निवारितान्धकारव्यास्यो रमणीयाश्च सन्ति । उक्तं यथा –

यत्रोन्मत्तभ्रमरमुखरा पादपाः नित्यपुष्पाः
हंसश्रेणीरचितरसना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ।।17

पद्येऽस्मिन् ध्यातव्यमेव प्रत्येकस्मिन्नपि पादे यत्किमपि ध्वनिः अभिव्यज्यते । तत्र प्रथमचरणे भ्रमरस्य गुञ्जारसङ्गीतः,द्वितीये हंसकूजितः रसना-क्वणनसङ्गीतः,तृतीये मयूरस्य केकासङ्गीतश्च सुस्पष्टः ।

कालिदासस्य विक्रमोर्वशीये केकाध्वनिना सुदूरं यावत् स्वस्य ग्रीवामुत्थाय मयूराणां वर्णनं नृत्यं च साहित्यरसपिपासकानां मनः आकर्षयति । उक्तं हि –

आलोकयति पयोदान् प्रबलपुरोवातनर्तितशिखण्डिः ।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ।। 18

मृदङ्गवादनमेव मेघगर्जनमिति विचिन्त्य मयूराणाम् उद्गीवया नृत्यं तथा त्रिपुष्करः (मृदङ्गोपरि) प्रस्तूयमानायाः मायूरीमार्जनायाः अतीव रमणीयः प्रसङ्गः मालविकाग्निमित्रे परिलक्ष्यते। तत्र मालविका नृत्यं प्रारब्धुमिच्छति। ततः प्राक् त्रिपुष्करो वाद्योपरि मायूरीमार्जनायाः वादनं भवति। तच्छ्रुत्वा मयूराः मेघगर्जनस्य प्रतीतिमादाय उद्गीवाः सन्तः केकाध्वनिरूपं सङ्गीतं प्रारभन्ते। मयूराणां कृते प्रियस्तथा मध्यमग्रामे निबद्धा मायूरीमार्जना जनान् आनन्दयति। उक्तं हि –

जीमूतस्तनितविशङ्किकभिर्मयूरैरुद्गीवैरनुरसितस्य पुष्करस्य ।
निह्रादिन्युपहितमध्यमस्वरोत्था मायूरी मदयति मार्जना मनांसि ।। 19

पद्यस्यास्य साङ्गीतिकं सौन्दर्यं निश्चप्रचं प्रमाणीकर्तुं शक्यते ।

भ्रान्तिः विचित्ररूपा भवति । भ्रान्तिवशात् भ्रमराः मयूरस्य कलापं नीलकमलमिति चिन्तयन्ति। मानवाः क्वचित् भ्रमवशात् विचित्ररूपेणैव व्यवहरन्ति। किमुच पशुपक्षिणाम् । सूर्यमण्डलमपि आवृत्तये समर्थस्य कार्तिकेयस्य सेनानां धूलिभिःपरिवृत्तमाकाशं दृष्ट्वा हंसानां वृष्टिभ्रमः येन मानसरः प्रति ते हंसाः प्रस्थिताः । तथा मयूराः वृष्टिभ्रमात् ननृतुः । तत्र केवलं वर्षाऋतोः भ्रमान्मयूराः अनृत्यन् । तथाहि –

घनैर्विलोक्य स्थगितार्कमण्डलैश्चमूरजोभिर्निचितं नभःस्थलम् ।
अयायि हंसैरभिमानसं घनभ्रमेण सानन्दमनर्ति केकिभिः ।। 20

पुंस्कोकिलकूजितः कोकिलारवश्च

सर्वेष्वपि पक्षिषुगानस्य कृते सर्वाधिकरूपेण कोकिलः कोकिला च सुप्रसिद्धं स्थानमवाप्नुवन्ताम् । वसन्तऋतौ कोकिलानां सुमधुरं सङ्गीतं सर्वत्र दिक्षु व्याप्नोति। आम्रमञ्जर्य्याः रसपानेन कोकिलः मत्तः भवति। सः तदानीं कामोद्दीपकश्च भवति। तेनैव सः स्वप्रियां चुम्बति। प्रसङ्गेऽस्मिन् उक्तं हि –

पुंस्कोकिलश्चूतरसासवेन मत्तः प्रियां चुम्बति रागहृष्टः ।21

तत्रैव ऋतुसंहारे आम्रमञ्जर्य्याः रसेन रचितस्य आसवस्य पानं कृत्वा सः कषायकण्ठः सन् गायाति । उक्तं हि –

रम्यः प्रदोषसमयः स्फुटचन्द्रभासः पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि शीधुपानं सर्वं रसायनमिदं कुसुमायुधस्य ।।22

कालिदाससाहित्ये इतोऽपि नैकेषु काव्येषु तस्य कोकिलस्य सुमधुरगानं परिस्फुरति । तत्सर्वमपि शोधपत्रविस्तारभयादत्र चर्चा नैव विधीयते । सङ्गीतशास्त्रे सङ्गीतस्य कृते तदर्थमेव कोकिलस्वर इति व्यवहारः क्रियते।

भ्रमरस्वनगीतिः

भ्रमरः तादृशः जन्तुविशेषः यः उद्यानेषु पुष्पाणामुपरि उपविश्य गुञ्जति।सः पुष्पाणां रसपाने मत्तो भवति,मधुरं गुञ्जति च । तस्य सुमधुरगुञ्जरेण कवयः मधुरसङ्गीतस्य परिकल्पनां कुर्वन्ति। ऋतुसंहारे तस्य भ्रमरस्य गानं वर्णयन् महाकविः ब्रूते- यथा मानवैः प्रयुक्तस्य गीतस्य नादः प्रभावी भवति,तद्वत् भ्रमराणां गुञ्जारः (गुञ्जनम्) रूपं नादोऽपि साफल्यं जनयति । तत्र महाकविः कालिदासः गीतनादयोः द्वयोरपि सङ्गीतशास्त्रस्य पदयोः प्रयोगं विदधाति। उक्तं हि –

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
उत्सूजितैः परभृतस्य मदाकूलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ।।23

कालिदाससाहित्ये भ्रमरः तथा तस्य गुञ्जनस्य (गानस्य) विषये कालिदासेन अधोलिखितानि पदानि प्रयुक्तानि । तथाहि -

1. **भृङ्गः - स्वनः**
2. **षड्पदः - कूजितम्**
3. **मधुकरः - नादः**
4. **भ्रमरः - विरुतम्**
5. **द्विरेफः - निःस्वनः**
6. **अलिः - उपगीतम्**
7. **मधुपः - गीतम्**

हंसकूजितम्

हंसः तादृश एकः पक्षी भवति,यः पुष्करिणी ,सरित् समीपे च निवसति। स च शुक्लवर्णोऽस्ति। शरत्काले स सातिशयम् आनन्दितो भवति । सः मत्तेन मधुरं कूजितरूपं सङ्गीतं गायति । कालिदासस्य ऋतुसंहारे शरत्काले हंसः मत्तेन मधुरं कूजनरूपं सङ्गीतं करोतीति वर्णितम् । तच्छ्रुत्वा जनाः हर्षिताः प्रफुल्लिताश्च भवन्तीति वर्णितं महाकविना ।

एवञ्च हंसैःव्याप्ताः सारसकूलाः सीमान्तप्रदेशे कूजन्ति। येन नराः प्रमोदाः भवन्ति । उक्तं यथा –

कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ।
हंसैः ससारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति नृणां प्रमोदम् ।। 24

सारसकूजितः

सारसः बहुधा पुष्करिणीषु अथवा जलाशये सरित्सु च निवसति। स च पक्षी पङ्क्तिबद्धरूपेण तिष्ठति । सारसपक्षिभिः व्याप्तं सरः सरित् भवति। तथा तैः सारसपक्षिभिः कूजितसङ्गीतेन प्रतिनादितः सीमान्तप्रदेशे आनन्दितो भवति। प्रसङ्गेऽस्मिन् उक्तं यथा –

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणितास्तटिन्यः ।।

हंसैः ससारसकुलैः प्रतिनादितानि ।
सीमान्तराणि जनयन्ति नृणां प्रमोदम् ।। 25

चातकनादे सङ्गीतम्

चातकः कश्चन तादृशः पक्षिवेशेषः भवति,यः केवलं वृष्टिसमये मेघात् पतितं जलमेव पिबति। यदि तज्जलं नीचैः पतति,तर्हि सः तत् नैव स्वीकरोति। अत एव वृष्टिकाले मेघैस्सह एतस्य विशेषसम्बन्धो दृश्यते । यदि कविः कुत्रचित् काव्येषु वृष्टिकालं वर्णयति,तर्हि चातकपक्षिणः वर्णनमवश्यमेव विदधाति।

चातकपक्षी वृष्टिकाले विशेषरूपेण मनोहरनादध्वनिः करोति। एतस्य पक्षिणः स्वरः मङ्गलसूचको भवति। ऋतुसंहारे चातकस्य सुमधुरस्वनस्य विषये निरूपितं कालिदासेन यथा –

तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो बलाहकाः श्रोत्रमनोहरस्वनाः ।।26

शुकगीतम्

प्राचीनकालादेव गृहे पालितपक्षिषु अतीव सुन्दरं, शोभनं,मनुष्यवाण्या च निगदितं स्वरयुक्तं पक्षी शुको भवति। श्रुतमपि कापि वाणी पुनरेव एकबारमावृत्तिं विदधाति सः । तदेव तस्यापरं वैशिष्ट्यं भवति।

रघुवंशे पञ्चमसर्गे अजस्य पार्श्वे विद्यमानः शुकः पञ्जरे स्थित्वा सातिशयं मधुरवाण्या किमपि भासते । तत्र अजस्य प्रबोधनाय प्रयुक्तस्तुतिगीतेन शुकः तमजम् आनन्दयति । उक्तं यथा –

भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।
अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता
मनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ।। 27

सारिकायाः सङ्गीतम्

सारिका इति पक्षिणः अपरं नाम मैना वर्तते। यः सुमधुरं कूजति। शुकसारिकयोः पालनं जनाः स्वगृहे मनोविनोदार्थमेव कुर्वन्ति। मेघदूते उत्तरमेघे विरही यक्षः मेघं ब्रूते यत् त्वं मम प्रियां द्रक्ष्यसि । या पञ्जरे स्थितां सारिकां क्वचित् अपृच्छत् रे सारिके ! किं त्वं कदाचित् स्वप्रियं स्मरसि वेति? यतोहि त्वं तस्य (प्रियतमस्य) प्रियाऽसि । विरहेण दुःखेन वा पशुपक्षिभिस्सह वार्तालापं स्वाभाविकं भवति। यक्षेन पोषितसारिका मधुरवचनास्ति। तस्याः वाणी एव सङ्गीतरूपा भवति । उक्तं यथा –

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ।।28

पक्षिणां शोकगीतम्

मानवानामिव पशुपक्षिणोऽपि विवेकशालिनः भवन्ति।स्वस्य निजस्वामिनः वा दुःखेन ते पीडामनुभवन्ति। एकदा उपवने भ्रमन्त्याः इन्दुमत्याः दिवंगमने तस्याः अजस्य च समीपे विद्यमानाः सर्वेऽपि लोकाः अक्रन्दन् । तेषां करुणक्रन्दनं श्रुत्वा तेन पीडिताश्च पक्षिणः दुःखमनुभवन्तः रोदनमकुर्वन् । अनेन तेषां पक्षिणामपि परस्परं भावः अभिव्यज्यते। उक्तं हि-

उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखाः इव तत्र चुक्रुशुः ।।29

उपसंहारः

एवञ्च महाकवेर्कालिदासस्य नैकेषु काव्येषु पशुपक्षिणां नादः, स्वनः, गीतञ्च परिलक्ष्यते। यदि सूक्ष्मातिसूक्ष्मं विचारयामस्तर्हि स च महाकविः न केवलं साहित्यिकः नैयायिकः, मीमांसकः, दार्शनिको वा अभूत् , अपि तु सङ्गीतशास्त्रेऽपि महाकवेर्कालिदासस्य गूढरूपेण ज्ञानमासीत् । सः महाकविः सङ्गीतविद्यायामपि निपुणः अभूदिति विषयः शोधपत्रेऽस्मिन् प्रमाणीकृतः ।सङ्गीतशास्त्रज्ञरूपेण कालिदासस्य स्थानं संस्कृतवाङ्मये सर्वोपरि भवितुमर्हतीतिकथने नातिशयोक्तिः। इति शम् ।।

शब्दसङ्केताः

मेघ.- मेघदूतम्
ना.शा – नाट्यशास्त्रम्
सङ्गीत. – सङ्गीतदर्पणः
सङ्गीत.रत्ना – सङ्गीतरत्नाकरः
नीति.श – नीतिशतकम्
कुमार. – कुमारसम्भवम्
मालविका. - मालविकाग्निमित्रम्
विक्रम. – विक्रमोर्वशीयम्
रघु. - रघुवंशम्
नैषध. – नैषधीयचरितम्
ऋतु. – ऋतुसंहारम्
सङ्गीत. - सङ्गीतदर्पणः

पादटीप्पणीः

1. मेघ. – 1.60
2. ना.शा –1.11
3. ना.शा – 1.50
4. सङ्गीत. –170-171
5. सङ्गीत.रत्ना – 1.21
15. रघु. – 1.39 (मल्लिनाथटीकायाम्)
16. रघु. 13.27
17. मेघ. 2.3
18. विक्रमो. 4.8
19. मालविका. 1.21

6. नीति.श – श्लोकः -12
7. नैधष- 1.102
8. कुमार.-14.47
9. ऋतु.- 2.19
10. कुमार.14.33
11. रघु.15.37
12. कुमार. – 1.46
13. रघु.1.39 (मल्लिनाथटीकायां पृ - 16)
14. रघु.- 1.39
20. कुमार. – 14.35
21. ऋतु. – 6.16
22. ऋतु. – 6.38
23. ऋतु. 6.23
24. ऋतु. - 3.8-9
25. ऋतु. – 3.8-16
26. ऋतु. – 2.3
27. रघु. 5.74
28. मेघ. – 2.24
29. रघु. – 8.39

कालिदाससाहित्ये सङ्गीतसम्बन्धपारिषाङ्किकशब्दनां सूची

सङ्गीतम्	प्रबोधनगीतम्
गायनम्	मङ्गलतूर्यः
वादनम्	नादः
वीणा	रागः
तूर्यः	आलापः
त्रिपुष्करमृदङ्गः	घण्टा
स्वरः	तालः
घनवाद्यम्	लयः

सहायकग्रन्थसूची

1. अमरकोषः.अमरसिंहः. निर्णयसागर प्रकाशन,बम्बइ.1969
2. नाट्यशास्त्रम्.भरतमुनिः.(सम्पा)प्रो.बाहुलाल शुक्ल शास्त्री.चैखम्बा संस्कृत सीरिज् आफिस्.वारणासी.1972
3. नैषधीयचरतम्.श्रीहर्षः.(सम्पा)प.हरगोविन्दशास्त्री.चौखम्बा संस्कृत सीरिज् आफिस्.वारणासी.1954

4. नीतिशतकम्.भर्तृहरिः.चौखम्बा सुरभारती प्रकाशन.वारणासी.1982
5. ऋतुसंहारः.कालिदासः.(सम्पा) प्रो.रेवाप्रसाद द्विवेदी.काशी हिन्दु विश्वविद्यालय.वारणासी.1976
6. कुमारसम्भवम्.कालिदासः. (सम्पा)डा.गौतम वाडीलाल पटेल्.अहमदावाद.गुजराट.
7. मालविकाग्निमित्रम्.कालिदासः.(व्याख्या) अप्पाशास्त्री राशिवडेकर्.लक्ष्मीवेङ्कटेश प्रेस्.बम्बइ.1959
8. मेघदूतम्.कालिदासः.(सम्पा)एम्.आर् काले.मोतीलाल बनारसी दास.दिल्ली.1974
9. कालिदास ग्रन्थावली . (सम्पा) सीताराम चतुर्वेदी.अखिल भारतीय विक्रम परिषद्.काशी . 2007
10. रघुवंशम्.कालिदासः (सम्पा) गोपाल रघुनाथ नन्दार्गीकर.मोतीलाल बनारसी दास.दिल्ली.1982
11. विक्रमोर्वशीयम्. कालिदास.(सम्पा) सी.आर्.देवधर्.मोतीलाल बनारसी दास.वारणासी.1982
12. सङ्गीतदर्पणः.दामोदरपण्डितः(सम्पा)पं विश्वम्भर नाथ भट्ट. सङ्गीतकार्यालय.हाथरस.1950
13. सङ्गीतरत्नाकरः शाङ्र्गदेवः(प्रथमो भागः) (सम्पा) पं. एस्. सुब्रह्मण्यम शास्त्री.अड्यार लाइब्रेरी.1943
14. सङ्गीतरत्नाकरः शाङ्र्गदेवः(द्वितीयो भागः) (सम्पा) पं. एस्. सुब्रह्मण्यम शास्त्री.अड्यार लाइब्रेरी.1944
15. कालिदास साहित्य एवं पशु पक्षि सङ्गीत.डा.सुषमा कुलश्रेष्ठः.ईस्टर्न बुक् लिंकर्स.दिल्ली.1990

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

आचार्य-उव्वटस्य वैदिकभाष्यपद्धतिः

डॉ. शत्रुघ्नपाणिग्राही[१]

शैक्षणिकजगति आलोचनाया: बहव: पक्षा: प्रसिद्धा: सन्ति, येष्वावश्यकतानुसारं मुख्यरूपेणाधोलिखिता: विषया: अन्विता: दृश्यन्ते – ग्रन्थ:, ग्रन्थप्रतिपाद्यविषय:, ग्रन्थकारस्यैतिह्यं, ग्रन्थकारस्य भावनाधिगन्तुं विशेषवाक्यपदप्रकरणादीनां विश्लेषणं, शास्त्रतत्त्वानुसारं ग्रन्थस्य परीक्षणं, तत्त्वचिन्तनं, ग्रन्थविशेषस्य प्रवृत्तिनिमित्तकञ्चेत्यादि। अत: वैदिकभाष्यकर्मणि तत्त्वानीमानि आलोचनीयानि दृश्यन्ते। परन्तु भाषाविशेषगौरवकारणात्तथा न दृश्यन्ते यथा वर्गीकृतानि आधुनिकसाहित्यसमीक्षणविश्लेषणपरिशीलनसन्दर्भेषु नियतानि दृश्यन्ते। एवञ्चात्रैतदप्यस्ति विवेचनायां यदनुसंधानविधौ, साहित्यक्षेत्रे या प्रक्रिया सामान्यरूपेण, विशेषरूपेण वाश्रीयते सैव प्रक्रियाऽस्माकं वैदिकभाष्यकर्तृभि: वैदिकमन्त्राणां भाष्यकरणेप्याश्रीयते। अर्थात् भाष्यमपि वेदार्थस्य विशदीकरणं भवति यत्र नैके नूतना: विषया: भाष्यकर्तु: प्रज्ञया, व्युत्पत्तिकुशलतया विशेषप्रतिभया च प्रासङ्गिकरूपेणोद्घाटिता: जायन्ते। अत्रैतदुल्लेखनीयमस्ति यत् विविधपदयोजनामवलोक्य वैदिकमन्त्राणां भाष्यकार: कश्चित् भाष्यकर्मसहायकीभूतै: साहित्यै: सह मन्त्रगतं सङ्केतविशेषमुपगृह्य तथैवोद्घाटयति विदुषां समक्षं यथाद्य विशेषानुसंधानप्रक्रियामार्गमनुसृत्याधुनिका: शोधार्थिन: प्रतिपादयन्ति शोधकर्मणि। अनेन प्रकारेणैतदवगम्यते यत् उव्वटस्य वैदिकव्याख्यापद्धतिः अस्त्येका आविष्कारविशिष्टा वैदिकसाहित्यक्षेत्रे यस्याः प्रणयनं चकार उव्वटः सर्वाणि वेदाङ्गानि सम्यगधीत्य परिशील्य च। तन्माध्यमेन काञ्चन वेदव्याख्याधर्मान् स निर्धारयामास। यद्यपि व्याख्याधर्मा: शास्त्रेषु शास्त्रान्तरेषु च परिदृश्यन्ते तथापि तेन महानुभावेन स्वविवेचनकौशल्यैः सर्वं क्रमिकरूपेणात्र स्वभाष्ये यज्ञपरकोऽर्थः कृतः। तेषु केचन बिन्दवः उपस्थाप्यतेऽत्र।

व्युत्पत्तिनिरुक्तिप्रक्रिया-

[१] वेदविभागस्य उपाचार्यः, श्री सोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्, गुजरात।, Mail Id- panigrahisatrughna@gmail.com, Mob. 8000124893/ 8200472414

शुक्लयजुर्वेदस्य माध्यन्दिनसंहितायाः भाष्यकरणे उव्वटः प्रमुखतया व्याकरणवेदाङ्गमाश्रित्य यावच्छक्यं वैदिकपदानां निरुक्तिं व्युत्पत्तिञ्च करोति। व्याकरणाधारितव्युत्पत्तिमूलानिरुक्तिः प्रधानतया विद्यते उव्वटाचार्यस्य वैदिकमन्त्राणां व्याख्यानप्रसङ्गे। तेन स्मर्यन्ते सदा निरुक्तनियमाः। येषु निर्वचननियमेषु केचन नियमाः प्रतिपादिताः आचार्ययास्केन, यथा – **'तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्, संविज्ञातानि तानि** [२]' यथा – 'आप्यायध्वम्' इत्यत्र 'ओप्यायी वृद्धौ' णिचो लोपः इति उव्वटः, समन्ताद्वर्धयध्वम् ओप्यायी वृद्धौ[३] इति महीधरः। अतः व्याकरणवेदाङ्गस्य प्रधानोपकारितां वेदं प्रत्यनुभूय सर्वप्रथमं व्याकरणमेवाश्रयते उव्वटः वैदिकमन्त्राणां व्याख्यानाय। पुनश्च प्रायतः आचर्ययास्कस्य निर्वचनसिद्धान्तस्य शतपथब्राह्मणस्य वा प्रभावः तस्य भाष्यस्योपरि दृश्यते। यथा – त्वष्टा तक्षतेः करोत्यर्थस्य।[४] मातर्यन्तरिक्षे श्वसितीति मातरिश्वा वायुः[५]। अग्रे प्रथमं सोमस्य भक्षयन्तीति अग्रेपुवः[६] इति।

आकाङ्क्षा, योग्यता, सन्निधिश्च –

व्याकरणव्युत्पत्त्याश्रया एवैतेषाम् आकाङ्क्षा, योग्यता, सन्निधिरिति त्रयाणां व्याख्योपकारिणां तत्त्वानाम् उपयोगितां मत्वा उव्वटः स्वकीयव्याख्याधर्मे स्थानं निर्धारयति। यथा कथयति सः - साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थ इति। तद्यथा गौरित्युक्ते किमित्याकाङ्क्षा भवति ततो गच्छतीत्युक्ते निराकाङ्क्षो भवति। अग्रे भावमिममधिकं स्पष्टयन् ब्रूते - **अथेदानीं गौर्गच्छतीत्युक्ते यत्र गौरवाहदोहादिभ्यो व्यावृत्य गमने अवतिष्ठते। गमनं चान्यगन्तृभ्यो व्यावृत्य गव्येवावतिष्ठते अयं वाक्यार्थः। स एव प्रकरणाविरोधी वाक्यार्थः पदार्थनियमे हेतुः। पदन्तु पदार्थपरिज्ञानहेतुः। अयं पदार्थवाक्यार्थयोर्विशेषः**[७] । अतः तस्यानुसारं शास्त्रीयदृष्ट्या च वैदिकमन्त्रव्याख्यायां न केवलं व्याकरणात्मिका व्युत्पत्तिरेव निरुक्तिश्चैव वा निरुक्तानुसारमपेक्षिता भवति प्रत्युत आकाङ्क्षादित्रयाणामुक्तानाम् अप्यावश्यकता भवत्येव। आकाङ्क्षादित्रयाणामाश्रये वैदिकमन्त्रव्याख्याने

---

[२] निरुक्तम् – १/४

[३] शुक्लयजुर्वेदः १.१

[४] यजुर्वेद- उव्वटभाष्य-२०/४४

[५] यजुर्वेद- उव्वटभाष्य-१/२

[६] यजुर्वेद- उव्वटभाष्य-१/१२

[७] उव्वटभाष्यारम्भभागः

मन्त्राणां संहिताक्रमस्य विनियोगप्रवृत्तिनिमित्तावगमनाय भाष्यकारस्य सौविध्यमुपजायते। तात्पर्यमिदमस्ति यदस्माकं वैदिकाः ऋषयः लक्ष्यैकचित्ताः भवन्तः यथागतं सम्पूर्णं वैदिकवाङ्मयं तपसा प्राप्नुयुः। तेषां लोकदृष्ट्या अनुवादे लोकप्रयुज्यमानस्य विधेराश्रय अपेक्षितः। उदाहरणं यथा – **"इषे त्वा"**[८] इत्येकोऽस्ति मन्त्रभागः कण्डिकायाः अन्यतमः याज्ञिकसमाख्याप्रमाणत्वात्। अयं खल्वंशो मन्त्रस्य सम्पूर्णकण्डिकायाः विशेषक्रियामभिधत्ते। परन्तु व्यावहारिके पक्षे सम्पूर्णकण्डिकायाः मन्त्रत्वमङ्गीक्रियते जनैः। तत्र एकतिङ्वाक्यम्, **"सुप्तिङन्तं पदम्"**[९] इत्यादिशास्त्रोक्तदिशा तिङं विना वाक्यं निराकाङ्क्षं न तिष्ठति। तत्सर्वमेवाभिप्रेत्योव्वटः स्वभाष्यकरणप्रक्रियायां कथयति व्याख्याधर्मानित्थम्-

"अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत्।
विप्रकृष्टं तु संदध्यात् आनुपूर्वीं च कल्पयेत्।।[१०]
लिङ्गं धातुं विभक्तिञ्च संनमेत्तत्र तत्र च।
यद्यत्स्याच्छान्दसं मन्त्रे तत्तत्कुर्यात्तु लौकिकम्।।"[११] **इति।**

एतेषां वैदिकमन्त्रव्याख्याधर्माणामुदाहरणान्यपि बहूनि प्रस्तुतानि सन्त्युव्वटेन स्वभाष्ये। तेषां भाष्याणामध्ययनेन दिग्दर्शनं मिलति तस्य व्याख्यापद्धतेः। उपर्युक्तविवेचनादेतदवगम्यते सारल्येन यद्वैदिकी भाषा एकार्षी भाषास्ति यतः प्रसूतास्ति लौकिकी संस्कृतभाषा। अर्थात् आर्षीभाषा लोकभाषायाः स्वरूपग्रहणाय लौकिकसंस्कृतरूपं जग्राह यथा उपर्युक्तान्यपि पद्यानि ध्वनयन्ति। तस्मिन् लौकिकरूपे वैदिकलकारेषु लिङ्गेषु वचनादिष्वपि परिवर्तनं बहुविधं जातं यस्य समर्थनं विधत्ते आचार्यपाणिनिः। अत एवास्य वैदिकी प्रक्रिया पृथक् रूपेणावलोक्यते। तस्मादेव कारणात् सर्वलकारापवादरूपो लेट्लकारः वेदे एव प्रसिद्धो जातः। अनेनैतदपि संसूच्यते यत् लौकिकसंस्कृतं परित्यज्य वैदिकप्रयोगो जनैः लोके स्वकीयदौर्बल्यकारणात् न प्रयोक्तुं शक्यः अस्तीति, तथाकरणे वैदिकमर्यादा हन्त्येव। अस्मादपि कारणात् भाष्यकाराः वेदस्य लेट्विहीनभाष्यकरणे प्रवर्तन्ते। अत उव्वटोऽपि वेदस्य सर्वं विदित्वा स्वभाष्यकरणे प्रवृतो दृश्यते ।

विनियोग-ऋषि-छन्दो-देवतादिज्ञानम्-

[८] शुक्लयजुर्वेदः -१.१

[९] अष्टाध्यायी -१.४.१४

[१०] बृहद्देवता- २.१००

[११] तत्रैव -२.१०१

मन्त्रार्थज्ञानाय विनियोग-ऋषि-छन्दो-देवता-स्वरादिज्ञानमपेक्षितं भवति। अतः तस्य भाष्ये विनियोगस्यापि निदर्शनं भवति वैदिकव्याख्यानुसंधाने। मुख्यरूपेण तस्य भाष्ये याज्ञिकपद्धतिरेव अङ्गीकृता वर्तते। तस्य यजुर्वेदस्य समग्रमन्त्राः वैदिकयागेषु, पार्वणादि-पाकयागेषु कात्यायनीयश्रौतसूत्रानुसारं विनियुज्य, याज्ञिकपद्धत्यनुसारं विलिख्य समाहिताः प्रतिपादिताश्च। अतः एतेष्वर्थेषु कर्मकाण्डगतमन्त्राणां विनियोगज्ञानमावश्यकम्। उदाहरणरूपेण- 'सुनृतानां चोदयित्री सरस्वती'[१२]इति मन्त्रांशस्य 'त्रयीलक्षणस्य वाग्विभवस्य चोदयित्री' इति कर्मकाण्डपद्धतिं समवलोक्य व्याख्या क्रियते।

वैदिकव्याख्याधर्मप्रवृत्तौ वैदिकसाहित्यसन्दर्भः छन्दसा कियदस्ति प्रयोजनम्, तदन्यया प्रवृत्तौ कः प्रत्यवायः भवति जनानाम् इति यद्यपि स्पष्टतया अथवा सामान्यबुद्ध्या नाधिगन्तुं शक्यते परन्तु तत्र मार्गनिर्देशमवाप्येतत्प्रतीयते। काचिच्छक्तिः छन्दसा वैदिकमन्त्रपाठकरणे वैदिकभाष्यकरणे च वेदभाष्यकर्तरि वेदपाठकर्तरि च जनयति। छन्दसा सम्यग्ज्ञानं न केवलमपूर्वायैव भवति अपितु प्रत्युच्छ्रवणसुभगतया सह छन्दोबद्धऋगादीनामाध्यात्मिकोऽपि विशेषः कार्यो भवत्येव। यथा चोर्जा अनुभूयते संगीतश्रवणकाले तद्वत्स्वरमूलकतया छन्दो ज्ञानेन। अस्मादेवकारणात् प्रायशः व्याख्याकारेण छन्दसा विवरणमपि प्रस्तूयते वैदिकभाष्यकरणकाले। जैमिनिन्यायमालाविस्तरेऽप्यस्य वैशिष्ट्यस्य सङ्केतोधिगम्यते। स्वाध्यायविधेः परिशीलनप्रसङ्गे प्रभाकरमतविवेचनं वर्त्तते। तच्च कदापि गुरुमुखोच्चारणानुच्चारणं विना शिष्यस्याध्ययनं न सिध्यति, तत्रैवाविच्छिन्नपरम्परागतध्वनेः संस्कारप्रभावो भवति, तथा च पूर्वस्मिन् काले खलु तत्तद्दृष्टिसमुच्चारितशक्तिर्विद्यमाना भवति या जनयति दैवी संस्कारश्चाप्याधुनिकपाठकव्याख्यासृजनेष्वपि। यस्मात्कारणादियमपि श्रुतिः सारज्ञानां समाजप्रतिष्ठां दर्शयति। छन्दोबद्धः सः तत्कारणादेव काचिदलौकिकीशक्ति प्रवहन्त्यनुभूयते। एतदत्रावधेयमस्ति यद् बाह्या सा धारा लोकेषु सात्त्विकभावमुत्पादयति तथा चान्यैका आभ्यन्तरीयधारा छन्दसः स्पन्दनात्मिका, अलौकिकी धारा भवति या वेदपाठिनः वेदव्याख्याकर्तारञ्च परिशोध्य स्वर्गसुखं तस्मै प्रयच्छति इति। सर्वं रहस्यं विलिख्यास्माकं शास्त्राचार्याः छन्दःशास्त्रस्योपयोगं वेदव्याख्यानायोपदिशन्ति। छन्दः पादौ तु वेदस्यैतदेव स्वारस्यात् स्फुटीभवति यत् तस्य पूर्वोक्तस्पन्दनम्परे भवतः। अतः वैदिकमन्त्रोच्चारणकाले वेदभाष्यकरणे उदात्तानुदात्तस्वरितानुसारं छन्दसामपि काचित्प्रवृत्तिर्भवति। यस्याः महत्त्वम् ऋषिभिरनुभूतमासीत्। अत एव उव्वटादयो भाष्यकाराः तत्सर्वं हृदये निधाय वेदभाष्यकरणे प्रवृत्ता दृश्यन्ते। तथैवैतद्वयं

---

[१२] यजुर्वेदः – २०/८५

सम्यक्तया विद्मो यत् याज्ञिकस्य रूपमाध्यमेनैवात्मनो वैज्ञानिकस्य रूपमस्माकं समक्षमुपस्थापयन्तीत्यत्र च पुनः वैदिकदेवतत्त्वस्य प्रामुख्येनास्माच्चितिरोहितमिवास्ति। अत एव निर्वचनप्रियो यास्कः अपि स्वकीयनिरुक्ते पृथक् रूपेण दैवतकाण्डमाविर्भावयति वेदभाष्यकरणप्रबन्धनप्रयोजनकारणात्। तथैवाचार्यशौनकः अपि वैदिकमन्त्रार्थज्ञानाय देवताबोधमावश्यकं मनुते। उक्तं यथा

वेदितव्यं दैवतं हि मन्त्रे मन्त्रे प्रयत्नतः।
दैवतज्ञो हि मन्त्राणां तदर्थमवगच्छति ॥

तद्धितांस्तदभिप्रायान् ऋषीणां मन्त्रदृष्टिषु।
विज्ञापयति विज्ञानं कर्माणि विविधानि च ॥[१३]

अर्थात् वैदिकव्याख्यानावसरे यथा छन्दसामावश्यकता भवति तथैव देवतानामपि स्वरूपज्ञानस्यावश्यकता भवति। अनेन प्रकारेण देवताविषयज्ञानं तत्संबद्धानि कर्माणि ज्ञातानि यदा भविष्यन्ति तदा मन्त्रार्थकरणे सौविध्यं भविष्यति। अत एव सर्वत्रैव देवताविवेचनपुरस्सरमेवार्थविवेचनं विधीयते सर्वैः प्राचीनैराचार्यैः। अतः प्रायशः अयं विषय वैदिकविचारकाणां कृते भवतु नाम गौणस्तथापि तत्र उव्वटादिभाष्यावलोकनेन न केवलं भाष्यकरणप्रक्रियैव जाता भवति प्रत्युत आधुनिकानां वेदव्याख्याकर्तृणां कृते अपि विचारणीयोऽयं विषयो भवति सर्वदा।

अध्यात्मपरकोऽर्थः –

उव्वटाचार्येण स्वकीयभाष्ये अध्यात्मपरकोऽर्थोऽपि प्रदर्शितः। सृष्ट्याः समुत्पादने यज्ञस्य कल्पना कीदृशी जागरुका क्रियाशीला चासीत् तस्य अध्यात्मपरकभाष्यपरिचयः शुक्लयजुर्वेदस्य एकत्रिंशत्तमेऽध्याये पुरुषसूक्तस्य भाष्यावसरे द्रष्टुं शक्यते। तस्य भाष्यानुसारं पुरुषसूक्तस्य मोक्षे विनियोगोऽस्ति। नारायणाख्यः पुरुषविशेषः हृदयस्थाने तिष्ठति। एष यज्ञोऽस्ति प्राणायामेन दीपित आत्मयज्ञः। साध्या ऋषयः एतेनैव प्राणवाय्वधिष्ठितेन पुरुषेणात्मयज्ञं कृतवन्तः। अपि च सर्वमेधयागप्रसङ्गमन्त्राणां विषये प्रतिपादयति- 'आसां च कण्डिकानां ब्रह्मयज्ञेऽध्ययनं कर्तव्यं प्रतीकग्रहणत्वात्'[१४] इति। ईशावस्योपनिषदः प्रस्तावनायां कथयति – 'समाप्तं कर्मकाण्डमिदानीं

---

[१३] शौनकीयबृहद्देवता -१/२-३

[१४] यजुर्वेदभाष्य- ३२/३

ज्ञानकाण्डं प्रस्तूयते'। शुक्लयजुर्वेदस्य षोडशाध्यायस्य रुद्रमन्त्राणां भाष्यकरणे आचार्यशङ्करस्य प्रभावो दरीदृश्यते, यथा- 'जाता जातिविशेषाः त इहोच्यन्ते रुद्राद्वैतप्रतिपादनाय'[१५] इति।

पौराणिककल्पनायाः प्रभावः-

उव्वटाचार्यस्य भाष्येषु पौराणिकसङ्केतोऽपि मिलति। स यजुर्वेदस्य षोडशाध्यायस्य मन्त्रेषु कपर्दी, पिनाकी, नीलग्रीवः, पशुपतिः, चेत्यादिशब्दानां रुद्रविशेषणपरकाणां पौराणिकरुद्रदेवतानाम् अर्थं विचार्य गृहीतवान्।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् उव्वटभाष्ये याज्ञिकपद्धतिरेव अङ्गीकृता वर्तते। पुनश्च मध्ये मध्ये वैदिकमन्त्राणामाध्यात्मिकं दार्शनिकभाष्यञ्च च दृश्यते। तत्र सर्वत्रैवैषो विधिराश्रीयते पूर्णतया। अयं महानुभावः मन्त्राणां विनियोगं हृदये निधाय वैदिकभाष्यकरणे प्रवृत्तो दृश्यते। एतदतिरिच्य वैदिकस्वरमीमासापि भवत्याधारशिला वेदभाष्यकरणाय। एतत्सर्वं भाष्यकरणोपक्रमभागम् एवोपदिशत्युव्वटः स्वकीये शुक्लयजुर्वेदमन्त्रभाष्यकरणे। तदनुसृत्यान्येपि सायणप्रभृतिभाष्यकाराः प्रवृत्ताः दृश्यन्ते स्व-स्ववेदभाष्यकरणे इति शम्।

अनुशीलितग्रन्थसूची

१. बृहद्देवता – श्रीराम कुमार राय, चौखम्बा संस्कृत संस्थान, वाराणसी,२०१०।

२. वेदव्याख्यापद्धतयः – डॉ. शशि तिवारी, प्रतिभा प्रकाशन, दिल्ली,२०१४।

३. केचन वेदभाष्यकाराः धर्ममनीषिणश्च – नवजीवन पब्लिकेशन, जयपुर,२०१७।

४. शुक्लयजुर्वेद संहिता- उवट्ट-महीधरभाष्यसंवलित तत्वबोधिनि हिन्दीव्याख्योपेता, संकलक: पणशीकरोपाह्वो वासुदेवशर्मा, चौखम्बा विद्याभवन, वाराणसी , १९९२

५. शतपथब्राह्मणम् , डॉ. अल्बेर्तेन वेबेरेण शोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

६. ऋग्वेदसंहिता- श्रीमत्सायणाचार्यविरचितभाष्यसमेता,वैदिकसंशोधनमण्डल, पुने,१९०५

७. निरुक्तम् – छज्जुराम शास्त्री, मेहरचन्द्र लछमनदास पब्लिकेशन्स,नईदिल्ली,१९९३

८. ऋग्वेद के भाष्यकार और उनकी मन्त्रार्थदृष्टि।

[१५] यजुर्वेदभाष्य -१६/२४

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

शास्त्रे सतां लक्षणम्

डॉ. पङ्कजकुमार एस. रावलः[१]

प्रस्तावना

क्वचिच्छिष्टाः क्वचिद्भ्रष्टाः क्वचिद्भूतपिशाचवत्।
नानारूपधरा योगी विचरन्ति महीतले॥

सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥

भारतीयसनातनसंस्कृतेः प्राणतत्त्वभूताः सन्तः समग्रेऽस्मिन् विश्वे पूज्याः मान्याः सेव्याश्च सन्ति। शास्त्रेषु बहुधा सतां महिमा वर्णितः वर्तते। सद्गुणानाम् आकरः परोपकारपरायणः धर्मकर्मसु प्रवृत्तः सतां स्वभावः सर्वदा विविधेभ्यः जनेभ्यः सन्तं भिन्नं करोति। भारतीयाध्यात्मिकपरम्परायाम् एकमपि शास्त्रं तादृशं नास्ति यत्र सतां माहात्म्यं न वर्णितं स्यात्। सन्तः गुणालयाः भवन्ति यथा एकमपि शास्त्रं विना सन्तः पूर्णाः न भवन्ति तद्वत् नैकोऽपि सद्गुणः विना सन्तं गुणत्वमाधत्ते।

बृहन्नारदीयपुराणे सत्सु भगवति च महापुरुषैः शास्त्रकारैः न भेदः कृतः। सर्वभूतहिते रतः, द्वेषरहितः, जितेन्द्रियः, शान्तः, मनसा वचसा शरीरेण च नान्यं पीडयति, सेवापरायणः, निन्दारहितः, गुणग्राही, प्राणिषु आत्मबुद्धिः, समदर्शी, सत्यवादी, गोब्राह्मणप्रतिपालः, तीर्थसेवी, प्रसन्नः, उदारः, आदर्शश्रोता, आनन्दितः, अतिथिसत्कृतः, भगवत्सु अभेदबुद्धिः, शिखासूत्रधारी, व्रतपरायणः एतादृशः उत्तमः सत्पुरुषः भगवते रोचतेऽति स्वयं देवर्षिनारदः नारदपुराणे वर्णयति। शास्त्रेषु महात्मा, सन्तः, महापुरुषः, ब्रह्मवादी, लोकोत्तरः, परोपकारी, धर्मात्मा, धार्मिकः, नैतिकः, जीवन्मुक्तः, साधुः, भक्तः, सत्पुरुषः, ऋषिः, मुनिः, महर्षिः इत्थं नैके शब्दाः सज्जनवाच्याः महापुरुषसंज्ञकाः सतां लक्षणभूताः स्थाने स्थाने देशे देशे काले काले प्रयुक्ताश्च सन्ति।

ज्यौतिषशास्त्रदृष्ट्या सतां लक्षणानि (साधुयोगः/सन्तयोगः)

---

[१] प्राध्यापकः, पुराणेतिहासः, श्री सोमनाथसंस्कृतविश्वविद्यालयसञ्चालितः, संस्कृतमहाविद्यालयः, वेरावलम्, गीरसोमनाथः, गुजरातम्-३६२२६६, दूरभाषः -९८७९३२९८९८

कदाचित् प्रश्नः भवति सन्तः जन्मना भवन्ति वा परिस्थित्यनुकूलं व्यावहारिकं जगत् सतां निर्माणं करोति? तर्हि अत्र ज्यौतिषशास्त्रं साहाय्यं करोति यथा-

नवमे पञ्चमे वापि सौष्ठ्यादिगुणभाक्तनौ।
जीवन्मुक्तस्तदा मर्त्यो जायते धरणीतले॥ (मानसागरी)

महापुरुषाणां जन्मकुण्डल्यां ग्रहगतिः विशिष्टा भवति। नवमे पञ्चमे जन्मलग्ने च शुभग्रहाणां दृष्टिः स्वगृहे उच्चस्थाने च सौम्यग्रहाणां स्थितिर्यदा भवति तदा स सत्पुरुषः भवति जीवन्मुक्तो वा निगद्यते।

धने धर्मे सुते लग्ने दशमेऽपि शुभग्रहाः।
बलाढ्याश्चेत्तदा साधुयोगोऽयं सम्प्रकीर्तितः॥(मानसागरी)

जन्मकुण्डल्यां द्वितीये नवमे पञ्चमे जन्मलग्ने दशमे वा कस्मिँश्चिदेकस्मिन् स्थाने शुभग्रहः भवति चेत् स साधुः भवत्येव।

श्रीमद्भागवतमहापुराणालोके सतां लक्षणम्

यस्य पवित्रं चरित्रं लक्ष्यभूतं भवति ध्येयपूर्णं भवति आचरणीयं भवति तल्लक्षणं तेन लक्षणेन च विभूषितः सत् श्रीमद्भागवतमहापुराणे बहुधा वर्णितः वर्तते-

"कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः।
अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥" (श्रीमद्भा.-११/११/२९-३१)

"तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्।
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥
मदाश्रयाः कथामृष्टाः शृण्वन्ति कथयन्ति च।
तपन्ति विविधास्तापा नैतान् मद्गतचेतसः॥

त एते साधवः साध्वि सर्वसङ्गविवर्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥" (श्रीमद्भा.- ३/२५/२१-२४)

"सर्वभूतेषु यः पश्येत् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥" (श्रीमद्भा.११/२/४५)

"विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः।
प्रणयरशनया धृदताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः॥" (श्रीमद्भा.११/२/५५)

सत्पुरुषः भगवद्भक्तः भवति। यः भक्तः अस्ति स च भगवतः प्रियोऽस्ति तदर्थं श्रीमद्भवगद्गीतायां **"यो मद्भक्तः स मे प्रियः"** इति स्वयं भगवता उद्घोषितं वर्तते। यथा भगवान् गुणातीतः अस्ति तद्वत् भागवतोत्तमः भगवद्भक्तः **'गुणातीतः स उच्यते'।** यत्र सन्तत्वं प्रकटितं भवति स च भगवत्कृपया **'क्षिप्रं भवति धर्मात्मा'।**

यस्मिन् 'इदं न मम' अयं भावः दृढः स्थिरश्च वर्तते स च सत्पुरुषोऽस्ति। सताम् एकं लक्षणम् अनवरततया दृश्यते स च सत्सङ्गपरायणः भवति।

"स मृग्यः श्रेयसां हेतुः पन्थाः सन्तापवर्जितः।
अनवाप्तश्रमं पूर्वे येन सन्तः प्रतस्थिरे॥"

मम श्रेयः कुत्र निहितं तदन्वेषणे सदा सर्वदा यः प्रवृत्तो भवति प्राकृतिकान् नियमान् सर्वदैवानुसरति भाषावस्त्राहारव्यवहारभेदैः यः सर्वदा मुक्तः भवति स च सत्पुरुषोऽस्ति। जागृतावस्थायां

"अणुभ्यश्च बृहद्भ्यश्च शास्त्रेभ्यः कुशलो नरः।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः॥" (श्रीमद्भागवत.-४//)

सत्सु अपरिग्रहवृत्तिः भवति किन्तु गुणग्रहणे सतां लक्षणं माधुकरी भवति यथा षट्पदः सारं सारं गृह्णाति तद्वत् अयमपि गुणग्राही भवति। **"सन्तः स्वयं परहिते विहिताभियोगाः" (राजर्षिः भर्तृहरिः)।** सतां स्वभावः सर्वदैव परहिते संलग्नः भवति। भगवतः अनन्तरं परमार्थः शब्दः यदि कुत्रचित् विलसति चेत् सत्सु विलसति।सत् इति शब्दे अस् धातोः शतृप्रत्ययान्तरूपं भवति। ईश्वरस्य सत्तायां ईश्वरस्य व्यवस्थायां वेदादिशास्त्रेषु जन्मपुनर्जन्मविचारे स्वस्मिन् च यस्य स्थिरा बुद्धिर्भवति एवञ्च वर्तमानकाले एव जीवति स च सत् अस्ति।**"सर्वदा विद्यमानं प्रलयेऽपि नाशाभावात्"।**

श्रीमद्भगवद्गीतायां सतां लक्षणम्

"ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥
तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥" (भगवद्गीता १७/२३-२८)

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः॥ (भगवद्गीता ७/१९)

"तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः,
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान्।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान् गुणान्,
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां लक्षणम्॥" (नीतिशतकम्)

सांसारिकैः सतां स्वभावः ज्ञातुं न शक्यते अत एव-**"वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।"** (उत्तररामचरिते भवभूतिः) महापुरुषाणां स्वभावः भगवन्तं शङ्करमिव विषामृतयुतो भवति।**"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः। शिरसा धरते पूर्वं परं कण्ठे नियच्छति॥"** यथा भगवतः शङ्करस्य कण्ठे विषं मस्तके चन्द्रमसः अमृतं तिष्ठति तद्वत् महापुराषाणां जीवने अपि गुणदोषौ सहैव तिष्ठतः अपितु ते चिन्तां चिन्तनं च गुणानामेव कुर्वन्ति-**"मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभुवनमुपकारः श्रेणिभिः प्रीणयन्ति। परगुणपरमाणुं पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥" (नीतिशतकम्)** महानुभावानां स्वभावः स्वान् गुणान् ख्यापयति परगुणकथने उदारचरिताः भवन्ति निजगुणकथने दरिद्राः भवन्ति। महापुरुषाणां सतां स्वभावः भवति-**"आत्मनः प्रतिकूलानि परेषां न समाचरेत्" (महाभारते आदिपर्वणि)** इति। सामान्यपुरुषेण सह महापुरुषाणां स्वभावः सहजो भवति। महापुरुषाणां दृष्ट्या न कश्चित् धनी न

कश्चिद्दरिद्रः, न कश्चित् कुलीनः न कश्चित् निष्कुलीनः, न कश्चिदुत्तमः न कश्चिदधमः। सतां लक्षणाय एव भक्तप्रवरः नरसिंहमहेतागीतायां वैष्णवशब्देन सताम् अष्टादशलक्षणानि प्रतिपादयति गीतं सुप्रसिद्धमेवास्ति-

"वैष्णवजन तो तेने रे कहीए जे पीड पराई जाणे रे,
परदुःखे उपकार करे तोये मन अभिमान न आणे रे."

सत्सु वैराग्यः स्वतः सिद्धो भवति। सारल्यं तेषामाचरणे दरीदृश्यते। भगवतः शङ्करस्य समुपासकाः भवन्तीति कृत्वा करुणा अपि तेषां नेत्राभ्यां व्यवहाराच्च वर्षति। महापुरुषाणां स्वभावे एकं लक्षणं तादृशमप्यस्ति- **"मेले में अकेला अकेले में मेला"**। इमे सन्निष्ठाः शास्त्रनिष्ठाश्च भवन्ति। एतेषां जीवनं विलक्षणं एवञ्च समाजोपकारकं राष्ट्रसेवापरायणं च भवति। **"નથી વિદ્વત્તા વાપરી દેશદાઝે, નથી વાપરી પાઈ પરલોક કાજે, નથી કામ કીધા સ્વદેશાભિમાની, વૃથા જન્મ ખોયો કરી શી કમાણી ?"** शास्त्रभक्तिः राष्ट्रभक्तिश्च एतेषु विलसति। सज्जनानामेकं लक्षणं तदप्यस्ति यत् समाजे ते किमपि प्रदातुमेव विचरन्ति न तु ग्रहीतुम्।**सर्वे भवन्तु सुखिनः (गरुडपुराणम्)** इति सांसारिकाणां केवलं वचसि भवति अपितु महापुरुषाणामाचरणे भवति एतदपि सतां लक्षणम्।**धर्मस्य विजयो भूतादधर्मस्य पराभवः। प्राणिनां चैव सद्भावः भूयाद्विश्वस्य मङ्गलम्॥ (आदिशङ्कराचार्याः)** शास्त्रस्य महत्त्वपूर्णानि वचनानि सन्तः जीवन्ति न केवलं वदन्ति यथा-**"अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्॥"(मुद्गलोपनिषद्),यत्र भवति विश्वैकनीडम्, सङ्गच्छध्वं संवदध्वं संवो मनांसि जानताम् (ऋग्वेदः),समानी व आकूतिः समाना हृदयानि वः (ऋग्वेदः),माता भूमिः पुत्रोऽहं पृथिव्याः (अथर्ववेदः), सह नाववतु, सह नौ भुनक्तु (कठोपनिषद्), एक एव न भुञ्जीयात्, परस्परदेवो भव, सत्यं वद, धर्मं चर, अहिंसा परमो धर्मः (तैत्तिरीयोपनिषद्), भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा, स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः (मनुस्मृतिः), आ नो भद्राः क्रतवो यन्तु विश्वतः(शुक्लयजुर्वेदः), भद्रं कर्णेभिः शृणुयाम देवाः(शुक्लयजुर्वेदः), तन्मे मनः शिवसङ्कल्पमस्तु(शुक्लयजुर्वेदः), आत्मदीपो भव, असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय (बृहदारण्यकोपनिषद्), छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे। फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥ (सु.र.भा.), मम सुखं सर्वेषां सुखम्, परस्य दुःखं मम दुःखम्** इति स्वभावेन जीवन्तः रन्तिदेवसदृशाः प्रार्थयन्ति- **"न त्वहं कामये राज्यं न स्वर्गं न पुनर्भवम्। कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्॥"(महाभारतम्)** सतां च एकं अन्यद् लक्षणं गरुडपुराणे प्रोक्तं यथा- **"न प्रहृष्यति सम्माने नापमाने च कुप्यति। न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम्॥"(गरुडपुराणम्)** सन्तः स्वभावेन महान्तः भवन्ति तदर्थं महतां लक्षणं गुर्जरभाषायामुक्तं यथा- **"માન, અમાન અને અપમાન આ ત્રણ જેને સમાન તેનું નામ મહાન."** साधुशब्दस्य अर्थः भवति साध्नोति परकार्यमिति साधुः। भगवद्भक्तः सत्पुरुषः त्रीणि चिह्नानि स्वतः एव दर्शयति तद्यथा-

"नयनं गलदश्रुधारया, वदनं गद्गदरुद्धया गिरा।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति॥"(चैतन्यमहाप्रभुः)

"बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयने नोद्गीर्णबाष्पाम्बुना।
नित्यं त्वच्चरणारविन्दयुगलद्ध्यानामृतास्वादिना-
मस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवनम्॥"

(चैतन्यमहाप्रभुः)

अन्यग्रन्थेषु सतां लक्षणम्

"उदेति सविता रक्तः रक्त एवास्तमेति च।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥" (साहित्यदर्पणः)

"उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते॥" (पञ्चतन्त्रे नीतिशतके च)

"मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम्।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥" (सु.र.भा.)

"तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥" (मनुस्मृतिः)

"एते सत्पुरुषाः परार्थघटकाः स्वर्थान् परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥" (नीतिशतकम्)

"भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्भूरि विलम्बिनो घनाः।
अनुद्धता सत्पुरुषः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्॥" (अभिज्ञानशाकुन्तलम्)

"उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शिततां याति वह्निः।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम्॥" (हितोपदेशः, मित्रलाभः)

"संसारविषवृक्षस्य द्वे एव मधुरे फले।
सुभाषितं च सुस्वादु सद्भिश्च सह सङ्गमः॥" (सु.र.भा.)

"दुर्लभं त्रयमेवैतत् दैवानुग्रहहैतुकम्।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः॥" (विवेकचूडामणिः)

"असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां सङ्गः गङ्गाम्भः शिवपूजनम्॥" (विवेकचूडामणिः)

"पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्।
नाप्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु हिताभियोगाः॥" (नीतिशतकम्)

"चन्दनं शीतलं लोके चन्दनादपि चन्दमाः।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसन्गतिः॥" (सु.र.भा.)

"गङ्गापापं शशीतापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च हन्ति साधुसमागमः॥" (गर्गसंहिता, अश्वमेधखण्डे-६२/९)

"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने॥" (चाणक्यनीतिः)

"लौकिकानां हि साधूनां अर्थो वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥" (उत्तररामचरितम्)

"श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधवः।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः॥ (सु.र.भा.)

"यथास्थितमिदं यस्य व्यवहारवतोऽपि च।
अस्तङ्गतं स्थितं व्योम स जीवन्मुक्त उच्यते॥
नोदेति नास्तमायाति सुखेदुःखे मुखप्रभा।
यथा प्राप्ते स्थितिर्यस्य स जीवन्मुक्त उच्यते॥
यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।
यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥
रागद्वेषभयादीनामनुरूपं चरन्नपि।

योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥
यस्य नाहं कृतो भावो बुद्धिर्यस्य न लिप्यते।
कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते॥
यस्मान्नो द्विजते लोको लोकान्नो द्विजते च यः।
हर्षामर्षभयान्मुक्तः स जीवन्मुक्त उच्यते॥
शान्तसंसारकलनः कलावानपि निष्कलः।
यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते॥
यः समस्तार्थजातेषु व्यवहार्यपि शीतलः।
परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥"

(योगवासिष्ठरामायणम्- श्रीभास्करकण्ठविरचितायां श्रीमोक्षोपायटीकायां उत्पत्तिकरणे ९/४, श्रीवशिष्ठः रामाय उत्तरति)

महापुरुषाणां सतां सङ्गः कीदृशः तत्सन्दर्भे देवर्षिनारदोऽपि स्वभक्तिसूत्रे कथयति- **"महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च।"** पद्मपुराणान्तर्गते भागवतमाहात्म्येऽपि सतां समागमः बहुदुर्लभो दर्शितोऽस्ति।**"भाग्योदयेन बहुजन्मसमर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै। अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः॥"(भागवतमाहात्म्ये- २/७६)** शास्त्रेषु मानवजीवनं प्रायः जलबुद्बुदवत् बहुचञ्चलं दर्शितमस्ति। क्षणभङ्गुरं जीवनमेतत् जीवनेऽस्मिन् सतां दर्शनं सतां सङ्गः, सतां सान्निध्यं च लभते चेद् अनुग्रहोऽयम्।**"नलिनीदलगतजलवत् तरलं तद्वज्जीवनमतिशयचपलम्। क्षणमपि सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका॥"(मोहमुद्गलस्तोत्रम्)** साधुपुरुषाणां सङ्गः संसारसागरं तर्तुं नौका कथितास्ति। श्रीमद्भागवतमहापुराणेऽपि भगवान् कपिलः सतां माहात्म्यं गायति- **"सतां प्रसङ्गान् मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति॥"(भागवतम्- ३/२५/२५)** महापुरुषाणां सङ्गेन अध्यात्मजगति श्रद्धा पुष्टा भवति भगवति रतिर्भवति, सैव रतिः भक्तिर्भवति तया भक्त्या च मुक्तिर्भवति, एतस्य मूलमस्ति महापुरुषाणां सङ्गः।**"जाड्यं धियो हरति सिञ्चति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरोति। चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गतिः कथय किं न करोति पुंसाम्॥"(नीतिशतकम्)** सतां सङ्गस्य किं फलम् ? तत् नृपो भूत्वा राजर्षिभर्तृहरिरपि जानाति तथा च कथयति- **"दूरीकरोति कुमतिं विमलीकरोति चेतश्चिरन्तनमघं चुलुकीकरोति। भूतेषु किं च करुणां बहुलीकरोति सङ्गः सतां किमुन मङ्गलमातनोति॥"(वैराग्यशतकम्)** सतां दर्शनेन कीदृशं मङ्गलं भवति तदत्र वर्णितं वर्तते। स्कन्दपुराणे विष्णुखण्डे भगवान् वेदव्यासोऽपि निगदति यत्- **"हरति हृदयबन्धं कर्मपाशार्दितानां**

वितरति पदमुच्चैरल्पजल्पैकभाजाम्। जननमरणकर्मश्रान्तविश्रान्तिहेतुस्त्रिजगति मनुजानां दुर्लभः साधुसङ्गः॥"(स्कन्दपुराणे विष्णुखण्डे १) जन्ममृत्व्योः चक्रात् सन्तः विमुञ्चन्ति। इदं फलमस्ति साधुसमागमस्य। एकस्य महापुरुषस्य समागमेन किं किं न प्राप्यते अर्थात् सर्वं प्राप्यते यथोक्तम्- **"कल्पद्रुमः कल्पितमेव सूते सा कामधुक्कामितमेव दोग्धी। चिन्तामणिश्चिन्तितमेव दत्ते सतां हि सङ्गः सकलं प्रसूते॥"(हितोपदेशः)** कल्पद्रुमस्य कामधेनोः चिन्तामणेश्च सङ्गतिकरणम् एकस्मिन् स्थाने कुत्रचिद् भवति तत्स्थानं नाम सन्तः। महाभारतस्य शान्तिपर्व अपि अस्मिन् सन्दर्भे कथयति यत्- **"यदि सन्तं सेवति यद्यसन्तं तपस्विनं यदि वा स्तेनमेव। वासो यथा रङ्गवशं प्रयाति तथा स तेषां वशमभ्युपैति॥"(महाभारतम् शान्तिपर्व अध्यायः-२९९)** आचार्योद्भटः कथयति- **"भ्रमादपि तु दुष्टानां सङ्गं यः कुरुते जनः। असमर्थः पुनस्त्यक्तुं तत्रैव विनिहन्यते॥"** एतदेव देवर्षिनारदः एकेन सूत्रेण कथयति- **"दुःसङ्गः सर्वथैव त्याज्यः।" "सद्भिरासीत सततं सद्भिः कुर्वीत सङ्गतिम्। सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥"(गरुडपुराणम् पूर्व-११३)** सद्भिस्सह स्थातव्यं, सताम् आदेशपालनं कर्तव्यं, सद्भिः विवादो न कर्तव्यः, सुहृद्भावः सत्सु च स्थापनीयः। सतां सज्जनानां साधूनाम् अवस्थाप्राप्तिः एकवारं भवति पश्चात् तेषां रक्षणाय स्वयं भगवान् पुराणपुरुषोत्तमः बद्धपरिकरः भवति अतएव गीतायां सः कथयति-**परित्राणाय साधूनां..... सम्भवामि युगे युगे॥(श्रीमद्भगवद्गीता- ४/८)**

रामचरितमानसेऽपि भक्तप्रवरः तुलसीदासः कथयति- **बिनु सतसंग बिबेक न होई। रामकथा बिनु सुलभ न सोई॥** रामकथां विना सन्तः न मिलन्ति सद्भिर्विना भगवत्कथाश्रवणं न भवति। एकस्मिन् रतिः अस्ति चेत् द्वितीये प्रीतिः स्वतः भवति। सतां दर्शनेन भक्तप्रवराणां सरलपुरुषाणाम् एकैव याचना भवति- **सन्त सरल चित जगत हित जानि सुभाव सनेहु। बालविनय सुनि करि कृपा रामचरनरति देहु॥(रामचरितमानसे)** सतां जीवनं परोपकाराय एव भवति अतएव कथितं सुभाषिते यथा- **"रविश्चन्द्रो घना मेघाः नदी गावश्च सज्जनाः। एते परोपकाराय युगे देवेन निर्मिताः॥"(सु.र.भा.)** भगवतापि एतेषां समुत्पत्तिः परोपकाराय एव कृता वर्तते। अतः-

"परोपकाराय वहन्ति नद्यः परोपकाराय दुहन्ति गावः।
परोपकाराय फलन्ति वृक्षाः परोपकाराय सतां विभूतयः॥"(सु.र.भा.)

प्रायः सर्वेऽपि सन्तः समानाः भवन्ति कारणं सतां लक्षणानि समानानि सन्ति तानि लक्षणानि यथा- **"यथा लब्धेऽपि सन्तुष्टः समचित्तो जितेन्द्रियः। हरिपादाश्रयो लोके विप्रः साधुरनिन्दकः॥"निर्वैरः सदयः शान्तो दम्भाहङ्कारवर्जितः। निरपेक्षो मुनिर्वीतरागः साधुरिहोच्यते॥"(शास्त्रान्तरे)** सतां लक्षणैः यः विभूषितो भवति तद्दर्शनेन भगवद्दर्शनस्य फलमेव निर्दिष्टं वर्तते। अतः यत्र सतां दर्शनं भवति तत्रास्माभिः दण्डवत्प्रणामाः कर्तव्याः भवन्ति। **"यत्पूजायाः हरेः पूजा दृष्ट्या न यमदर्शनम्। पापक्षयः स्पर्शनाच्च किं परं सत्समागमात्॥ "नमः सद्भ्यः सदा मेऽस्तु येषां चरणधूलिभिः। धन्या वसुन्धरा नित्यं**

सन्तः साक्षाद्धरेस्तनुः॥ इत्थम्- **"सङ्गमः खलु साधूनां करणीयो मुमुक्षुभिः। जीवनं सफलं तेन पुनरागमनं न हि॥" (इदं मम)**

उपसंहृतिः

श्रीमन्महाभारते पितामहस्य भीष्मस्य मुखात् भगवतः नारायणस्य सहस्रनामानि विष्णोर्दिव्यसहस्रनाम्ना सुप्रसिद्धानि। तत्र सर्वाण्यपि नामानि एकवचने सन्ति एकं नाम विहाय तच्च नाम - **सन्तः**। अतः पितामहः भीष्मः अपि भगवतः नामस्मरणे सतां बहुमानं कर्तुं बहुवचने तन्नाम स्मरति।भारतस्य परमपावना भूमिरियं सतां पदार्पणेन धन्या सेव्या मान्या च वर्तते। अस्यां भूमौ यावन्तः सन्तः समभवन् न तावदन्यत्र। यत्र अस्माभिः **सन्ततुकारामः, सन्तएकनाथः, सन्तज्ञानेश्वरः, बापासीतारामः, जयजलारामः, आपागीगा, सन्ततुलसीदासः, सन्तदेवीदास-सन्तअमरदासः, सन्तप्रमुखस्वामी, सन्तमस्तरामः, सन्तहरिरामः, सन्तसन्तरामः, सन्तलक्ष्मणदासः, सन्तभोजलरामः, सन्तविठ्ठलनाथः, सन्तमुकुन्दराजः, सन्तरघुनाथः, सन्तभानुदासः, सन्तसुरदासः, सन्तनन्ददासः, सन्तकृष्णदासः, सन्तवीरभानः, सन्तरामदासः, सन्तश्रीरामकृष्णपरमहंसः, सन्तमङ्गलदासः, सन्तसिद्धदासः, सन्तगोविन्ददासः, सन्तश्रीरूपकलालः, सन्तश्रीगोमतीदासः, सन्तगुरुगोविन्दसिंहः, सन्तश्रीकुशलानन्दः, सन्तप्रेमदासः, सन्तब्रह्मानन्दः, सन्तकरपात्रीजीमहाराजः, सन्तदादू, सन्तपहाडीबाबा, सन्तप्रेमभिक्षुमहाराजः, सन्तभक्तिवेदान्तस्वामी, सन्तकाश्मीरीबापु** एते सन्तचरणाः पङ्क्तिपावनाः सन्ति एतेषु कस्यचिदेकस्यापि जीवनचरित्रं श्रूयते कथ्यते वा जीवनशैलीं ज्ञायते चेत् मानवजीनस्य सार्थक्यं कुत्र कदा कथं च भवति कोऽयं कृपाप्रसादः किं च सतां महत्त्वम् एतत्सर्वमपि शास्त्रानुसरणेन सतामनुसरणेन भारतदेशे जन्मना च प्राप्तुं ज्ञातुं च शक्यते। एतेषु विरलेषु सच्चरित्रेषु सत्सु प्रणामाञ्जलिपुरःसरं लेखोऽयं सतां सेवायां समर्प्यते। सतां कृपाप्रसादेन विचारोऽयं सम्प्रातः लेखोऽयं च लिखितः अनेनान्तःकरणशुद्धिरस्तु॥

॥ इति शम्॥

सन्दर्भग्रन्थसूचिः

१. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर
२. श्रीमद्भगवद्गीता तेना मूळ रूपे, श्री १००८ भक्तिवेदान्तस्वामीजी महाराज,
३. श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर
४. महाभारतम्, गीताप्रेस, गोरखपुर
५. गरुडपुराणम्, नाग पब्लिकेशन, नई दिल्ली

६. मनुस्मृतिः, चौखम्बा प्रकाशन, वाराणसी
७. योगवासिष्ठः, गीताप्रेस, गोरखपुर
८. सुभाषितरत्नभाण्डागारः, चौखम्बा प्रकाशन, वाराणसी
९. हितोपदेशः (मित्रलाभः), चौखम्बा प्रकाशन, वाराणसी
१०. रामचरितमानस, गीताप्रेस, गोरखपुर
११. श्रीमद्वाल्मीकिरामायणम्, गीताप्रेस, गोरखपुर
१२. नीतिशतकम्, चौखम्बा प्रकाशन, वाराणसी
१३. उत्तररामचरितम्, चौखम्बा संस्कृत भवन, वाराणसी
१४. मुद्गलोपनिषद्
१५. मोहमुद्गलस्तोत्रम्
१६. साहित्यदर्पणः, चौखम्बा प्रकाशन, वाराणसी
१७. अभिज्ञानशाकुन्तलम्, सरस्वती पुस्तक भण्डार, अहमदाबाद
१८. वैराग्यशतकम्
१९. विवेकचूडामणिः
२०. स्कन्दपुराणम्, गीताप्रेस, गोरखपुर
२१. मानसागरी, चौखम्बा संस्कृत प्रकाशन, वाराणसी

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

श्रीमद्भगवद्गीतायां त्वम्पदार्थनिरूपणम्

डॉ. जानकीशरणः आचार्यः[१]

किञ्चित् प्रास्ताविकम्

विपश्चिताः विदाङ्कुर्वन्त्येव यत् कर्मभक्तिज्ञानरूपकाण्डत्रयात्मकस्य समग्रस्य आम्नायस्य सारसङ्ग्रहरूपा भवति श्रीमद्भगवद्गीता। भगवद्गीतेयं परमनिःश्रेयसप्राप्तये नैकविधानि तत्त्वानि उपदिश्य तत्साधनानान्यपि निर्दिशति। इयञ्च भगवद्गीता वेदान्तदर्शने स्वतन्त्रप्रस्थानरूपेण प्रसिद्धिं गता। सर्वेषां प्रस्थानानाम् अखण्डाद्वितीये प्रत्यगभिन्ने ब्रह्मणि परमं तात्पर्यम्। तथा च यद् ब्रह्मणः स्वरूपं तदेव त्वम्पदार्थभूतस्य जीवस्य पारमार्थिकं स्वरूपम्। नित्यशुद्धबुद्धमुक्तस्वभावं सत्यज्ञानानन्दविग्रहं ब्रह्मेति वेदान्ताः बाभाषन्ते। प्रस्थानं नाम प्रस्थीयतेऽनेनेति प्रस्थानं मार्गः। मुमुक्षोः किल संसाराध्वनः पारं परमं विष्णुपदं प्रस्थितस्य तज्ज्ञानोपदेशको मार्गः वेदान्ते प्रस्थानपदेनाभिधीयते। श्रीभगवन्मुखारविन्दात् निःसृता अष्टादशभिरध्यायैः सप्तशतश्लोकैश्च पूर्णा, स्वभावमधुरपदविन्यासयुता, निःश्रेयसप्राप्त्युपायबोधिका, श्रुतीनामाशयपरिगृहीता, परश्शतैः प्राचीनैराचार्यैः प्रज्ञावद्भिश्च व्याख्याता, अध्यात्मविद्याचरमोत्कर्षेण निःश्रेयसपथप्रदर्शिका भगवद्गीता अद्वैतवेदान्तसाहित्ये स्मृतिप्रस्थानस्य स्थानमलभत।

त्वम्पदार्थनिरूपणस्य प्राथम्यम् –

समग्रमिदं गीताशास्त्रं तत्त्वमस्यादिमहावाक्यात्मकं वर्तते, अस्य अर्थश्च अखण्डब्रह्मरूप इति अद्वैताचार्याः प्रतिपादयन्ति। पदसमूहो वाक्यम्, वाक्यसमूहो महावाक्यमिति उत्सर्गशास्त्रम्। परं जीवब्रह्मणोः ऐक्यबोधकं वाक्यं महावाक्यमिति वेदान्तसमयः। महावाक्यानां महत्त्वं न शब्दगतं किन्त्वर्थगतम्। तत्र जीवब्रह्माभेदरूपमहातात्पर्यार्थबोधकत्वात् मोक्षरूपमहापुरुषार्थसाधकत्वाच्च एतेषां

---

[१] Former Dean (Faculty of Darshana) & Assistant Professor, Shree Somnath Sanskrit University, Veraval-362665. Email: janakisharan@gmail.com, Mobile : 8758817525

महावाक्यानां महत्त्वं स्फुटमेव। तेषु महावाक्येषु चत्वारि महावाक्यानि अत्यन्तं प्रसिद्धानि सन्ति। तद्यथा – "**तत्त्वमसि**[२]" इति उपदेशात्मकं वाक्यम्। "**प्रज्ञानं ब्रह्म**[३]" इति स्वरूपबोधकं वाक्यम्। "**अयमात्मा ब्रह्म**[४]" इति अनुसन्धानात्मकं वाक्यम्। "**अहं ब्रह्मास्मि**[५]" इति अनुभवात्मकं वाक्यम्। इदं गीताशास्त्रमपि महावाक्यवत् जीवब्रह्मणोः अभेदं ज्ञापयति। यथा तत्त्वमसीति वाक्ये – तत्, त्वम्, असि –इति त्रीणि पदानि सन्ति तथैव इदम् अष्टादशाध्यायात्मकं गीताशास्त्रमपि षट्कत्रयात्मना त्रेधा विभज्य क्रमशः त्वम्पदार्थस्य तत्पदार्थस्य तत्त्वम्पदयोः अभेदरूपार्थस्य च निरूपणं करोति। सम्प्रति अस्मिन् प्रबन्धे भगवद्गीतोक्तरीत्या त्वम्पदार्थस्य कश्चन विचारः प्रस्तूयते यत् गीतायां प्रतिपादितं त्वम्पदार्थभूतं जीवस्वरूपं कीदृशम्?

तत्त्वमसिमहावाक्ये तत्, त्वम्, असि इति त्रीणि पदानि श्रूयन्ते। गीतायामपि षट्कत्रयं प्रसिद्धम्। एतत् षट्कत्रयं तत्त्वमसिमहावाक्यस्य एकैकपदस्थानं भजते। वाक्यार्थज्ञानं पदार्थज्ञानाधीनं भवति। अत एव घटकपदार्थज्ञानम् अन्तरेण घटितपदार्थो न सिध्यतीति न्यायः। अतः आदौ तत्त्वमसिमहावाक्यघटकपदानि सङ्क्षेपेण निरूप्यन्ते। "**तत्त्वमसि**[६]" इत्यत्र तत्त्वम्पदयोः अर्थः प्रत्येकं वाच्यलक्ष्यभेदेन द्विधा भवति। तथाहि परोक्षसर्वज्ञत्वादिविशिष्टं चैतन्यम् अथवा मायाशबलितं ब्रह्म तत्पदस्य वाच्यार्थः। तत्पदस्य लक्ष्यार्थस्तु अनुपहितं तुरीयं मायानिर्मुक्तं शुद्धचैतन्यमिति। एवं त्वम्पदस्यापि वाच्यलक्ष्यभेदेनार्थः द्विविधो भवति – अन्तःकरणावच्छिन्नं चैतन्यं संसारी जीवः इति त्वम्पदस्य वाच्यार्थः। जाग्रदाद्यवस्थात्रयरहितं शुद्धं चैतन्यं त्वम्पदस्य लक्ष्यार्थः इति।

अस्मिन् तत्त्वमसिमहावाक्ये तत्पदश्रवणानन्तरं त्वम्पदं श्रूयते। तस्मात् प्रथमपदत्यागे मानाभावात् पाठक्रमानुसारार्थबोधनाय प्रथमं तत्पदार्थः एवं वर्णनीयः। किञ्च जीवेश्वरयोर्मध्ये तत्पदार्थस्य वाचकः सर्वज्ञः सर्वगतः परमेश्वरः जीवापेक्षया उत्कृष्टः। अतः अभ्यर्हितत्वादपि हेतोः प्रथमं तावत् सर्वज्ञत्वादिबोधकः तत्पदार्थः वर्णनीय इति कश्चन पूर्वपक्षः।

अत्रायं समाधिः

---

[२] छान्दोग्योपनिषद्, ६.८.७

[३] ऐतरेयोपनिषद्, ३.१.३

[४] माण्डूक्योपनिषद्, १.२

[५] बृहदारण्यकोपनिषद्, १.४.१०

[६] छान्दोग्योपनिषद्, ६.८.७

(१) "प्रज्ञानं ब्रह्म", अहं ब्रह्मास्मि", "तत्त्वमसि", "अयमात्मा ब्रह्म" इति चतुर्षु महावाक्येषु त्वम्पदार्थः प्रथमं श्रूयते। "अहं ब्रह्मास्मि" इति अनुभववाक्ये तु जीववाचकः अहं शब्दः विशेषतः प्रथममेव श्रूयते। "तत्त्वमसि" इति महावाक्यं यद्यपि उपदेशात्मकवाक्यहेतोः प्रधानम्, तथापि प्रधानानुसारेण इतरेषां नयने उद्देश्यविधेयकभावो भज्येत। यतो हि तत्त्वमसि महावाक्ये त्वम्पदम् उद्देश्यं तत्पदं विधेयं भवति। त्वं तद् असि इति अस्य महावाक्यस्य अन्वयः। अत्र जीवमुद्दिश्य ब्रह्मभावो विधीयते। ब्रह्म ज्ञातं सत् उद्देश्यं भवति, अज्ञातं सत् विधेयम्। अतः अपरोक्षस्य जीवचैतन्यस्य विज्ञातत्वात् उद्देश्यत्वेन तस्य निरूपणं तावत् प्रथमं भवितव्यम्। परोक्षं ब्रह्मचैतन्यं तु गुरुवेदान्तवाक्येभ्यो ज्ञायते अतः द्वितीयं स्थानं भजते। सर्वत्र उद्देश्य-विधेयकभावस्थले उद्देश्यं प्रथमतया निरूप्यते। अतः अत्रापि जीवस्वरूपस्य निरूपणं प्रथमतया कर्तव्यम्।

(२) अयं जीवः ईश्वरापेक्षया अभ्यर्हितो भवति। ब्रह्मभावो मोक्षः तस्मात् तत्पदार्थवाच्यम् ईश्वरस्वरूपं फलस्थानीयम्। जीवस्तु फलभोक्ता। भोक्तृभोग्ययोः भोक्तैव प्रधानत्वात् अभ्यर्हितः। भोग्यं च तदङ्गम्। तस्मादपि त्वम्पदार्थः प्रथमं निरूपणीयः।

(३) जीवब्रह्मणोः प्रतिपादने उपनिषत्सु शैलीद्वयी दृश्यते। तैत्तिरीये छान्दोग्ये च प्रथमं तावत् ईश्वरस्वरूपं निरूप्य जीवाभेदः प्रतिपाद्यते। परं काठक-केनोपनिषत्प्रभृतिषु जीवनिरूपणपुरस्सरं ब्रह्मभावो निरूप्यते। कठोपनिषत्प्रभावपरिपूर्णा इयं श्रीमद्भगवद्गीता इदं प्रथमतया "**न त्वेवाहं जातु नासम्**[७]" इत्यादिना सविस्तरं जीवस्वरूपं प्रतिपादयति। पश्चात् परब्रह्माभेदं बोधयति। अतः त्वम्पदार्थभूतं जीवस्वरूपं प्रथमं तावत् गीताशास्त्रदिशा प्रतिपाद्यते।

श्रीमद्भगवद्गीतायां त्वम्पदार्थनिरूपणम् –

परमेश्वरप्रसादात् दिव्यास्त्रसम्पन्नः अर्जुनः यदा धर्मक्षेत्रे कुरुक्षेत्रे युयुत्सून् बान्धवान् भीष्मद्रोणादीन् पश्यति तदा तस्य मनसि शोकमोहौ समुत्पन्नौ। मानससन्तापः शोकः, अविवेकः मोहः इति निगद्यते। अयञ्च अविवेकः द्विविधः उत्पन्नः। प्रथमं तावत् अनित्याशुचि दुःखरूपे शरीरेन्द्रियादौ अनात्मनि नित्यशुचि सत्यसुखरूपात्मबुद्धिः। द्वितीयस्तु – स्वधर्मे युद्धे प्राणिहिंसात्मके कर्मणि अधर्मबुद्धिः। मोहः, भ्रमः, मिथ्याज्ञानम्, अज्ञानम्, अध्यासः, भ्रान्तिः इति अनर्थान्तरम्। सर्वत्र "**अन्यस्यान्यधर्मावभासता**[८]" इति असाधारणो धर्मः। तस्मात् मोहात् शोको जायते। अतः शोकनिवृत्तये

---

[७] श्रीमद्भगवद्गीता २.१२

[८] ब्रह्मसूत्रशाङ्करभाष्ये अध्यासभाष्यम्, पृ. ३२

प्रथमं तावत् मोहो निवर्तनीयः। मोहनिवृत्तिश्च अज्ञाननिवृत्त्यधीना। अज्ञाननिवारणं च ज्ञानात् सम्पद्यते इति सामान्यनियमः। शोकपदं सर्वसंसारदुःखस्य उपलक्षणम्। तथा च सर्वविधदुःखकारणम् आत्माज्ञानम्। यथा तन्तुनाशे पटनाशो भवति तथैव अज्ञाननाशे सति मोहो न भवति। इदं च अज्ञानम् आत्मयाथात्म्यानुभवमन्तरेण न भवति। "**तरति शोकमात्मवित्**[९]", "**तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[१०]", "**ब्रह्मभूयाय कल्पते**[११]", "**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते**[१२]" इत्याद्याः श्रुतिस्मृतयो भवन्ति।

एवञ्च धर्मसम्मूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे निमग्नस्य अर्जुनस्य अन्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवः अनात्मभ्रमम् अधर्मभ्रमं च निवारयितुं प्रत्यगात्मविषयकमोहनिवृत्तये प्रथमं तावत् "**अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे**[१३]" इत्यादिना उपदिदेश। तथैव अर्जुनस्य स्वधर्मे युद्धाख्ये कर्मणि अधर्मभ्रमः अपि श्रीभगवता "**स्वधर्मे निधनं श्रेयः**[१४]" इत्यादिना निवारितः। अतः "**स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं धर्मद्वयम् अर्जुनाय शोकमोहमहोदधौ निमग्नाय उपदिदेश, गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति**[१५]" इति भाष्यकारोक्तरीया श्रीभगवान् अर्जुनं निमित्तीकृत्य तदिदम् अध्यात्मरहस्यम् उपदिदेश।

अत्र जीवमुद्दिश्य ब्रह्मभावो बोध्यते। स च त्वम्पदार्थभूतः जीवः कूटस्थासङ्गचिद्रूपः अकर्ता अभोक्ता चेतनो निर्गुणः विभुश्चेति औपनिषदः सिद्धान्तः। जीवस्य एतादृशमेव स्वरूपं गीतायामपि गीतम् –

"न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥" २.२० ॥ इति।

---

[९] छान्दोग्योपनिषद्, ७.१.३

[१०] श्वेताश्वतरोपनिषद्, ६.१५, ३.८

[११] श्रीमद्भगवद्गीता, १४.२६

[१२] श्रीमद्भगवद्गीता, ४.३७

[१३] श्रीमद्भगवद्गीता, २.११

[१४] श्रीमद्भगवद्गीता, ३.३५

[१५] शाङ्करगीताभाष्ये उपोद्घातभागे

"य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥" २.१९ ॥ इति च।

एतत् मन्त्रद्वयमपि कठोपनिषदि अल्पीयसा व्यत्यासेन श्रूयते। अतः औपनिषदमात्मस्वरूपं गीताशास्त्रम् अनुवदति। अस्मिन् द्वितीये मन्त्रे हननादिलौकिकवैदिकव्यवहारस्य कर्ता, कर्मप्रेरको वा आत्मा इति प्राकृतबुद्धेः प्रतिषेधं कृत्वा अयम् आत्मा अविक्रियः इति निरूपितः। किञ्च अकर्तरि आत्मनि कर्तृत्वज्ञानम्, अकर्मणि कर्मत्वज्ञानं च भ्रममात्रम्। शरीरगतोत्पत्तिविनाशौ आत्मनि आरोप्येते। यथा लोकेऽपि जाते देहे देवदत्तः जातः, विनष्टे देहे देवदत्तः मृत इति व्यवहारः। तस्मात् अयो दहतीतिवत् जननमरणादिव्यवहारः गौणः। "**अजो नित्यः शाश्वतोऽयं पुराणः**[१६]" इत्यनेन षण्णां भावविकाराणां प्रतिषेधः कृतः। "**न हन्यते हन्यमाने शरीरे**[१७]" इत्यनेन देहादीनां हननेऽपि अस्य नाशो न भवतीति प्रतिपाद्यते। एवं च षड्भावविकारशून्यः त्वम्पदार्थस्य लक्ष्यार्थः आत्मा अपरोक्षगोचरः चेतनः कूटस्थासङ्गचिद्रूपः इति श्लोकार्थः सम्पद्यते।

त्वम्पदार्थस्य निरवयवत्वम्

लोके इदं दृश्यते यत् यदि गृहस्य दाहो भवति तर्हि तदन्तरवर्तिनः पुरुषस्य अथवा घटस्थजलनाशे सति तदन्तर्वर्तिसूर्यप्रतिबिम्बस्य नाशो भवतीति लोके प्रसिद्धम्। एवञ्च सति देहे हन्यमाने छिद्यमाने वा देहिनो विनाशः अपि अवश्यम्भावी। तर्हि आत्मनः अविक्रियत्वं कथं युज्यते इति शङ्कायाः समाधानं गीताशास्त्रे –

"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २.२३ ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २.२४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥ २.२५ ॥

इत्यादिश्लोकैः कृतं वर्तते। एतैः श्लोकैः आत्मनः निरवयवत्वमपि उक्तं भवति।

---

[१६] श्रीमद्भगवद्गीता, २.२०, कठोपनिषद्, १.२.२८

[१७] श्रीमद्भगवद्गीता, २.२०

सत्यो नित्यश्च त्वम्पदार्थः

कूटस्थम् असङ्गं चिद्रूपं नित्यशुद्धबुद्धमुक्तस्वरूपम् अभौतिकम् अखण्डं चैतन्यम् आत्मा इति गीताशास्त्रं सुस्पष्टं वदति। परम् आत्मनः इत्थम्भूतं याथात्म्यं सामान्यजनाः न जानन्ति। शरीरसम्बन्धात् पूर्वं वियोगात् परं जीवनकाले च तथा जाग्रत्स्वप्नसुषुप्त्यादिषु अवस्थाविशेषेषु च सर्वदा एकरूप एवात्मा इति पण्डिताः आत्मज्ञानिनः एव जानन्ति। एतादृशम् आत्मस्वरूपं यदा अर्जुनः अज्ञात्वा शरीरे आत्मबुद्ध्या स्वबान्धवान् युद्धे हन्तुं नेच्छति स्म, तदा अर्जुनस्य अज्ञानहेतुकं दुःखं श्रीभगवान् "**अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे। गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः**[१८]" इत्यनेन "**तरति शोकमात्मवित्**[१९]" इति श्रुत्यनुसारेण आत्मपरमार्थदर्शिनः न शोचन्ति इति प्रतिपादयति।

अयञ्च त्वम्पदार्थभूतः आत्मा सर्वगतः वर्तते। "**एको देवः सर्वभूतेषु गूढः**[२०]", "**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्**[२१]" इति श्रुतिस्मृती आत्मनः विभुत्वं प्रतिपादयतः। यथा अनेकेषु घटादिषु गगनस्य उपाधितः अनेकत्वं तत्त्वतः एकत्वं नित्यत्वञ्च लोके दृश्यते। अथवा एकस्यैव सूर्यस्य अनेकत्र प्रतिबिम्बितस्य उपाधितः भिन्नत्वं तत्त्वतः एकत्वं प्रसिद्धम् अस्ति तद्वत् आत्मनः उपाधितो भेदः। अमुमेवार्थं गीताशास्त्रम् इत्थं प्रतिपादयति –

"यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥" १३.३२ ॥

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥" १३.३३ ॥ इति।

देहात्मवादखण्डनम्

अपि च त्वम्पदार्थभूतः आत्मा देहात् व्यतिरिक्तः। देहात्मवादिनः चार्वाकाः चैतन्यविशिष्टः काय एव जीवात्मा इति आचक्षते। परं गीतायां "**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि।**

---

[१८] श्रीमद्भगवद्गीता, २.११

[१९] छान्दोग्योपनिषद्, ७.१.३

[२०] श्वेताश्वतरोपनिषद्, ६.११

[२१] श्रीमद्भगवद्गीता, १३.२७

तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥[२२]" इत्यनेन देहात्मवादः निराकृतः। लोके यथा मनुष्यः जीर्णवस्त्रं परित्यज्य नूतनं वस्त्रं स्वीकरोति। पूर्ववस्त्रस्य त्यागे नूतनस्य च स्वीकारे पुरुषः स एव भवति। तथैव कर्मानुसारं वर्तमानशरीरत्यागे नूतनस्य स्वीकारे च आत्मा समान एव भवति, शरीरं तु भिन्नं भवति। तस्मात् शरीरात् भिन्नः अयं त्वम्पदार्थभूतः आत्मा। बाल्यकौमार्याद्यवस्थाभ्यः भिन्नं जीवस्वरूपमिति गीतायां निरूपितम् –

"देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥" २.१३ ॥

किञ्च योगशक्तिसम्पन्नानां जातिस्मरणं भवति। तथा च योगसूत्रम् "**संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्**[२३]" इति। अतोऽयं देहात्मवादो न युज्यते। अपि च अविद्याप्रयुक्तशरीराद्युपाधिवशात् लौकिकानां प्राक्तनशरीरादिस्मरणं न जायते। अमुमेव विषयं श्रीभगवान् गीतायाम् इत्थं वदति –

"बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥" ४.५ ॥ इति।

इन्द्रियात्मवादखण्डनम्

इन्द्रियम् एकैकं तेषां समूहो वा आत्मा भवितुं नार्हति। कर्ता भोक्तेति प्रसिद्धो लौकिको जीवः ईश्वरस्य अंशो भवति। स च चेतनः, तस्य भोगसाधनानि इन्द्रियाणि। तस्मात् देवदत्तः कुठारेण छिनत्ति इत्यत्र यथा छेत्तुः देवदत्तस्य तत्साधनस्य च भेदप्रसिद्धिः तथैव जीवस्य इन्द्रियाणां च भेदः अवश्यं भवेत्। तस्मात् इन्द्रियाणि नात्मा। गीतायाम् अयं विषयः –

"श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।
अधिष्ठाय मनश्चायं विषयानुपसेवते॥" १५.९ ॥

इति किञ्च –

"मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥" १५.७ ॥

---

[२२] श्रीमद्भगवद्गीता, २.२२

[२३] पातञ्जलयोगसूत्रम्, ३.१८

इति श्लोकेन दर्शितः। इन्द्रियाणि अचेतनानि, जीवस्तु चेतनः। अचेतनानां प्रवृत्तिः चेतनपूर्विकाः भवति। आत्मनः सान्निध्यमात्रेण इन्द्रियाणि प्रवर्तन्ते। कठोपनिषदि रथरथिदृष्टान्तेन शरीरेन्द्रियादिभ्यो जीवः भिन्नः इति स्पष्टीकृतः। कर्मानुसारेण शरीरान्तरस्वीकारसमये सर्वाणि ज्ञानकर्मेन्द्रियाणि स्वीकृत्य गच्छति यथा पुष्पेभ्यो गन्धं स्वीकृत्य वायुः गच्छति। तदुक्तं गीतायाम् –

"शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥" १५.८ ॥

अपि च

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मन।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥" ३.४२ ॥

इत्यत्र इन्द्रियाणि श्रोत्रादीनि पञ्च बाह्यं स्थूलं परिच्छिन्नं देहं च अपेक्ष्य पराणि। तथा इन्द्रियेभ्यः सङ्कल्पविकल्पात्मकं मनः परम्। तथा मनसः तु परा बुद्धिः निश्चयात्मिका। तथा बुद्धेः परतस्तु सः आत्मा इत्युच्यते।

शून्यवादखण्डनम्

"नासतो विद्यते भावः[२४]", "**न त्वेवाहं जातु नासम्**[२५]" इत्यादिगीतावचनैः सद्रूपस्य आत्मनः सर्वदा सत्त्वं वर्णितम्, तस्मात् शून्यमात्मेति मतं सुतरां निर्युक्तिकम्। श्रुतिष्वपि "**कथमसतः सज्जायेत**[२६]" इत्यादिना अयं शून्यवादः निराकृतः। कस्यचित् स्थायिनः अभावात् आत्मनः अत्यन्तासत्त्वानुभवः कस्य भवितुमर्हति। तस्मात् त्वम्पदार्थभूतः आत्मा न शून्यमिति गीतायाः अभिप्रैतार्थः।

तार्किकादिमतखण्डनम्

तार्किकमते आत्मा द्रव्यम्, तस्मिन् सुखदुःखधर्माधर्मादयो गुणाः समवायसम्बन्धेन समुत्पद्यन्ते इति स्वीक्रियते। परम् इदं गीताशास्त्रे नाङ्गीक्रियते। जगति विद्यमानं सर्वं क्षेत्रक्षेत्रज्ञात्मना ज्ञातृज्ञेयात्मना वा विभज्य सुखदुःखादिकं क्षेत्रधर्मा इति वर्णयति श्रीमद्भगवद्गीता। तथा हि –

---

[२४] श्रीमद्भगवद्गीता, २.१६

[२५] श्रीमद्भगवद्गीता, २.१२

[२६] छान्दोग्योपनिषद्, ३.२.२

"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम्॥" १३.६ ॥

चैतन्यसुखदुःखादीनाम् आत्मगुणत्वे मोक्षेऽपि दुःखाद्यनुभवप्रसङ्गः। एतेषां गुणानाम् आगन्तुकत्वे जडत्वप्रसङ्गो दुर्वारः स्यात्। तस्मात् "**ज्ञानी त्वात्मैव**[२७]", "**अहमात्मा गुडाकेश**[२८]", "**ममैवांशो जीवलोके जीवभूतः सनातनः**[२९]" इत्यादिवचनैः आत्मनः चेतनत्वम् ईश्वराभिन्नत्वं च निरूप्य "आत्मा जडः द्रव्यत्वात् घटवत्" इत्यनुमानेन आत्मनः तार्किकमते सिद्धं जडत्वं श्रीमद्भगवद्गीता प्रतिषेधति।

अहं कर्ता भोक्ता सार्वजनीनानुभवेन, "**कर्ता विज्ञानात्मा पुरुष**[३०]" इति श्रुत्या, "**कर्ता शास्त्रार्थवत्त्वात्**[३१]" इति सूत्रेण, किञ्च "**कर्मण्येवाधिकारस्ते**[३२]", "**कुरु कर्मैव**[३३]" इत्यादिगीतावचनैश्च आत्मनः कर्तृत्वादिकं स्वाभाविकमिति भणन्ति तार्किकाः। परं मतमिदं गीताशास्त्रसम्मतं न प्रतीयते। "**य एनं वेत्ति हन्तारं**[३४]**", "नायं हन्ति न हन्यते**[३५]" इत्यादिवचनैः स्पष्टं भवति यत् यस्तु हननादिक्रियायाः कर्ता कर्म इति वा आत्मानं मनुते सः आत्मनः याथात्म्यस्वरूपं न जानाति। आत्मा अविक्रियत्वात् निरवयवत्वाच्च न कर्ता न वा कर्म भवति।

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥" ३.२७ ॥

इत्यत्र श्रीमद्भगवद्गीता स्पष्टतया अन्तःकरणोपाधिकस्य कर्तृत्वं प्रतिपादयति।

किञ्च भगवद्गीतायाः उपसंहाराध्यायेऽपि –

---

[२७] श्रीमद्भगवद्गीता, ७.१८

[२८] श्रीमद्भगवद्गीता, १०.२०

[२९] श्रीमद्भगवद्गीता, १५.७

[३०] प्रश्नोपनिषद्, ४.९

[३१] ब्रह्मसूत्रम्, २.३.३३

[३२] श्रीमद्भगवद्गीता, २.४७

[३३] श्रीमद्भगवद्गीता, ४.१५

[३४] श्रीमद्भगवद्गीता, २.१९

[३५] तदेव

"तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥" १८.१६ ॥

इति अकर्तारं शुद्धं कर्तारं यः पश्यति स दुर्मतिरिति प्रतिपादितम्।

परिणामवादनिराकरणम्

परिणामवादिनः कापिलाः पातञ्जलाश्च जीवस्य तात्त्विकं कूटस्थासङ्गचिद्रूपत्वम् अङ्गीकुर्वन्ति तथापि जीवस्य भोक्तृत्वं नानात्वं च यथार्थतया अभ्युपगच्छन्ति। यद्यपि गीतायां केचन श्लोकाः साङ्ख्यमतानुकूला एव प्रतिभान्ति तथा याथातथ्यविचारेण तेषां मतमिदम् औपनिषदब्रह्मवादेन सामञ्जस्यं न भजते। "**कर्मण्येवाधिकारस्ते**[३६]", "**कुरु कर्मैव तस्मात् त्वम्**[३७]" इत्यादयः श्लोकाः आविद्यकं कर्तृत्वं समाश्रित्य प्रवृत्ताः सन्ति। "**भोक्तारं यज्ञतपसाम्**[३८]", "**पुरुषः प्रकृतिस्थो हि भुङ्क्ते**[३९]" इत्यादयः श्लोकाः आत्मनः भोक्तृत्वम् आविद्यकमिति वर्णयन्ति।

किञ्च –

"अनादित्वात् निर्गुणत्वात् परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥[४०]**"**

"नवद्वारे पुरे देही नैव कुर्वन्नकारयन्॥"

"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥[४१]**"**

"अजो नित्यः शाश्वतोऽयं पुराणः॥"

इत्यादयः श्लोकाः प्रत्यगात्मा अकर्ता अभोक्ता इतिरूपेण निरूपयन्ति।

इत्थं यथा उपनिषत्सु त्वम्पदार्थभूतस्य जीवात्मनः स्वरूपं याथात्म्येन निरूप्यते तथैव श्रीमद्भगवद्गीतायामपि अयं त्वम्पदार्थः निरूपितः इति शम्॥

---

[३६] श्रीमद्भगवद्गीता, २.४७

[३७] श्रीमद्भगवद्गीता, ४.१५

[३८] श्रीमद्भगवद्गीता, ५.२९

[३९] श्रीमद्भगवद्गीता, १३.२१

[४०] श्रीमद्भगवद्गीता, १३.३१

[४१] श्रीमद्भगवद्गीता, २.२४

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

भाष्यकृद्दिशा स्थानिवदादेशोऽनल्विधौ इति सूत्रविमर्शः

डॉ॰ विदुषी बोल्ला[१]

(अतस्मिन् तद्धर्मापादकत्वम् अतिदेशसूत्रम्। अतिदेशस्तु षोढा – निमित्त-व्यपदेश-तादात्म्य-शास्त्र-कार्य-रूपातिदेशभेदात्। अत्र कार्यातिदेशस्य प्रप्रथमं सूत्रं वर्त्तते – स्थानिवदादेशोऽनल्विधौ इति। एतं सूत्रमेकादशसु अंशेषु विभज्य भाष्यकृदाशयः अत्र विमर्शितः)

यथोत्तरं मुनीनां प्रामाण्यम् इति प्रमाणभूताचार्यैः महाभाष्यकृद्भिः **स्थानिवदादेशोऽनल्विधौ**[२] इति अतिदेशसूत्रे पक्षप्रतिपक्षाभ्यां यः सिद्धान्तः प्रत्यपादि, तत्समस्तं बिन्दुशः विभज्य यथामति शोधपत्रेऽस्मिन् विमर्श्यते। प्रकृतसूत्रे एते विमृश्यमाणांशाः सन्ति –

1. स्थानिवत्सूत्रस्य पदार्थविमर्शः।
2. वत्करणस्यौचित्यविमर्शः।
3. आदेशपदस्यौचित्यविमर्शः।
4. विधिशब्दस्यौचित्यविमर्शः।
5. सूत्रवैय्यर्थ्यविमर्शः।
6. सामान्यातिदेशे विशेषस्याप्यतिदेशविमर्शः।
7. स्थान्यलाश्रयणे एव स्थानिवद्भावप्रतिषेधविमर्शः।
8. एकदेशविकृतस्योपसङ्ख्यानमिति वार्त्तिकविमर्शः।
9. शब्दस्य नित्यत्वपक्षे स्थानशब्दविमर्शः।
    - सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात्।
    - कार्यविपरिणामाद्वा सिद्धम्।
10. स्थानिवत्त्वात् अपवादस्थलेष्वपि उत्सर्गकार्यप्राप्तिः तन्निराकरणञ्च।
    - विषयेण तु नानालिङ्गकरणात्

---

[१] सहायकाचार्य्या, व्याकरणविभागः,श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातम्, 362266, मो॰न॰ – 9819118024, ई-मेलसङ्केतः–vidushisssu@gmail.com

[२] अष्टाध्याय्यां 1/1/56

- सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात्
- आचार्यप्रवृत्तिः एव ज्ञापकम्

1. **स्थानिवत्सूत्रस्य पदार्थविमर्शः –** कार्यातिदेशसूत्रमिदम्। सूत्रेऽस्मिन् स्थानिवत्, आदेशः, अनल्विधौ इति पदत्रयं वर्त्तते। अत्र स्थानिना तुल्यं स्थानिवत् इति **तेन तुल्यं क्रियाचेद्वतिः**[३]इति सूत्रेण वतिप्रत्यये सति निष्पद्यते। अनल्विधौ इत्यत्र अलाश्रयविधिः अल्विधिः न अल्विधिः अनल्विधिः तस्मिन् अनल्विधौ इति तत्पुरुषगर्भनञ्समासः। तथा च स्थानिसम्बद्धालाश्रयविधिं वर्जयित्वा आदेशः स्थानितुल्यो भवति अर्थात् स्थानिकार्य्याणि आदेशे भवन्ति।
2. **वत्करणस्यौचित्यविमर्शः – गाङ्कुटादिभ्योऽञ्णिन्ङित्**[४] इत्यस्मिन् सूत्रे ङित्कथनेनैव ङिद्वत्-इत्यस्य ग्रहणं क्रियते, तथैव प्रकृतसूत्रेऽपि **स्थान्यादेशोऽनल्विधौ** इत्युच्यमानेऽपि स्थानीत्यनेन स्थानिवत्-ग्रहणं स्यादेव इति **वत्करणं किमर्थम्** इति प्रश्नाशयः। उत्तरन्ति आचार्याः - सूत्रमिदम् अष्टाध्याय्यां सञ्ज्ञाप्रकरणे पठितत्वात् **स्थान्यादेशोऽनल्विधौ** इत्युच्यमाने सति **आदेशस्य स्थानी सञ्ज्ञा स्यादिति** अर्थः भवति, तेन स्थानिनः सर्वाणि कार्य्याणि अपि आदेशस्यैव प्राप्नुवन्ति, यथा – वृद्धिरादैच् इत्यनेन आदैचः वृद्धिसञ्ज्ञकाः भवन्ति, एवञ्च मृजेर्वृद्धिः इत्यनेन मृज्-धातोः वृद्धौ प्राप्तायां आ-इति वृद्धिर्दृश्यते। तथैव प्रकृते अपि आदेशस्य स्थानी सञ्ज्ञायां सत्यां स्थानिनः प्राप्तकार्य्यमपि आदेशस्यैव भवति। यथा – आङो यमहनः इत्यनेन आङ्पूर्वकहन्-धातोः यद् आत्मनेपदं प्राप्यते, तत् हन्-स्थानिकादेशस्य वधादेशस्यैव प्राप्नोति, न तु स्थानिनः हन्-धातोः इति दोषः आपद्यते। अत एव वत्प्रत्ययस्य ग्रहणं सूत्रे कृतम्।
3. **आदेशपदस्यौचित्यविमर्शः –** स्थानिशब्दः सम्बन्धिवाची वर्त्तते। अत एव पितृवद् अधीते इति वचनेन पुत्रः स्वयमेव गम्यते तथैव **स्थानिवदनल्विधौ** इत्युच्यमाने सत्यपि स्थानिशब्दस्य सम्बन्धिशब्दत्वात् आदेशग्रहणं स्वयमेव भवेत् पुनः सूत्रे **आदेशग्रहणस्य किमौचित्यम्** इति विचारणवेलायामुच्यते - आदेशः द्विविधः – 1. प्रत्यक्षज्ञातादेशः यथा – अस्तेर्भूः इत्यनेन अस्-धातोः स्थाने भू-आदेशः, हनो वध लिङि इत्यनेन हन्-धातोः स्थाने वधादेशः इति। 2. अनुमानज्ञातादेशः यथा – एरुः इत्यनेन लोड्लकारस्य ति-स्थाने तु-आदेशः भवति। अस्मिन् सूत्रे आदेशग्रहणाभावेऽपि आदेशपदस्य लभ्यमानत्वात् पुनः सूत्रे ग्रहणेन – **आदेशमात्रं स्थानिवत् भवति** इत्यर्थः प्रतिपद्यते। तस्मात् **एकदेशविकृतस्योपसङ्ख्यानम्**[५]इति वक्ष्यमाणवार्त्तिकस्य आवश्यकता न भवेत्। एवञ्च अस्य वार्त्तिकस्य प्रवृत्तिर्भवति - करोतु इत्यत्र पदत्वमुपाधातुम् अनेनवार्त्तिकेन

---

[३]अष्टाध्याय्यां 5/1/114

[४]अष्टाध्याय्यां 1/2/1

[५]महाभाष्ये प्रकृतसूत्रे

एकदेशविकृतस्यापि तु-इत्यस्य ति-इत्यनेन ग्रहणं क्रियते, तेन तिङन्तत्वात् **सुप्तिङन्तं पदम्**[६]इत्यनेन पदत्वं सुकरम्।

4. **विधिशब्दस्यौचित्यविमर्शः – स्थानिवदादेशोऽनलि** इत्येव सूत्रं स्यात् विधेः अध्याहारेणैव लभ्यमानत्वात्। चेन्न, अनलि इति कथनेन चतुर्विधसमासानां (अला विधिः, अलः परस्य विधिः, अलः स्थाने विधिः, अलि विधिः) ज्ञानं न भवतीति। अपि च अनल् इति प्रातिपदिकग्रहणेनैव सूत्रे '**स्थानिवदादेशोऽनल्**' इत्यनेन सर्वासां विभक्तीनां ग्रहणन्तु स्यात्, प्रातिपदिकानाम् अर्थतन्त्रत्वात्। तथापि सूत्रे विधिशब्दोपपादानन्तु **उत्तरपदलोपो यथा विज्ञायेत**, **अलमाश्रयते इति अलाश्रयः, अलाश्रयः विधिः अल्विधिः।** अनेन यत्र प्राधान्येन अप्राधान्येन वा अलाश्रयविधिः तत्र स्थानिवत्त्वप्रतिषेधः भवति। प्राधान्येन अलाश्रयविधेः उदाहरणम् – **क इष्टः** इत्यत्र **हशि च**[७]इत्यनेन उत्वकरणे हश्-रूपि-अल् साक्षादाश्रयते, अत एव प्राधान्येन अलाश्रयणात् स्थानिवत्त्वनिषेधः। निषेधे सति उत्वं न स्यात्। अप्राधान्येन अलाश्रयविधेः उदाहरणम् – **प्रदीव्य** इत्यत्र **आर्धधातुकस्येड्वलादेः**[८]इत्यनेन वलादि-आर्धधातुके परे इडागमः भवति। अत्र वल्-रूपि-अल् विशेषणत्वेन आश्रीयते, प्रधानन्तु आर्धधुकपदमस्ति। अत्रापि स्थानिवत्त्वप्रतिषेधः प्रवर्त्तते। अत एव ल्यपि क्त्वा-प्रत्ययस्य अतिदेशाभावात् वलाद्यभावात् न इट्।

5. **सूत्रवैय्यर्थ्यविमर्शः –** स्थानिनः आदेशो भिन्नः इति कारणेन स्थानिकार्य्यमादेशे न प्राप्नोति, तदर्थं सूत्रस्य आवश्यकता वर्त्तते। यथा – आङो यमहनः इति सूत्रेण हन्-धातोः आत्मनेपदं भवति, तद् आत्मनेपदं हन्-स्थानिकादेशस्य वधस्य न प्राप्नोति अतः सूत्रं कर्त्तव्यम्। यथा – लोके **गुरुवद् गुरुपुत्रे वर्त्तितव्यम्** इति नियमेन गुरोः प्राप्तानि शुश्रूषादिकार्य्याणि गुरुपुत्रस्यापि प्राप्नुवन्ति। किन्तु लोके वचनमन्तरेणापि तत्स्थानापत्त्या तद्धर्मलाभो दृश्यते। यथा – उपाध्यायस्य शिष्यः उपाध्यायस्य प्रतिनिधिरूपेण याज्यकुलानि गत्वा अग्रासनादीनि सत्कारादिञ्च लभते, तथैव शास्त्रेऽपि लोकसिद्धत्वात् एव स्थानिनः स्थाने जायमानस्य आदेशस्यापि स्थानिकार्य्याणि प्राप्नुवन्ति। तथाप्यस्य लोकन्यायस्य **उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते** इत्यस्य बाधकं भवति पाणिनेः सूत्रम् – **स्वं रूपं शब्दस्याशब्दसञ्ज्ञा**[९]इति। अस्यार्थो वर्त्तते – शब्दस्य स्वं

---

[६]अष्टाध्याय्यां 1/4/14

[७]अष्टाध्याय्यां 6/1/114

[८]अष्टाध्याय्यां 7/2/35

[९]अष्टाध्याय्यां 1/1/68

रूपमेव गृह्यते शब्दसञ्ज्ञां विहायेति। तेन **आङो यमहनः**[१०]इत्यनेन हन्-धातोः एव आत्मनेपदं प्राप्नोति, न तु आदेशस्य वधस्य।

आदेशः स्थानिवत् भवतीति आचार्य्यव्यवहारेण ज्ञातुं शक्नुमः, यथा - पाणिनिना सूत्रं रचितम् – **युष्मदस्मदोरनादेशे**[११] इति। अस्यार्थः – युष्मदस्मदोः आत् स्यात् अनादेशे हलादौ विभक्तौ परे। यथा – **युष्मद् भिस्** इत्यत्र भिस् इति अनादेशविभक्तिः वर्त्तते अत एव आत् भवति – युष्माभिः इति रूपं सिद्ध्यति। किन्तु **युष्मद् ङसि** अत्र ङसिविभक्तेः स्थाने अत्-आदेशो भवति तेन आदिष्टविभक्तिः अस्ति अत् विभक्तिः तस्मिन् परे आत् न प्राप्नुयात्। वयं जानीमः – **प्राप्तौ सत्यां निषेधः** इति। अत्र स्पष्टं प्रतीयते यत् आदेशे सत्यपि आत्वप्राप्तिः भवति इति पाणिन्याचार्य्याः मन्यन्ते। अत एव **अनादेशे** इति निषेधः विहितः। अनेन ज्ञापकेन बुद्ध्यते यत् आदेशः स्थानिवत् भवतीति। **अनल्विधौ** इति प्रतिषेधकरणार्थं सूत्रमिदं प्रारब्धमित्यपि न वक्तव्यम्। अत्रापि आचार्य्यपाणिनेः व्यवहारः एव प्रमाणम्। सूत्रमस्ति – **अदो जग्धिर्ल्यप्ति किति**[१२] इति। अस्यार्थः – अदो जग्धिः स्यात् ल्यपि तादौ किति च। इदमत्र बोध्यम् – **समासेऽनञ्पूर्वे क्त्वो ल्यप्**[१३]इत्यनेन अनञ्पूर्वकसमासे क्त्वा-प्रत्ययस्य ल्यप् आदेशो भवति। क्त्वा इति प्रत्ययः तकारादिः कित्प्रत्ययश्च वर्त्तते। ल्यप्प्रत्ययः क्त्वाप्रत्ययस्य स्थाने एव भवति अत एव स्वतः क्त्वाप्रत्ययस्य धर्मौ तकारादित्वं कित्वञ्च ल्यपि अपि आगच्छति। किन्तु **अदो जग्धिर्ल्यप्ति किति** इत्यस्मिन् सूत्रे पृथक्तया ल्यपि ग्रहणं यत्कृतम्, तेन ज्ञायते स्थानिवद्भावः अल्विधौ न भवतीति। यतो हि तकारादित्वम्, कित्त्वञ्च उभयेऽपि अल्-रूपिणी धर्मे वर्त्तेते। अतः तकरादौ किति इति ग्रहणेन ल्यप्प्रत्ययस्य ग्रहणं न स्यात् इति आचार्य्यपाणिनिवर्य्याः मन्यन्ते। तस्मात् ल्यपि इति पृथग्ग्रहणं कृतम्। एवम्प्रकारेण महाभाष्यकारेण सूत्रमिदं प्रत्याख्यातम्।

6. **सामान्यातिदेशे विशेषस्याप्यतिदेशविमर्शः** – आरभ्यमाणेऽप्यस्मिन् सूत्रे **अनल्विधौ** इति ग्रहणं व्यर्थम्। अत्र अनल्विधौ इत्यस्य सार्थकतोपपादनाय भाष्यकारेणाह – प्राधान्येन अप्राधान्येन यत्र अल्ग्रहणं तत्र निषेधः यथा स्यात् तदर्थम् अनल्विधौ इति ग्रहणम् आवश्यकम्। अत्र अप्राधान्येन इत्यस्योदाहरणम् अस्ति – प्रदीव्य इति। अत्र आर्धधातुकस्येड्वलादेः इत्यनेन अल्-रूपि वल् विशेषणत्वेन अप्राधान्येन गृहीतत्वात् अत्रापि स्थानिवद्भावस्य निषेधार्थम् अनल्विधौ इति ग्रहणमुक्तम्। **अनल्विधौ** इत्यस्य वैय्यर्थ्यमेवं प्रत्यपादि भाष्यकारैः - प्रदीव्य इत्यत्र इट्-प्राप्तिरेव नास्ति। यतो हि ल्यप् इति प्रत्ययः वल्-आदिः नास्ति, यकारस्य वल्-प्रत्याहारे ग्रहणाभावात्।

---

[१०]अष्टाध्याय्यां 1/3/28

[११]अष्टाध्याय्यां 7/2/86

[१२]अष्टाध्याय्यां 2/4/36

[१३]अष्टाध्याय्यां 7/1/37

न च **स्थानिवदादेशः** इति सूत्रारम्भात् प्राप्नोतीति वक्तव्यम्। **सामान्यातिदेशे हि विशेषानतिदेशः**[१४] इति नियमात्। अर्थात् सामान्यधर्म्मस्य अतिदिश्यमाने सति विशेषधर्म्मस्य अतिदेशो न भवति। तद्यथा – **ब्राह्मणवत् अस्मिन् क्षत्रिये वर्तितव्यम्** इति कथनेन सामान्यं यत् कार्य्यं ब्राह्मणस्य यथा – पठनपाठनादिधर्माः, तेषामेव क्षत्रिये अतिदेशः न तु माठरकौण्डिन्यमिति ब्राह्मणविशेषधर्माः। तथैव ल्यप्-प्रत्ययेऽपि स्थानिवत्त्वेन सामान्यधर्माः – कृत्वम्, अव्ययत्वम्, प्रत्ययत्वम् इत्यादयः एव अतिदिश्यन्ते। किन्तु विशेषधर्माणाम् – कित्वम्, वलादित्वम्, तकारादित्वञ्च एतेषाम् अतिदेशो न भवति। अतः स्थानिवत्त्वेऽपि इडागमस्य अप्रसक्तिरेवास्ति, तस्मात् **अनल्विधौ** इति ग्रहणं व्यर्थमेव। प्रसङ्गेऽस्मिन् सिद्धान्ती विशेषधर्म्मस्य अनतिदेशे दूषणं वदन् अनल्विधौ इत्यावश्यकतां प्रतिपादयति। **सामान्यातिदेशे विशेषस्याप्यतिदेशो भवतीति**न स्वीक्रियते चेत् अग्रहीत् इत्यत्र **इट ईटि**[१५] इत्यनेन सिचः लोपो न प्राप्नोति। **अग्रहू इ स् ई त्** इत्यवस्थायां **ग्रहोऽलिटि दीर्घः**[१६] इत्यनेन इडागमस्य दीर्घे सति **अग्रहू ई स् ई त्** इति भवति। अस्यां स्थितौ **इट ईटि** इत्यनेन इटः परस्य सकारस्य ईटि परे लोपः प्राप्नोति। अत्र इटः दीर्घविधानत्वात् स्थानिवत्त्वेन सामान्यधर्माः अच्त्वम्, इत्वञ्चागच्छन्ति, न तु विशेषधर्माः इट्त्वम्। अत एव सकारलोपः न भवेत् इति दोषः सम्पद्येत। तस्मात् अनल्विधौ इति ग्रहणेन सामान्यातिदेशे विशेषस्यापि अतिदेशः स्वीकरणीयः। एवञ्च सामान्यातिदेशे विशेषधर्मस्याप्यतिदेशत्वात् अनल्विधौ इत्यंशः सार्थकः एव।

7. **स्थान्यलाश्रयणे एव स्थानिवद्भावप्रतिषेधविमर्शः** – अनल्विधौ इत्यनेन अविशेषेण आदेशस्य स्थानिनश्च अलाश्रयणे स्थानिवद्भावस्य प्रतिषेधं स्वीकुर्मश्चेत् सुप्तिङ्कृत्सु स्थानिवद्भावस्य उपसङ्ख्यानं कर्त्तव्यम्।

सुप् – वृक्षाय, प्लक्षाय। **वृक्ष ङे** इत्यवस्थायां **ङेर्यः**[१७] इत्यनेन यादेशः। **वृक्ष य** इति स्थितौ **सुपि च**[१८] इत्यनेन दीर्घविधानाय यादेशे सुस्वम्, यञादित्वञ्च आवश्यकम्। अत्र स्थानिवद्भावेन सुस्वम् आगच्छति, यञादित्वन्तु यादेशे अस्त्येव। तथापि स्थानिवद्भावनिषेधः प्राप्नोति। यतो हि दीर्घविधौ यञ्-रूपि अलमाश्रीयते, स च अल् आदेशस्य (यादेशस्य) अस्ति। अत एव अविशेषेण आदेशस्य स्थानिनश्च अलाश्रयणे स्थानिवद्भावनिषेधः। किन्तु इष्यते च स्थानिवद्भावः अत्र। अत एव **सुस्वाय स्थानिवद्भावस्योपसङ्ख्यानं** कर्त्तव्यं भवति।

---

[१४]महाभाष्ये प्रकृतसूत्रे

[१५]अष्टाध्याय्यां 8/2/28

[१६]अष्टाध्याय्यां 7/2/37

[१७]अष्टाध्याय्यां 7/1/13

[१८]अष्टाध्याय्यां 7/3/102

तिङ् – अरुदिताम्, अरुदितम्, अरुदित। **अ रुद् तस्** इत्यवस्थायां **तस्थस्थमिपां तान्तन्तामः**[१९] इत्यनेन तसः स्थाने तामादेशे सति **अ रुद् ताम्** इति स्थितौ **रुदादिभ्यः सार्वधातुके**[२०] इत्यनेन वलादिसार्धधातुके परे इडागमः इष्टः। अत्र ताम् इति आदेशे वलादित्वं वर्त्तते, किन्तु सार्वधातुकत्वं नास्ति अतः स्थानिवत्त्वेन सार्वधातुकत्वमानयामः। किन्तु अत्रापि स्थानिवद्भावस्य प्रतिषेधः प्राप्नोति। आदेशस्य वलादित्वमादाय इडागमविधिः क्रियते। अत एव **तिङ्त्वाय स्थानिवद्भावस्योपसङ्ख्यानं** वक्तव्यं भवति।

कृत् – भुवनम्, सुवनम्, धुवनम्। भूधातोः औणादिकक्युन्प्रत्यये सति **भू यु** इति स्थिते **युवोरनाकौ**[२१] इत्यनेन अनादेशे सति **भू अन** इत्यवस्थायाम् **अचि श्नुधातुभ्रुवाम्**[२२] इत्यनेन अचि परे कृत्प्रत्ययस्य अचि परे उवङादेशः प्राप्नोति। अत्रापि कृत्वं स्थानिवद्भावेन इष्यते। किन्तु अविशेषेण अलाश्रयणे स्थानिवद्भावप्रतिषेधे सति उवङादेशो न स्यात्। अत एव **कृत्वाय स्थानिवद्भावस्योपसङ्ख्यानं** कर्त्तव्यं भवति।

- **स्थानिनः अलाश्रयणे स्थानिवद्भावः प्रतिषेधः – अयमेव सिद्धान्तपक्षः।** यत्र स्थानिनः अलमाश्रित्य स्थानिवद्भावः, तत्रैव अनल्विधौ इत्यनेन प्रतिषेधो भवति। अस्मिन् पक्षे केचन दोषाः तेषाञ्च समाधानमपि अत्र प्रदर्शितं वर्त्तते।

1) **कुरु –** कृधातोः लोड्लकारस्य मध्यमपुरुषस्य प्रथमवचने रूपमिदं सिद्ध्यति। अत्र **कर् उ** इत्यवस्थायां **अत उत् सार्वधातुके**[२३] इत्यनेन उकारे सति **कुर् उ** इति स्थितौ स्थानिवत्त्वात् कृत्वमादाय **यस्मात्प्रत्ययविधिः**[२४] इत्यनेन अङ्गसञ्ज्ञायां **पुगन्तलघूपधस्य च**[२५] इत्यनेन लघूपधस्य उकारस्य स्थाने गुणः प्राप्नोतीति दोषः।

समाधानम् – अत उत् सार्वधातुके इत्यत्र ह्रस्व-अकारस्य स्थाने स्वतः एव ह्रस्व-उकारः प्राप्नोति। तथापि पुनः सूत्रे तपरकरणं कृतम्। अनेन ज्ञायते उकारस्य उकारः एव तिष्ठति, तस्य गुणादिकं न भवतीति। एवम्प्रकारेण गुणरूपदोषः नास्ति।

2) **वधकः –** हन्-धातोः ण्वुल्प्रत्यये सति **हन् वु** इति स्थितौ **युवोरनाकौ** इत्यनेन अकादेशे **हन् अक** इत्यवस्थायां **बहुलं तणि**[२६] इति वार्त्तिकेन वध्-आदेशे सति **वध् अक** इति स्थितौ

---

[१९]अष्टाध्याय्यां 3/4/101

[२०]अष्टाध्याय्यां 7/2/76

[२१]अष्टाध्याय्यां 7/1/1

[२२]अष्टाध्याय्यां 6/4/77

[२३]अष्टाध्याय्यां 6/4/110

[२४]अष्टाध्याय्यां 1/4/13

[२५]अष्टाध्याय्यां 7/3/86

[२६]औणादिकसूत्रम्

स्थानिवत्त्वात् हन्त्वमादाय **यस्मात्प्रत्ययविधिः०** इत्यनेन अङ्गसञ्ज्ञायां **अत उपधायाः**[२७]इत्यनेन उपधायाः अकारस्य स्थाने वृद्धिः प्राप्नोतीति दोषः।

समाधानम् – अत्र हन्-धातोः ण्वुल्प्रत्ययः नास्ति। किन्तु **हनो वध च**[२८] इत्यनेन क्वुन्-प्रत्ययः वधादेशश्च विधीयते। अतः अत्र कित्वात् **क्ङिति च**[२९] इत्यनेन वृद्धिनिषेधः। एवम्प्रकारेण वृद्धिरूपदोषः नास्ति।

3) **पिब –** पाधातोः लोड्लकारस्य मध्यमपुरुषस्य एकवचने रूपमिदं सिद्ध्यति। **पा शप् सि** इत्यवस्थायां **पाघ्राध्मादाम्णा०**[३०] इत्यनेन पिबादेशे, सिस्थाने हिः, तस्यापि लोपे सति **पिब् अ** इति स्थितौ स्थानिवत्त्वात् पात्वमादाय **यस्मात्प्रत्ययविधिः०** इत्यनेन अङ्गसञ्ज्ञायां **पुगन्तलघूपधस्य च** इत्यनेन लघूपधस्य उकारस्य स्थाने गुणः प्राप्नोतीति दोषः।

समाधानम् – अत्र पिब् इति हलन्तः बकारान्तादेशः नास्ति। अपितु पिब इति अकारान्तादेशः वर्त्तते। अनेन उपधायां लघ्वक्षराभावे गुणः अपि न प्राप्नोति। एवम्प्रकारेण गुणरूपदोषः नास्ति।

8. **एकदेशविकृतस्योपसङ्ख्यानमिति वार्त्तिकविमर्शः –** पचतु, पचन्तु इत्यत्र **एरुः**[३१] इत्यनेन इस्थाने उ-आदेशो भवति। तथा च **सुप्तिङन्तं पदम्** इत्यनेन तिङन्तस्य पदसञ्ज्ञा क्रियते। पचतु इत्यत्र तु इति तिङ् नास्ति, ति एव तिङ् वर्त्तते। एवञ्च आदेशः स्थानिवदितिप्रकृतसूत्रेण स्थानिवत्त्वमपि न प्राप्नोति, अत्र स्थानी – इ अस्ति, आदेशस्तु उ वर्त्तते। किन्तु एषितव्य-ति इति स्थानी नास्ति। अत एव पृथक्तया वार्त्तिकमावश्यकम् – **एकदेशविकृतस्योपसङ्ख्यानम्** इति।अत्र एकदेशी आक्षिपति – **समुदाये आश्रीयमाणे अवयवः न आश्रीयते** इति न वक्तव्यम्। अर्थात् अवयवः समुदायस्य अन्तर्भूतो भवति। तिप्समुदाये तकारः, इकारश्च उभयौ अपि समायातः। तिङ्त्वविशिष्ट-इकारस्थानिक-उकारे अपि तिङ्त्वं भवत्येव। अत्र पदसञ्ज्ञायाम् इकारस्यापि आश्रयणात् अल्विधिः भवति, तस्मात् अनल्विधौ इत्यनेन निषेधः प्राप्नोति इति। किन्तु नास्त्येतत् साधु, एवं स्वीक्रियमाणे सति न कश्चित् अनल्विधिः भवितुमर्हति। सर्वत्रैव अल्विधेरेव प्रसक्तिर्भवेत्। अत एव यत्र प्राधान्येन साक्षात् अलाश्रयणं क्रियते तत्रैव अलाश्रयविधिः। अत्र पदसञ्ज्ञायान्तु तिङन्तमाश्रीयते, न तु इकारः इति न दोषः। **अथवा** आदेशग्रहणस्य प्रयोजनं पूर्वमुक्तम् – **आदेशमात्रं स्थानिवत् यथा स्यादिति।** अर्थात् साक्षात् निर्दिष्टाः आदेशाः, आनुमानिकाश्च सर्वेऽपि आदेशाः स्थानिवत्त्वं प्राप्नुवन्ति। सम्पूर्णस्य

---

[२७]अष्टाध्याय्यां 7/2/116

[२८]औणादिकसूत्रम्

[२९]अष्टाध्याय्यां 1/1/5

[३०]अष्टाध्याय्यां 7/3/78

[३१]अष्टाध्याय्यां 3/4/86

स्थाने, एकदेशस्य अवयवस्य स्थाने वा जायमानः आदेशः एव भवति। अतः ति इत्यस्य स्थाने तु इति आनुमानिकमपि आदेशः एव। अस्य स्थानिवद्भावात् पदसञ्ज्ञा भवति। अत एव **एकदेशविकृतस्योपसङ्ख्यानम्** इति वार्त्तिकस्य आवश्यकता नास्ति। छिन्ने पुच्छे शुनि श्वत्वव्यवहारः यथा भवति, तथैव एकदेशस्य विकृते सत्यपि तु इत्यस्य तिङ्त्वं न नश्यति।

9. **शब्दस्य नित्यत्वपक्षे स्थानशब्दविमर्शः –** छिन्ने पुच्छे शुनि श्वत्वव्यवहारः इति लोकन्यायात् अत्रापि तु इति एकदेशस्य इकारस्य स्थाने प्राप्तविकृतस्य उकारस्यापि तिङ्त्वं न नश्यतीति स्वीक्रियते चेत् शब्दानां नित्यत्वहानिः भवति। यतो हि नित्येषु शब्देषु विकारः नोपपद्येत। तथा च शब्दानां नित्यत्वात् स्थान्यादेशभावोऽपि नोपपद्येत। स्थानी नाम यः भूत्वा न भवति। आदेशः नाम यः अभूत्वा भवति। नित्येषु शब्देषु विनाशः प्रादुर्भावश्च न भवेत्। दोषोऽयं निराकर्तुं वार्त्तिकद्वयं समाधानरूपेण प्रदत्तम् –

   1) **सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात् –** शब्दः नित्यः इति सिद्धान्तः। अतः स्थानिम् अपहार्य आदेशविधाने नित्यत्वमपि शब्दस्य हन्यते। अत एवात्र उच्यते भाष्यकारैः – स्थानशब्दः प्रसङ्गवाचकोऽस्ति। अस्य लोके वेदे च नित्यवस्तूनामपि बहुषु उदाहरणानि सन्ति। यथा – उपाध्यायस्य स्थाने शिष्यः पूजनीयः इति। अत्र उपाध्यायस्य प्रसङ्गे शिष्यस्य पूजा भवति। न तु उपाध्यायं संस्थाप्य तस्य अपाकरणं क्रियते। अत्र स्वतन्त्ररूपेणैव शिष्यस्य पूजनं क्रियते। एवं वैदिकमुदाहरणमपि प्रदत्तं भाष्यकारैः – सोमस्य स्थाने पूतीकतृणानि अभिषुणुयात् इति। अत्रापि यज्ञयागादौ सोमलतायाः असन्निधौ, तेषां प्रसङ्गे पूतीकतृणानि प्रतिनिधीयन्ते।
   2) **कार्यविपरिणामाद्वा सिद्धम् –** कार्या नाम ज्ञानम्। कार्यस्य ज्ञानस्य विपरिणामात् स्थानशब्दप्रयोगः सम्भवः। यथा – **ग्रामात् पूर्वस्मिन् दिशि आम्रवृक्षाः सन्ति** इति श्रुत्वा श्रोतुः आम्रबुद्धिः प्रसक्ता। ततः पश्चात् अस्यां दिशि ये **क्षीरिणः अवरोहवन्तः पृथुपर्णयुक्ताः ते न्यग्रोधाः** इति संश्रुत्य आम्रबुद्ध्यां न्यग्रोधबुद्धिः प्रतिपद्यते। अत्र आम्रवृक्षाणाम् अपकर्षणम्, न्यग्रोधवृक्षाणाम् उपाधानञ्च न भवति। स्वस्वस्थाने आम्रवृक्षाः, न्यग्रोधवृक्षाश्च नित्याः एव। अत्र ज्ञाने एव अपकर्षः उपाधानञ्च आरोप्यते। तथैव अस्मिन् व्याकरणेऽपि आचार्यैः सामान्यरूपेण सत्तार्थे अस्-धातोः उपदेशः कृतः। अनन्तरम् **अस्तेर्भूः**[३२] इत्यनेन आर्धधातुकविषये भूधातोः प्रयोगः भवति इति उपदिष्टः। अत्र अस्ति, भवति इति उभयौ अपि नित्यौ एव स्तः। ज्ञाने एव विपरिणामः।

[३२]अष्टाध्याय्यां 2/4/52

10. **स्थानिवत्त्वात् अपवादस्थलेष्वपि उत्सर्गकार्यप्राप्तिः तन्निराकरणञ्च –** ज्ञाने एव परिणामो भवति। एवञ्च अस्-धातोः सामान्यतया प्रयोगः भवेत्, आर्धधातुकविषये तु भूधातोश्च प्रयोगः इति ज्ञानविपरिणामः एव इति स्वीक्रियते चेत् सर्वत्र अपवादस्थले उत्सर्गकार्यं प्राप्नोति। यथा – **कर्मण्यण्**[३३] इत्यनेन कर्मणि उपपदे अण्प्रत्ययः इति सामान्यनियमः। इदानीं **आतोऽनुपसर्गे कः**[३४] इत्यनेन अनुपसर्गे कर्मणि उपपदे आकारान्तधातोः कप्रत्ययः इति विशेषनियमः। अत्र अण्प्रत्ययस्य ज्ञाने कप्रत्ययस्य ज्ञानं भवतीति अण् – स्थानी, क इति आदेशः भवति। तथा च स्थानिवत्त्वात् कप्रत्यये सत्यपि अण्-प्रत्ययस्य कार्यं वृद्ध्यादिकं प्राप्नोति इति दोषः। दोषोऽयं समाहर्तुं समाधानत्रयं भाष्ये प्रदर्शितम्।

   1. **विषयेण तु नानालिङ्गकरणात् सिद्धम् –** अण्, क इति उभयत्र णकारः, ककारश्च अनुबन्धः। अस्मात् नानालिङ्गकरणात् बुद्ध्यते यत् अपवादप्रत्ययस्थले उत्सर्गप्रत्ययकार्यं न भवतीति।
   2. **सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् –** षष्ठीविभक्त्या निर्दिष्टस्य आदेशस्यैव स्थानिवद् भवति। यथा – **हनो वध°** इति अत्र हन्-धातोः स्थाने वधादेशः विहितः। हनः इति षष्ठीविभक्त्या निर्दिष्टः, तस्य स्थाने वधादेशः, अत एव वधस्यैव स्थानिवद्भावः। किन्तु **आतोऽनुपसर्गे कः** इत्यत्र कप्रत्ययस्य उद्देश्यः षष्ठीनिर्दिष्टः नास्ति, अपितु आतः इति पञ्चमीविभक्त्या निर्दिष्टोऽस्ति। अत एव न स्थानिवद्भावदोषः। प्रकृतसूत्रे षष्ठीनिर्दिष्टस्य आदेशस्य इति अर्थबोधनाय **षष्ठी स्थानेयोगा**[३५] इत्यस्मात् षष्ठी इत्यस्य अनुवृत्तिः आयाति। इष्टार्थः सुलभः।
   3. **आचार्यप्रवृत्तिः एव ज्ञापकम् –** महर्षिपाणिनिना **कर्त्तरि शप्**[३६] इति उत्सर्गसूत्रं कृतम्। अस्यैव अपवादसूत्राणि सन्ति – **दिवादिभ्यः श्यन्**[३७]**, क्र्यादिभ्यः श्ना**[३८] इत्यादीनि। यदि अपवादस्थले उत्सर्गकृतं प्राप्नोति चेत् शप् इत्यत्र शित्त्वं स्थानिवद्भावेन श्यन्, श्ना इत्यत्रापि प्राप्नुयात्। तथापि पाणिन्याचार्याः शित्त्वं कुर्वन्ति, अनेन शित्करणेन ज्ञायते यत् उत्सर्गकृतकार्याणि अपवादे न प्राप्नुवन्तीति।

---

[३३]अष्टाध्याय्यां 3/2/1

[३४]अष्टाध्याय्यां 3/2/3

[३५]अष्टाध्याय्यां 1/1/49

[३६]अष्टाध्याय्यां 3/1/68

[३७]अष्टाध्याय्यां 3/1/69

[३८]अष्टाध्याय्यां 3/1/81

उपसंहारः

स्थानिवदादेशोऽनल्विधौ इति सूत्रं भाष्यकारेण प्रत्याख्यातम्। आचार्य्यपाणिनेः सूत्ररूपप्रवृत्त्यैव सूत्रार्थोऽयं लभ्यते। तद्यथा - स्थानिवदादेशः इत्यंशः **युष्मदस्मदोरनादेशे** इत्यनेन सूत्रेण, अनल्विधौ इत्यंशः **अदो जग्धिर्ल्यप्ति किति** इत्यनेन च सूत्रेण अवगम्यते। अत एव सूत्रान्वाख्यानं व्यर्थम् इति प्रत्यपादि भाष्यकारैः। आरभ्यमाणे सत्यप्यस्मिन् सूत्रे सामान्यातिदेशे सति विशेषधर्मस्याप्यतिदेशत्वात् अनल्विधौ इत्यंशः सार्थकः एवेति भाष्यकारस्याशयः विज्ञायते। एवञ्च लोके छिन्ने पुच्छे शुनि श्वत्वव्यवहारः इति प्रसिद्धत्वादेव एकदेशस्य विकृते सत्यपि ति इति प्रत्ययस्य स्थाने आदिष्टस्य तु इत्यस्य तिङ्त्वं न नश्यति इति सिद्ध्यति। एतदर्थम् **एकदेशविकृतस्योपसङ्ख्यानम्** इति वार्त्तिकस्य आवश्यकता नास्ति।

सहायकग्रन्थसूची

1. व्याकरणमहाभाष्यम्, सम्पादकः – श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथमसंस्करणम्, 1938
2. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प० ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005
3. परिभाषेन्दुशेखरः, हिन्दीव्याख्याकारः – आचार्यविश्वनाथमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, प्रथमसंस्करणम्, 2014
4. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च – प्रो० बोधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, 2018
5. लघुशब्देन्दुशेखरः, सम्पादकः – प्रो० बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, 2013
6. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, 2003
7. तत्त्वबोधिनीसमाख्यव्याख्या संवलिता सिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, 2010

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

श्रीमद्भगवद्गीतायां कर्तव्याकर्तव्यस्य परिशीलनम्

डॉ. गीताञ्जली नायक[१]

प्रस्तावना

विश्वस्मिन्नस्मिन् मानववादस्य परमोद्घोषकः प्रेममय-लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य मुखारविन्दात् श्रीमद्भगवद्गीतायारुत्पत्तिः। आर्यचेतना, दर्शनं, ज्ञानं तथा विज्ञानम् एतेषां परिपूर्णरूपं गीतायां परिलक्ष्यते। तेनैव गीता सर्वशास्त्रशिरोमणिः इति नाम्ना प्रथते। महाभारतस्य विश्वविख्यातटीकाकारः नीलकण्ठसूरिणोक्तं यत् –

भारते सर्व वेदार्थो भारतार्थश्च कृत्स्नशः।
गीतायामस्ति तेनेयं सर्वशास्त्रमयी गीता॥

अर्थात् महाभारते सर्वेषां वेदानां सारार्थः संगृहीतः। तथा समस्तस्य महाभारतस्य सारतत्त्वं गीतायां विद्यते। तेनैव गीता सर्वशास्त्रमयीति निगद्यते। न केवलमेतत् प्रस्थानत्रये गीतापि अन्तर्भवत्येव। आदिभगवत्पादः शङ्करचार्यः अस्याः गीतायाः उपरि भाष्यमपि व्यलिखत्। तस्याः भगवतः श्रीकृष्णस्य मुखनिसृतायाः गीतायाः माहात्म्यविषयेऽपि उच्यते यत् –

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्मात् विनिसृता॥

कलियुगेऽस्मिन् प्रायः सर्वे मानवाः पथभ्रष्टाः नष्टचरित्रयुक्ताश्च अभूवन्। तेन वक्तुं शक्यते यत् यदि सर्वे गीतागङ्गोदकं पीत्वा तत्र निरूपितानाम् अमृतानाम् आस्वादनपूर्वकं गीतोपदेशस्य परिपालनं विधास्यन्ति तर्हि समुचितनागरिकस्य निर्माणं तेन च समुचितराष्ट्रस्य निर्माणं सम्भवति। तेनैव शोधपत्रेऽस्मिन् कश्चन लघुप्रयासः विधीयते। प्रसङ्गेऽस्मिन् उक्तं यथा –

गीता गङ्गोदकं पीत्वा पुनर्जन्म न विद्यते॥

---

[१] Assistant Professor, Dept.of Second Language, Villa Marie Degree College for Woman, Hyderabad (Telengana State) 500082

शोधपत्रस्यास्य उद्देश्यम्

वैदिककालात् प्रभृतिः अद्यावधिं यावत् यानि यानि काव्यानि रामायणमहाभारतादीनि विरचितानि सन्ति तत्र सर्वत्र बहवः उपदेशाः तथा मानवस्य कृते कर्तव्याकर्तव्यानि निर्दिष्टानि सन्ति। तेन च प्रवृत्तिनिवृत्त्युपदेशा अपि समुपलभ्यन्ते। यथा रामायणे – **रामादिवत् प्रवर्तितव्यं न रामणादिवदिति॥**अनेन रामस्य मार्गः अनुसर्तव्यः , न तु रावणस्य इति सदुपदेशः रामायणात् लभ्यते। तथैव यदि महाभारतस्य परिशीलनं कुर्मस्तर्हि यत्र यत्र धर्मः तत्र तत्र विदयप्राप्तिः अवश्यमेव भविष्यतीति सदुपदेशः प्राप्यते। येन मानवाः सर्वेऽपि करणीयकार्येषु प्रवृत्ताः तथा अकरणीयेकार्येषु निवृत्ताः भवेयुः। एवञ्च अन्येषु पुराणादिष्वपि तथैव कर्तव्याकर्तव्योपदेशः सुलभोऽस्ति। तथाहि श्रीमद्भगवद्गीतायामपि कुत्र कथं केन च प्रकारेण कर्म कर्तव्यमस्ति येन मानवजीवनं सुखतरं भवतीति निर्दिष्टमस्ति। तदेव शोधपत्रेऽस्मिन् परशीलनं कर्तुं कश्चन लघुप्रयासः विहितः। येन अस्यां गीतायामपि सर्वे मानवाः प्रवृत्ताः यत्नशीलाश्च भवेयुः।

गीतायां कर्तव्याकर्तव्यानाम् उपदेशाः

भगवता श्रीकृष्णेन अर्जुनस्य कृते स्वजीवनस्य सफलतायै, मानवकल्याणाय तथा मानवानां कर्तव्याकर्तव्यविषये यत्र सदुपदेशः विहितः सः गीताग्रन्थः। श्रीमद्भगवद्गीतायां बहुषु श्लोकेषु मानवैः किं किं कर्तव्यं, किञ्च न कर्तव्यं तथा तेन को लाभः? का वा हानिरिति विषये निरूपितमस्ति। सदा धर्मकार्येषु मानवानां प्रवृत्तिः भवेत् न तु अधर्मकार्येषु इत्येव प्रमाणयितुम् भगवता निर्दिष्टं यत् –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ 1

अत्र सुस्पष्टमेव प्रतीयते यत् मानवैः धर्मकार्येषु प्रवृत्ताः तथा अधर्मकार्येषु निवृत्ताः भवेयुः। अन्यथा प्रतियुगं भगवान् एकमवतारं स्वीकृत्य सज्जनानां संरक्षणं दुष्टानां च संहारं करिष्यति।

भगवान् श्रीकृष्णः काम-क्रोध-लोभ-मोहादिकं त्यक्तुमेव मानावानां कृते सदुपदिष्टम्। यदि मनुष्यः कामक्रोधादिषु लीनो भवति तर्हि तस्य मरणं सुनिश्चितमेव। तस्य कृते नरकस्य द्वारं भवति। कस्यापि

अनित्यस्य पदार्थस्योपरि अस्माकम् आकर्षणमपि नैव भवेत्। प्रसङ्गेऽस्मिन् उक्तमेव श्रीमद्भगवद्गीतायां द्वितीयाध्याये –

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते॥

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रभवति॥2

अनेन श्रीकृष्णस्य वचनेन साक्षात् वक्तुं शक्यते यत् मानवाः कामक्रोधादिषु तथा संसारविषयेषु आसक्ताः नैव भवेयुः।

श्रीमद्भगवद्गीतायां द्वितीयाध्याये श्रीकृष्णेन इतोप्युक्तं यत् यः मनुष्यः सम्पूर्णरूपेण कामनां विहाय निःस्पृहरूपेण निरहङ्कारेण च आचरणं विदधाति सः सततं शान्तिमेव प्राप्स्यति। अतः मनुष्याः सदा अहङ्कारेण रहिताः कार्यं कुर्युः। येन तेषां कल्याणं भवेत्। प्रसङ्गेऽस्मिन् उक्तं यथा –

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥ 3

भगवान् श्रीकृष्णः मानवानां कृते समीचीनमेकं सदुपदेशं विदधाति यत् संसारेऽस्मिन् कुत्रापि कस्यापि जन्ममृत्युविषये चिन्ता दुःखं तथा आनन्दं नैव कर्तव्यम्। अर्थात् कस्यापि जन्मसमये (पुत्रप्राप्तौ) आनन्दं तथा मरणे दुःखं नैव कर्तव्यम्। यतो हि अत्र संसारे सर्वमपि चिरस्थायी नैवास्ति। सर्वे केवलं स्वकर्तव्यसम्पादनेन जीवनं यापयन्ति चेत् वरमेव। प्रसङ्गेऽस्मिन् उक्तं यथा–

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥ 4

एवमव्यक्तशब्दस्य जीव-परब्रह्म-प्रकृत्यर्थपरत्वं सप्रमाणं निषिध्य भूयश्च बादरायणसूत्रनिरूपणावसरेऽपि तस्य शरीरादयोऽर्थाऽपि निराकृताः। तत्राऽऽनुमानिकाधिकरण आदिम एव सूत्रे शरीररूपकविन्यस्तगृहीतेः इति सूत्रांशस्य विवर्णने 'इन्द्रियेभ्यो परा ह्यर्था' इत्यारभ्य 'सा काष्ठा सा परा गतिः' इत्यन्तो वाक्यगण एव सन्दर्भरूपेण स्वीकृतः। तथा चास्मिन्नेव प्रकरणे 'ऋतं पिबन्तौ सुकृतस्य लोके'[१९] इत्यारभ्योल्लिखितानि रूपकाणि संस्मृतानि, यथा "तत्रादौ 'यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्। अभयं तितीर्षतां पारं नाचिकेतं शकेमहि।।' (कठ.३/२) इत्यत्र पारमिति परमगन्तव्यदिव्यदेशरूपमक्षरं ब्रह्म, सेतुरिति तत्प्राप्तिमाध्यमभूतगुरुरूपं च तत्, तितीर्षतामिति च तदुपायानुष्ठाता प्रत्यगात्मा चेति रूपकभावत उपदिष्टम्।"[२०] ततश्च रथिरथसारथिप्रग्रहहयादिरूपकद्वारा आत्म-शरीरबुद्धिमनइन्द्रियादीनां यत् स्थानं कार्यं च प्रदर्शितं तदत्रोदलिख्यत।

एवं प्रकरणेऽस्मिन् विवर्णितानि सकलान्यपि रूपकाणि कथयित्वा तद्रूपकविन्यासग्रहणपुरःसरमव्यक्तशब्दस्य शरीरार्थकत्वं सोहापोहं निराकर्तुमाह "ननु पूर्वं शरीरमिति प्रधानमेवोक्तमुत्तरत्राऽव्यक्तमिति स्पष्टं परामृश्यत इति चेन्न, भोगायतनस्यैव तत्र प्रकृतत्वात् तदेव

---

[१८] ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम् - ३/३,४

[१९] कठोपनिषत् - ३/१

[२०] ब्रह्मसूत्रस्वामिनारायणभाष्यम् - १/४/१

प्रधानमिति कः सांख्यानुगो मनुते। ननु तर्हि भवतु भोगायतनमेव शरीरशब्देन पूर्वमुक्तमिहाऽव्यक्तशब्दवाच्यमिति चेत् कोऽयमन्यस्तर्ककुशलः। नैवं कापिला वदेयुः। शरीरस्थानेऽव्यक्तपदप्रयोगे हेतुर्वा प्रयोजनं वा वक्तव्यम्। तत्तु नास्ति। नन्वव्यक्तविकारविशेषत्वादेव तदव्यक्तशब्देनोच्यत इति चेद् इन्द्रियार्थमनोबुद्धयः कुतो नोक्ताः। एवं स्याद्, इन्द्रियादीनां पूर्वं रूपकविन्यस्तानामेवेह प्रत्यभिज्ञानात् शरीरशब्दाऽश्रवणाद् अव्यक्तशब्दश्रवणाच्च रूपकयोजनाबलेन परिशेषतया शरीरमेवाऽव्यक्तशब्दतयोच्यत इति निश्चीयत इति। तदप्यसद्, भोगायतन-लक्षणशरीरस्याऽव्यक्तशब्दाभिधेयत्वाऽप्रसिद्धेः। इत एव प्रसिद्धिरस्त्विति चेद् गत्यन्तराऽभावे ह्ययं पन्थाः समीचीनः। तर्हि प्रत्यभिज्ञानिबन्धनाया रूपकयोजनायाः का गतिरिति चेत्, तत्त्वत्रयमात्रवादिनामयं व्याधिः। भगवती श्रुतिस्तु तत्त्वपञ्चकोपदेष्ट्रीह तत्त्वत्रयातिरिक्तमेवाऽक्षरं ब्रह्माख्यं दिव्यतत्त्वमव्यक्तशब्देन प्रत्यभिजानाति। पूर्वं तद्रूपणं क्वोपलब्धमिति चेद् 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।' (कठ.३/२) इत्युक्तमेव प्राक्। न वेहाऽक्षरब्रह्मणः शरीरस्येवाऽव्यक्तशब्दाऽभिधेयत्वाऽप्रसिद्धिदोषाऽवकाशः, 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्' (गी.८/२१) इति तत्प्रसिद्धेः।"[२१]

एवं प्रमाणपुरःसरमव्यक्तशब्दस्यार्थं विधाय भूयश्च गीताप्रस्तावोऽपि प्रमाणत्वेन संगृह्योक्तं यद् "तथा च 'किं तद् ब्रह्म' (गी.८/१) इति पार्थजिज्ञासायाम् 'अक्षरं ब्रह्म परमम्' (गी.८/३) इति समाधाय तदेवाऽक्षरं ब्रह्म विशेषमुपदेष्टुं प्रतिज्ञातं 'यदक्षरं वेदविदो वदन्ति... तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये' (गी.८/११) इति। तदेवाक्षरं निरूपयता पुनस्तदव्यक्तशब्देनोपस्थापितम् 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥' (गी.८/२१) इति। अपरं च तत्रैव 'अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे' (गी.८/१८) इत्यादौ प्रकृतावव्यक्तशब्दं प्रयुज्याऽपि तदुत्तरमेव 'परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥' (गी.८/२०) इत्यनेन प्रकृतिवाचकाद् अव्यक्त-शब्दादक्षरब्रह्मवाचकमव्यक्तशब्दं पृथक्तया प्रयुज्य तमधिकृत्यैवाव्यक्तोऽक्षर इत्युक्त इत्युक्तम्। ततश्चैतच्छ्लोकाव्यवहितोत्तरमेव 'पुरुषः स परः पार्थ भक्त्या

---

[२१] ब्रह्मसूत्रस्वामिनारायणभाष्यम् - १/४/१

लभ्यस्त्वनन्यया' (गी.८/२२) इत्युक्तिः (अव्यक्तात् पुरुषः परः इति वचनसंगत्या) कठोक्तमव्यक्तमक्षरं ब्रह्मैव सुव्यक्तं प्रमाणयति।"[२२]

निर्णयः

अद्वैतदर्शने तु क्वचिद् रथरथिरूपकनिरूपितं पाञ्चभौतिकं शरीरमेव अव्यक्तशब्दार्थत्वेनोक्तं क्वचित् स्थूलशरीरारम्भकं भूतसूक्ष्मं गृहीतं क्वचिच्च परमेश्वराधीना जगत्कारणत्वेनाऽभ्युपगता प्रागवस्था स्वीकृता। तेषामभेदोपचारकथनेऽपि तात्पर्यनिर्णये उपक्रमोपसंहारादिलिङ्गैः परीक्षणद्वारा निर्णीयेत यद् भिन्नत्वेनार्थकरणाद् विदधाति तदर्थशैथिल्यम्। अभेदोपचारोऽपि केवलं पारमार्थिकदृष्ट्यैव, व्यवहारदृष्ट्या तु भेदेनैवोपचर्यते तेनैव च परापरत्वं सिद्ध्येत्।

विशिष्टाद्वैतदर्शनेऽपि प्रथमं शरीरमेवाऽव्यक्तशब्दार्थकत्वेन गृहीत्वा पुनः 'भूतसूक्ष्ममव्याकृतं हि अवस्थाविशेषमापन्नं शरीरं भवति' इति वचनेन भूतसूक्ष्मं स्वीकृतम्। अतः अत्राप्युपरोक्तानुसारमेव ज्ञेयम्।

अन्यच्च प्रायः शरीरादिन्द्रियाणि ततश्चाऽन्तःकरणानि ततश्च प्रत्यङ्गात्मा महानिति लोकशास्त्रनीतिः। यद्येतेषु किञ्चिद् व्युत्क्रमेणोच्येत चेत् तर्हि हेतुर्वक्तव्यः। प्रत्यगात्मतः शरीरस्य महत्त्वं कथययितुं ब्रह्मसूत्रशाङ्करभाष्ये श्रीभाष्ये च हेतुस्तूक्त एव, यथा "यदा तु जीवो महांस्तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तम्। अविद्या ह्यव्यक्तम्। अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते। महतः परत्वमभेदोपचारात्तद्विकारे शरीरे परिकल्प्यते .... इन्द्रियादीनां स्वशब्दैरेव गृहीतत्वात् परिशिष्टत्वाच्च शरीरस्य।"[२३] तथा च "तस्मादपि रथरूपितं शरीरं परम्। तदायत्तत्वाज्जीवस्य सकलपुरुषार्थसाधनप्रवृत्तीनाम्।"[२४] भूयश्चेन्द्रियादयः रूपकयोजनायां स्वशब्दैरेव प्रत्यभिज्ञायते, परिशिष्टं शरीरमव्यक्तशब्देनोच्यत इत्यपि समादधत्।[२५]

पुनश्चाऽव्यक्तशब्दः व्यक्तत्वाऽभाववद्वस्त्वेव ब्रवीतीति विज्ञाय स्थूलशरीरकारणभूत-भूतसूक्ष्मग्रहणं विहितम्।

---

[२२] ब्रह्मसूत्रस्वामिनारायणभाष्यम् – १/४/१

[२३] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/३

[२४] श्रीभाष्यम् – १/४/१

[२५] श्रीभाष्यम् – १/४/१

एतत्सर्वं गौरवार्थपरिवर्तनदोषादिकं सम्परित्यज्यस्वामिनारायणभाष्ये तु तत्त्वतः प्रत्यङ्ङात्मतः परभूतमक्षरब्रह्माख्यं तत्त्वमेव गृहीतं येन न कस्यापि विशिष्टसमाधानस्यावश्यकता न चार्थपरिवर्तनदोषाऽऽपादनसम्भावना। कठोपनिषदि रूपकयोजनस्यापि सेतुपदेनारब्धत्वात् सेतुरूपकस्याक्षरब्रह्मार्थकत्वेन च ग्रहणाच्छरीररूपकविन्यासेऽत्र भवत्यक्षरब्रह्म सुसङ्गतम्।

महतः परं ध्रुवं निचाय्येति मन्त्रांशस्यापि महतः प्रत्यङ्ङात्मतः परभूतमव्यक्तं यदक्षरब्रह्मतत्त्वं पुरुषपदवाच्यपरब्रह्मतत्त्वं च निचाय्य ध्यात्वा ज्ञात्वा वेत्यर्थः सम्यक्तया सङ्गतिमेति। अन्यत्र तु शरीराद्यर्थकत्वात् तद्ध्याननिषेधावश्यकताऽऽपतिता। अव्यक्तोऽक्षर इत्युक्त इतिगीतासङ्गतिरप्यक्षरार्थसम्पोषिका।

उपसंहारः

उपरोक्तदर्शनत्रयविहिताऽव्यक्तशब्दार्थमवलोक्य मन्मत्यानुसारं ज्ञायते यदक्षरपुरुषोत्तमदर्शने निरूपिताऽव्यक्तशब्दयोजना वर्तते सुस्पष्टा सुसङ्गता सुयोग्या च।

यद्यपि मदल्पमत्यैवास्मिन् विषये उक्तवानहम्। भगवत्पादाः पूर्वाचार्यास्तु खलु पूजनीया महान्तः स्वस्वसम्प्रदायसिद्धान्तानुसारं श्रुतिमातृवचांसि ब्रह्मसूत्राणि च सार्थकीकर्तुं विहितातिशयितोद्यमाः। अतस्तैः प्रतिपादितानर्थान् नमस्कृत्य तेषां चरणेषु च भूयांसि वन्दनानीति शम्।

सन्दर्भग्रन्थाः

1. श्रीमच्छङ्करार्चार्यकृत उपनिषद्भाष्य खण्ड १, प्रकाशकः – गीताप्रेस गोरखपुर, सं. 2010
2. शङ्कराचार्यः ब्रह्मसूत्रशाङ्करभाष्यम्, संपादकः - अनन्तकृष्णशास्त्री, प्रकाशकः - पाण्डुरङ्ग जवाजी, निर्णयसागरप्रेस, मुम्बई, १९८२
3. नारायण, रंगरामानुज, Kūranārāyaṇa, and India) Ānandāśrama (Pune.
   ईशकेनकठप्रश्नमुण्डमाण्डूक्यानंदवल्लीभृगूपनिषदः: तासु
   रामानुजमतानुयायिनारायणकृतप्रकाशिकासमेतेशोपनिषत् ;
   रंगरामानुजविरचितप्रकाशिकासमेताः केनादिमुण्डकान्ताः ;
   रामानुजमतानुयायिकुरनारायणरचितप्रकाशिकोपेता माण्डूक्योपनिषत् ;
   रंगरामानुजविरचितप्रकाशिकोपेते आनंदवल्लीभृगूपनिषदौ, 1947.
4. रामानुजाचार्यः. श्रीभाष्यम्, संस्कृतसंशोधनग्रन्थमाला - २२, संस्कृतसंशोधनसंसत्, मेलुकोटे, १९९५

5. साधुभद्रेशदासः. स्वामिनारायणसिद्धान्तसुधा - परब्रह्मस्वामिनारायणप्रबोधितम् अक्षरपुरुषोत्तमदर्शनम्, प्रकाशकः - स्वामिनारायण अक्षरपीठ शाहीबाग, अमदावाद, २०१७

6. महामहोपाध्यायः साधुभद्रेशदासः ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, परब्रह्मस्वामिनारायणप्रबोधित-अक्षरपुरुषोत्तमदर्शनप्रतिपादकं शास्त्रम्. 2nd ed. Amadāvāda: Svāmināyaṇa Akṣarapīṭha, 2019.

7. महामहोपाध्यायः साधुभद्रेशदासः. ब्रह्मसूत्रस्वामिनारायणभाष्यम्, परब्रह्मस्वामिनारायणप्रबोधित-अक्षरपुरुषोत्तमदर्शनप्रतिपादकं शास्त्रम्. 2nd ed. Amadāvāda: Svāmināyaṇa Akṣarapīṭha, 2019.

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः

सागरः आचार्यः[१]

नीत्युपसर्गपूर्वकेण्धातोर्घञि सिद्धोऽयं न्यायशब्दः। तथा च नीयन्ते अनेन इति न्यायशब्दार्थः। न्यायशब्दोऽयं संस्कृतवाङ्मयेषु विभिन्नरीत्या प्रयुक्तो दृष्टः । यद्यपि न्यायशब्देन गौतमस्य न्यायदर्शनं तर्कशास्त्रं वा स्मर्यते तथापि लौकिकव्यवहारेषु स्वानुभवेषु वा कमपि प्रसङ्गमधिकृत्य प्राप्तवाक्येष्वपि न्यायशब्दो युज्यते। एतादृशानां न्यायानां कृते 'लौकिकन्यायः' इति शब्दो जगति प्रसिद्धः। संस्कृतक्षेत्रे द्विविधो न्यायो दृश्यते। शास्त्रीयो लौकिकश्चेति। तत्र एतेऽल्पाक्षरीयाः लोकन्यायाः इति संस्कृते बहुधा प्रसिद्धाः, शास्त्रेषु उपयुक्ताश्च काश्चन उक्तयस्सन्ति, याभिः साहाय्येन शास्त्रे लोके वा कमपि विचारं, सिद्धान्तं वा सुलभतया अभीष्टार्थम् अवगन्तुं शक्यते।

शोधपत्रेऽस्मिन् परब्रह्मस्वामिनारायणप्रबोधितस्य अक्षरब्रह्मगुणातीतगुरुपरम्पराप्रवर्तितस्य अक्षरपुरुषोत्तमदर्शनस्य साम्प्रतेऽस्मिन् एकविंशतितमे ख्रिस्ताब्दे विरचितानि प्रस्थानत्रयस्वामिनारायणभाष्याण्यधिकृत्य लौकिकन्यायानां विषये लिख्यते। भगवत्स्वामिनारायणकृपया ब्रह्मस्वरूपप्रमुखस्वामिमहाराजाऽऽज्ञया तत्प्रेरणया एव महामहोपाध्यायैः अभिनवभाष्यकारैः पूज्यैः साधुभद्रेशदासैरक्षरपुरुषोत्तमसिद्धान्तप्रतिपादकानि प्रस्थानत्रयस्वामिनारायणभाष्याणि विरचितानि। अस्मिन् शोधपत्रे प्रत्येकं प्रस्थानं स्वीकृत्य तत्र कया रीत्या लौकिकन्यायप्रयोगो भाष्यकारैः कृतः तद्वक्ष्यते। ततश्च तैर्न्यायैः केषां सिद्धान्तानाम् अवबोधने सारल्यम् अनुभूतमिति प्रतिपादयिष्यामि। समग्रप्रस्थानत्रयस्वामिनारायणभाष्याणां सम्पूर्णाऽवलोकनानन्तरं ज्ञायते यत् सप्ततितोऽपि अधिकेषु स्थानेषु लौकिकन्यायाः भाष्येषु प्रयुक्ताः वर्तन्ते। तत्राऽपि चत्वारिंशत्तः अधिकाः विविधाः न्यायाः स्वामिनारायणभाष्येषु विराजिताः।

अथ प्रत्येकप्रस्थानस्थलौकिकन्यायविषये लिख्यते। आदौ तर्कप्रस्थानस्य बादरायणविरचितस्य ब्रह्मसूत्रस्य, ततश्च श्रुतिप्रस्थानानाम् उपनिषदाम् अन्ते च स्मृतिप्रस्थानस्य श्रीमद्भगवद्गीताया इति।

---

[१] शोधच्छात्रः, सारङ्गपुरम्, acharyasagar241@gmail.com

१. ब्रह्मसूत्रस्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

भाष्येऽस्मिन् पञ्चविंशतितोऽधिकेषु स्थानेषु लौकिकन्याया उपयुक्ताः। यथा, प्रथमेऽध्याये शुगधिकरणे संवर्गविद्यानिरूपणावसरे 'काकाक्षिन्यायः'[२], द्वितीयेऽध्याये वियदधिकरणे 'सर्वशाखान्यायः'[३], तृतीयेऽध्याये 'स्थूणानिखननन्यायः'[४], चतुर्थेऽध्याये 'यथाक्रतुन्यायः'[५] इत्यादि प्रभृतयो न्यायाः प्रयोजिताः।

तत्र द्वितीयेऽध्याये प्रथमे पादे सुखदुःखवैषम्याऽऽक्रान्तजगदनुभूतेस्तत्कर्तुरेव वैषम्यनैर्घृण्यदोषत्वमित्याशङ्कानिवारणके वैषम्यनैर्घृण्याख्येऽधिकरणे परमात्मनि वैषम्यनैर्घृण्यदोषं नास्तीति सिद्धान्तो लौकिकन्यायेन सारल्येनावगच्छति। सूत्रमस्ति - 'न कर्माऽविभागादिति चेन्नाऽनादित्वादुपपद्यते चाप्युपलभ्यते च'[६] तत्र भाष्यकारो लिखति, 'उपपत्तिर्युक्तिः। उपलब्धिः साक्षाच्छ्रवणम्। युक्त्या श्रुत्या चापि सिद्ध्यतीत्यर्थः। उपपत्तिस्तावद् बीजाङ्कुरनयेनोन्नेया। अन्यथा कर्मपाशस्याऽनादित्वाऽभावे संसाराऽनादित्वाऽसिद्धिः। एवं च सति मुक्तस्याऽपि पुनः संसारापत्तिरकृताऽभ्यागमादिप्रसङ्गः संसारोद्भावनापेक्षितप्रथमप्रवृत्ति-प्रयोजनावधारणाद्यसम्भवश्चेति।'[७] यथा अङ्कुरं विना बीजं न स्याद् बीजं विना चाङ्कुरं न स्यात्तथैव कर्म विना संसाराभावः संसारं विना कर्माभावस्तथा सर्वदा वर्तते एव तथैव जीवेश्वरेषु कर्मपाशः प्रचलति एव। इत्थं दिव्यपुरुषाकृतिरक्षरब्रह्माधिपतिः अनन्तदिव्यैश्वर्यशक्तिसम्पन्नः परमदयालुः परमात्मा सहजानन्दः लीलामात्रेण स्वेच्छया तत्तज्जीवेश्वराऽनुष्ठितकर्मानुगुणतया विविधां सृष्टिं रचयतीति न नानाविधसृष्टिनिर्माणव्याजको वैषम्यनैर्घृण्यादिदोष इति।

२. उपनिषत्स्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

---

[२] १/३/३५, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[३] २/३/२, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[४] ३/३/५०, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[५] ४/३/६, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[६] २/१/३६, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[७] २/१/३६, ब्रह्मसूत्रस्वामिनारायणभाष्यांशः

उपनिषत्भाष्येऽस्मिन् चत्वारिंशत्तोऽधिकेषु स्थानेषु लौकिकन्याया उपयुक्ताः। यथा, मुण्डकोनिषदि तृतीये मुण्डके अक्षरतत्त्वमुद्धाट्य पुनः परमात्मनिरूपणावसरे 'सिंहावलोकनन्यायः'[८], बृहदारण्यकोपनिषदि प्रथमे अध्याये पञ्चभूतनिरूपणसमये 'पञ्चीकरणन्यायः'[९], प्रश्नोपनिषदि पञ्चमे प्रश्ने तस्माद् विद्वान् एतेनैवायतननैकतरमन्वेतीति मन्त्रभागेन परब्रह्माभिध्यानवद् अक्षरब्रह्मध्यानमपि योग्यमेवेतिनिरूपणे 'तदावेशन्यायः'[१०] इत्यादिरीत्या न्यायाः प्रयोजिताः।

तत्र छान्दोग्योपनिषदि तृतीयेऽध्याये शाण्डिल्यविद्यायां श्रूयते 'सर्वं खल्विदं ब्रह्म...'[११] इति। अक्षरपुरुषोत्तमदर्शने अतिविशिष्टः सिद्धान्तोऽस्ति ब्रह्मरूपो भूत्वा परब्रह्मभक्तिः कर्तव्येति। सिद्धान्तोऽयम् अत्र एकेनैव ब्रह्मशब्देन गर्भितः। भाष्यकार एतन्मन्त्रनिरूपणे देहलीदीपकन्यायमुपयुज्याऽतिसरलतया सिद्धान्तं प्रकाशयति। ब्रह्मशब्दोऽत्र 'अथातो ब्रह्मजिज्ञासा'[१२] इतिसूत्रवद् अक्षरं ब्रह्म परं ब्रह्मेति उभयमभिधत्ते। ब्रह्मशब्दवाच्याऽक्षरब्रह्मपरब्रह्मऽऽत्मकत्वोपदेशो भवति साधूपायो ह्युपासकात्मनोऽक्षरब्रह्मरूपत्वं सम्पाद्य परब्रह्मोपासने। यथा गृहे देहलीस्थदीपको देहलीम् उभयतः स्वप्रकाशं यच्छति तथैव ब्रह्मशब्देन। भाष्ये लिखितमस्ति यद्- 'सर्वेषाम् अक्षरब्रह्मात्मकत्वाऽनुसन्धानेन सर्वान्तर्गतस्य स्वस्यापि तद्रुपतयाऽनुसन्धानात् स्वात्मब्रह्मैक्यसम्पत्तिः। सर्वेषां परब्रह्मात्मकत्वाऽनुसन्धानेन सर्वान्तर्गतस्य स्वस्यापि तच्छरीरतया स्वान्तर्यामित्वादिगुणकतया परमात्मोपासनलाभ इति। उपासकात्मतदुपास्यपरमात्मनोर्नित्यं स्वामिसेवकभावसम्बन्धस्य स्वीकाराद्, अक्षरब्रह्मणैव तदैकस्य च वेदान्तैरुपदेशादियं विवेकयोजना।'[१३] एतत् सर्वं भाष्यकारेण एकस्मिन्नेव देहलीदीपकेति लौकिकन्याये समाहितम्।

३. श्रीमद्भगवद्गीतास्वामिनारायणभाष्ये उपयुक्ताः लौकिकन्यायाः

---

[८] ३/१/८, मुण्डकोपनिषत्स्वामिनारायणभाष्यम्

[९] १/२/२, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[१०] ५/२, प्रश्नोपनिषत्स्वामिनारायणभाष्यम्

[११] ३/१४/१, छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्

[१२] १/१/१, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[१३] ३/१४/१, छान्दोग्योपनिषत्स्वामिनारायणभाष्यांशः

भाष्येऽस्मिन् एकादशतोऽधिकेषु स्थानेषु लौकिकन्यायाः उपयुक्ताः। यथा तृतीयेऽध्याये इन्द्रियमनोनिरूपणे 'ब्राह्मणवसिष्ठन्यायः'[१४], षष्ठे अध्याये 'कैमुतिकन्यायः'[१५] इत्यादिरीत्या न्यायाः प्रयोजिताः।

तत्र पञ्चदशाऽध्याये उपान्तिके श्लोके 'हस्तिपदन्यायः' प्रयोजितः। इत्थं हि तत्र बद्धमुक्तसकलजीवेश्वरेभ्यस्तत्सर्वपरभूताद् अक्षरब्रह्मणश्चापि सर्वदा स्वाभाविकतया परमात्मनः श्रेष्ठत्वस्य तत्सर्वोपास्यत्वस्य च प्रस्थापनरूपोपक्रमः।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥[१६]

क्षरत्वमिह क्षरणस्वभावमायायोगवत्त्वम्। सर्वाणि भूतानीत्यस्य सकलजीवेश्वरसमूहाः क्षरः, कूटस्थो हि एकसंख्याकं ब्रह्माक्षरमिति ज्ञेयम्। एवं पुरुषपदं परामृश्य परमात्मनः परत्वं प्रारभ्यते।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥[१७]

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥[१८]

ततश्च परमात्मनः सर्वोपरित्वज्ञानस्य फलनिरूपणम् एकेन एव लौकिकन्यायेन प्रदर्शयति।

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥[१९]

भाष्ये दृश्यते यत् ' हस्तिपदन्यायेन सकलज्ञानरहस्यं तेन ज्ञातमितिभावः।'[२०] इति।

---

[१४] ३/४०, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१५] ६/४४, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१६] १५/१६, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१७] १५/१७, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१८] १५/१८, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

[१९] १५/१९, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्

एवं सर्वेषु अपि त्रिषु प्रस्थानेषु स्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः बहुषु स्थानेषु दरिदृश्यते।

अथ किञ्चिद् विशेष उच्यते। 'पुरुषोत्तमो भगवान्, अक्षरब्रह्म, माया, ईश्वरः, जीवश्चेति पञ्च भेदा अनादयः'[२१] इति नित्यसत्यभेदवस्तुविवरणाऽवसरे परब्रह्म सहजानन्दः स्वयमेव व्याजहार। तेषु नित्यपञ्चतत्त्वेषु एकं तत्त्वं विद्यते अक्षरब्रह्म। दर्शनेऽस्मिन् तस्य अक्षरब्रह्मणः कार्यदृष्ट्या चत्वारि स्वरूपाणि स्वीक्रियन्ते।

चिदाकाशस्तथा देशस्तद्देशस्थश्च सेवकः।
गुरुर्ब्रह्मस्वरूपश्च चतस्रो ब्रह्मणो विधा ।।[२२]

तत्र एकं स्वरूपमस्ति अक्षरधामरूपम्। स्वरूपमिदं धामरूपेण परब्रह्मतत्सेवायामवस्थितस्य मूर्तिमतोऽक्षरब्रह्मणस्तथाऽनन्तकोट्यक्षरमुक्तानां दिव्यं निवासस्थानम्। एतदक्षरधामैकमेव, नित्यं सदा त्रिगुणातीतं च। अक्षरब्रह्मसाधर्म्यमाप्ता मुक्ता एव शक्नुवन्ति तस्मिन् प्रवेष्टुमिति। अस्य धाम्नः कृते प्रस्थानत्रय्यां ब्रह्मधाम, ब्रह्मपुरम्, ब्रह्मलोकः, ब्रह्मभुवनम् इत्यादिशब्दाः प्रयुज्यन्ते। एतच्छब्दानां स्वामिनारायणभाष्यावसरे भाष्यकारैरविस्मरन्नैव 'निषादस्थपति' इति एकस्य लौकिकन्यायस्य प्रयोगः कृतः। ब्रह्मसूत्रे चतुर्थाध्याये 'अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात्'[२३] इतिसूत्रभाष्ये तथा च बृहदारण्यके 'तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति'[२४], 'एष ब्रह्मलोकः एष सम्राड्'[२५], 'ब्रह्मलोकेषु गार्गीति'[२६], कठोपनिषदि 'ब्रह्मलोके महियते'[२७] इत्यादिसर्वत्र निषादस्थपतिन्यायः स्मारितः। यथा निषादः एव स्थपतिः स्थपतिरेव निषादः तथैव ब्रह्म एव लोकः इति विग्रहः न तु ब्रह्मणो लोक इति।

---

[२०] १५/१९, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यांशः

[२१] वचनामृतम्, गढडाप्रथमप्रकरणम्- ७

[२२] स्वामिनारायणसिद्धान्तकारिका- ४१

[२३] ४/३/१४, ब्रह्मसूत्रस्वामिनारायणभाष्यम्

[२४] ६/२/१५, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२५] ४/३/३२, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२६] ३/६/१, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्

[२७] १/२/२, कठोपनिषत्स्वामिनारायणभाष्यम्

उपसंहारः

वस्तुतस्तु ब्रह्मपरब्रह्माद्यतीन्द्रियानि तत्त्वानि लौकिकन्यायैर्न यथार्थतया ज्ञातुं शक्यानि तथापि तत् कथम् उपयोजनीयं तद्विवेकं स्वयं भाष्यकारो भाष्ये प्रस्तौति,

'अलौकिके हि लौकिकं दृष्टान्तादि नैव प्रसरेत् सर्वथा साम्याऽभावात्,

तथाप्यनायासेनाऽवबोधनाय तद् देयमेव भवतीति।'[२८]

एवं भाष्यकारेण स्वमतं प्रस्थापितम्।

इत्थं, प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः कुत्र कथं च कृतः, तेन सिद्धान्तावबोधने किदृक्सारल्यं जातमिति शोधपत्रे समाविष्टमिति।

अथाऽधुना समेत्य प्रस्थानत्रयीस्थानां शास्त्राणामनुसारेण सर्वेषां न्यायानां सूचिः शोधसारल्याय प्रस्तूयते-

प्रस्थानत्रयस्वामिनारायणभाष्येषु लौकिकन्यायानां प्रयोगः

क्रमः	न्यायः	सन्दर्भः
१	जपाकुसुमन्यायः	ब्र. १/१/२
२	अभ्यासनयः	ब्र. १/२/२४, ब्र. ३/१/२४ गीता. २/२०, गीता. ४/२२
३	सुप्तोत्थितन्यायः	ब्र. १/३/३०
४	काकाक्षिन्यायः	ब्र. १/३/३५
५	देहलीदीपकन्यायः	ब्र. १/४/८, छा. ३/१४/१, छा. ३/१४/४
६	समाकर्षणन्यायः	ब्र. १/४/१६
७	तात्स्थ्यात् ताच्छब्द्यम्	ब्र. १/४/२३
८	कैमुत्यनयः	ब्र. २/१/२९, गीता. ६/४४, गीता. ९/३३
९	बीजाङ्कुरन्यायः	ब्र. २/१/३६
१०	सप्तभङ्गीनयः	ब्र. २/२/३३

[२८] ७/२४/२, छान्दोग्योपनिषत्स्वामिनारायणभाष्यांशः

११	सर्वशाखानयः	ब्र. २/३/२, ब्र. ३/३/३५, ब्र. ४/४/७, बृह.३/७/२३, छा. ६/२/३, गीता. १८/६३
१२	ब्राह्मणपरिव्राजकनयः	ब्र. ३/१/११
१३	अग्र्यप्रायन्यायः	ब्र. ३/१/२२
१४	खट्वाप्रासादनयः	ब्र. ३/२/७, कठ. ४/१२, बृह. २/१/१७
१५	स्थूणानिखननन्यायः	ब्र. ३/३/५१, कठ. १/२१
१६	यथाक्रतुन्यायः	ब्र. ३/३/५२, ब्र. ४/३/६, ब्र. ४/३/१५, प्र. ५/३, बृह. १/५/१३, बृह. २/१/२, गीता. ९/२५
१७	आगन्तुकानामन्ते निवेशः	ब्र. ४/३/३
१८	उपसंहारन्यायः	ब्र. ४/३/३
१९	निषादस्थपतिन्यायः	ब्र. ४/३/१४, कठ. २/१७, बृह. ३/६/१, बृह. ४/३/३२, बृह. ६/२/१५
२०	यद् यदुपरि तत् तद्भिन्नम्	के. १/४
२१	राजप्रासादवैभवेन राजसुखवैभवानुमानवद्	कठ. ५/१५
२२	तदावेशन्यायः	प्र. ५/२, मु. २/२/६
२३	हस्तिपदन्यायः	मु. १/१/१, छा. ५/२४/२, छा. ७/२४/२, छा. ७/२६/२, गीता. १५/१९
२४	यदुपकारकं तत्पूर्वम्	मु. १/१/४
२५	सिंहावलोकनन्यायः	मु. ३/१/८
२६	घटकं घटितं स्मारयेद्	छा. २/१/१
२७	रलयोरभेदः	छा. ३/१९/३
२८	शते पञ्चाशद्	छा. ४/१/४
२९	द्विर्बद्धं सुबद्धम्	छा. ४/१०/५, बृह. १/४/११
३०	घटीयन्त्रन्यायः	छा. ५/९/२
३१	काकतालीयनयः	छा. ५/१०/६
३२	साधकस्य सङ्कल्पं संपूर्यतेतिन्यायः	छा. ७/४/२
३३	पञ्चीकरणन्यायः	बृह. १/२/२
३४	कार्यकारणाऽनन्यत्वनयः	बृह. १/४/७
३५	शास्त्रदृष्टिनयः	बृह. १/४/१०, गीता. ४/६

३६	कृतेषु प्रतिकर्तव्यमेष धर्म सनातनः	बृह. १/४/१६
३७	तात्स्थ्यनयः	बृह. ५/३/१, बृह. ५/४/१
३८	घटीयन्त्रन्यायः	बृह. ६/२/१४
३९	ब्राह्मणवसिष्ठन्यायः	गीता. ३/४०
४०	न ह्यैकस्मै दत्तं पुररन्यस्मै दातुं शक्यम्	गीता. ५/१०

सन्दर्भसूचिः

१. साधुः भद्रेशदासः, ब्रह्मसूत्रस्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, मई २००९ अमदावाद

२. साधुः भद्रेशदासः, ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, दिसम्बर २००९ अमदावाद

३. साधुः भद्रेशदासः, छान्दोग्योपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद

४. साधुः भद्रेशदासः, बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, अप्रैल २०१२ अमदावाद

५. साधुः भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जनवरी २०१२ अमदावाद

६. साधुः भद्रेशदासः, स्वामिनारायणसिद्धान्तसुधा, प्रथमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, जून २०१७ अमदावाद

७. भगवान् स्वामिनारायणः, वचनामृतम्, उनविंशतितमा आवृत्तिः, स्वामिनारायण अक्षरपीठ, २०१३ अमदावाद

८. वामन शिवराम आप्टे, संस्कृत - हिन्दी शब्दकोशः 1

९. न्यायावलिः

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

श्रीशङ्करदेशिकाष्टकवृत्तिः

अङ्कुरनागपालः[१]

जयताद्भुवि सर्वत्र शङ्करार्यो जगद्गुरुः।
यः शम्भोर्विभवः शिष्यभवाभावोद्भवोऽभवत् ॥

अथ स्वगुरोः शिवगुरुसूनोः परशङ्करावतारस्य श्रीशङ्कराचार्यस्य माहात्म्यप्रकाशनाय तमधिकृत्य 'श्रीशङ्करदेशिकाष्टकम्' इतिनामाऽयं स्तवः श्रीतोटकाचार्येण कृतः। अत्र देशिको नाम गुरुः; *'गुरौ देश्ये च देशिकः'*[२] इतिकोशोक्तेः। देशिनी नाम तर्जनीसञ्ज्ञा काचिदङ्गुलिस्तया परमात्मतत्त्वं लक्षयति यः, स गुरुरेव देशिकः। अत्र पद्यानामष्टकेन भावात्मकः साष्टाङ्गप्रणामो द्योतितः। द्वादशाक्षरेण तोटकच्छन्दसा श्रीभगवत्पादस्य द्वादशादित्योपमत्वं सूचितम्। वक्ष्यति च - *'अहिमांशुरिवात्र विभासि गुरो'*[३] इति।

सुप्रसिद्धमिदमैतिह्यं यत् श्रीमद्भगवत्पादस्य सन्निधौ गिरिनामा कश्चन अन्तेवासी शिष्यो बभूव, यो ह्यनन्यभावेन सदैव स्वगुरुपरिचर्यायां संलग्नः। एकदा स श्रीभगवत्पादस्य वेदान्तव्याख्यानावसरे तत्कौपीनप्रक्षालनाय दूरस्थां नदीं गतः। अतोऽसङ्ख्येषु स्वशिष्येषु वेदान्तजिज्ञासुषु सत्स्वपि वात्सल्यमूर्तिः श्रीशङ्कराचार्यः 'स्थीयताम्! गिरिरपि क्षणमात्रादेष्यति' इत्युक्त्वा तस्य प्रतीक्षाञ्चकार। तदाऽन्ये शिष्या ऊचुः-'भोः गुरवः! गिरिस्तु मन्दमतिः। अस्माभिः कस्मिंश्चिदपि भवद्व्याख्यानावसरे तन्मुखादेकाऽपि जिज्ञासा न श्रुता, तन्मुखमण्डले 'अयं सिद्धान्तः स्पष्टोऽभवत्' इत्याकारकः सन्तोषोऽपि न दृष्टश्च। तर्हि किमर्थं तस्य प्रतीक्षा कार्या?' इति। अतः स्वशिष्याणां वचांसि श्रुत्वाऽऽचार्यो

---

१. विशिष्टाद्वैतविभागीयः शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः; R/o ४/९-१०, Vijay Nagar Double Storey, Delhi - ११०००९

२. अमरकोशे ३.३.१६२

३. तोटकाष्टके ६

भगवत्पादस्तदा कृपया परयाऽविष्टः स्वमनःसङ्कल्पेनैव गिरये सर्वां ब्रह्मविद्यां ददौ; यां लब्ध्वाऽज्ञाननिवृत्तिद्वारा स्वस्वरूपानन्दमनुभवन् स स्वगुरुदर्शनोत्सुकः सन्नदीकूलादचिरात् स्वाचार्यसन्निधावेनं वक्ष्यमाणं स्तवं पठन् समागतः। सगणचतुष्टयात्मके तोटकाख्ये कस्मिंश्चिद्वृत्तेऽयं स्तवो रचितः, अतस्तोटकाष्टकनाम्ना लब्धप्रतिष्ठः। स्वशिष्यमुखादेनं स्तवं श्रुत्वाऽपरशङ्करः श्रीशङ्कराचार्य आशुतोषस्तुतोष, अथान्यानां स्वशिष्याणां गर्वनिबर्हणाय गिरिं सर्ववेदान्तरसरहस्यप्रतिपादनार्थम् आज्ञापयामास। ततो गुरुकृपाधुरीणो गिरिस्तत्क्षणं तत्र स्थित्वैव तोटकवृत्तोपनिबद्धं *'श्रुतिसारसमुद्धरणम्'* इत्याख्यमेकं ग्रन्थरत्नञ्चकार। तोटकवृत्तोपनिबद्धयाऽशेषया स्वरचनया स गिरिस्तोटकाचार्यनाम्ना प्रसिद्धो जातः। अथातो *'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'*[४] इति श्रुतिं प्रमाणीकुर्वन् श्रीतोटकाचार्यः स्तोत्रयामास -

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥१॥

'भव शङ्कर देशिक मे शरणम्' इत्यस्य सर्वत्राभ्यासः। अस्यार्थः - हे ***शङ्कर***! शङ्करेतिसञ्ज्ञः शं-कल्याणं करोति यः, स च। ***देशिक***!! गुरो। ***मे*** मम ***शरणम्*** आश्रयस्थानं-रक्षिता ***भव*** भवतादिति। भवान् विदिताखिलशास्त्रसुधाजलधिः महितोपनिषत्कथितार्थनिधिश्च। जलधिस्तु समुद्रः। शास्त्रं तु सुधामयजलधिना सादृश्यं भजते; भ्रमादिसर्वदोषरहितत्वाद् विस्तृतपरिमाणत्वाच्च। अतः सम्प्रदायेन स्वतपसा च विदितः समुत्तारितोऽखिलोऽशेषः शास्त्रसुधाजलधिर्येन, स विदिताखिलशास्त्रसुधाजलधिः; तत्सम्बुद्धौ ***विदिताखिलशास्त्रसुधाजलधे*** (तृतीया-बहुव्रीहिः)। उपनिषदि ब्रह्मकाण्डे वेदस्योत्तरभागे कथितानामर्थाणां रहस्यविषयाणां निधिर्यः, स एव उपनिषत्कथितार्थनिधिः (षष्ठी-तत्पुरुषः)। अथ वा; उपनिषदि कथितोऽर्थो विषयः-आत्मैव निधिः (कर्मधारयः); *'यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुः। एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः'*[५] इतिश्रुतेः। महितः पूजितो याथात्म्ये-वास्तविकेऽर्थे समन्वितः प्रामाण्यत्वेन लोके शिष्यहिताय स्वाचरणे च प्रतिष्ठितः स उपनिषत्कथितार्थनिधिर्येन, स महितोपनिषत्कथितार्थनिधिः

---

४. श्वेताश्वतरोपनिषदि ६.२२

५. छान्दोग्योपनिषदि ८.३.२

(तृतीया-बहुव्रीहिः)। अथ वा; महिता पूजिता उपनिषद् एव (कर्मधारयः); मोक्षप्रदातृसामर्थ्यात् स्वप्रतिपाद्यविषयस्य सर्वोत्कृष्टत्वाच्च। यस्तासु कथितानामर्थाणां निधिः, स महितोपनिषत्कथितार्थनिधिः; तत्सम्बुद्धौ ***महितोपनिषत्कथितार्थनिधे*** (षष्ठी-तत्पुरुषः)। अत्र निधिर्नाम समुद्र आधारो वा। एवंविध शङ्कर देशिक मे मम शरणं भव। अहं भवदीयं ***विमलं*** पवित्रतमं निवृत्तमायामलं ***चरणं*** पादं मम ***हृदये*** मनसि ***कलये*** स्थापयामीत्यर्थः। अत्र मुमुक्षुणां कृते ब्रह्मविद्याभ्यासाय सम्प्रदायानुगतस्य कस्यचिद् श्रोत्रियब्रह्मनिष्ठस्याचार्यस्य प्रपत्तिरावश्यकी इति द्योतितः, *'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्। नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'*[६] इतिश्रुतिश्च प्रमाणम्। *'श्रोत्रियम्- अध्ययनश्रुतार्थसम्पन्नम्। ब्रह्मनिष्ठम् - हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठः'* इति तत्रत्यं भगवत्पादीयभाष्यम्। ततस्तु 'विदिताखिलशास्त्रसुधाजलधे' इतिपदेन श्रीशङ्कराचार्यस्य श्रोत्रियत्वं 'महितोपनिषत्कथितार्थनिधे' इत्यनेन ब्रह्मनिष्ठत्वं च विज्ञेये।

अत्रेदं श्रद्धेयं यद् निवृत्ताज्ञानेन तोटकाचार्येण *'भव शङ्करदेशिक मे शरणम्'* इति किमर्थमुक्तम्? यतो हि निवृत्ते सत्यज्ञाने कुतो भयम्; *'अभयं वै जनक प्राप्तोऽसि'*[७] इत्यादिश्रुतेः? इत्यत्र ब्रूमः - लोकसङ्ग्रहार्थमेव; *'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः'*[८] इतिस्मार्तन्यायात्। यथाऽहं गुरुकृपया निवृत्ताज्ञानोऽद्वैतात्मानन्दस्वरूपोऽभवं, तथैवास्मत्साम्प्रदायिका अपि भवन्त्वितिधियैवमोक्तं किल। अथ दैन्यं प्रदर्शयन् स्वसामर्थ्यराहित्यं स्वमनोरथञ्च प्रकटयति स्तोता -

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शङ्कर देशिक मे शरणम् ॥२॥

हे करुणावरुणालय! मां भवसागरदुःखविदूनहृदं पालय। मामखिलदर्शनतत्त्वविदं रचयेति योजना। वरुणालयो नाम समुद्रः। करुणायाः स्वप्रपन्ने श्रद्धावत्यनुग्रहभावस्य वरुणालयः करुणावरुणालयः; तत्सम्बुद्धौ ***करुणावरुणालय*** (षष्ठी-तत्पुरुषः)। खानि नामेन्द्रियाणि ज्ञानकर्मसाधनानि; दुः क्लेशकरं

---

६. मुण्डकोपनिषदि १.२.१२

७. बृहदारण्यकोपनिषदि ४.२.४

८. श्रीमद्भगवद्गीतायाम् ३.२१

खेभ्यो यत्तद्दुःखम् (चतुर्थी-बहुव्रीहिः)। तच्च त्रिविधम् - दैहिकं (स्वदेहसम्बन्धि; वातपित्तकफविकारजनितं रोगरूपं प्रियवियोगादिजनितमवसादरूपं वा), भौतिकं (स्वेतरप्राणिनिमित्तकं हिंसालक्षणम्), दैविकं (उक्तयोर्विलक्षणं सर्वम्) चेति। त्रयाणामेषां निमित्तं भवः संसारो जन्ममृत्युलक्षणो यः सागरतुल्यः; दुस्तरत्वात्। विदूनं विशेषेण दूनमुपतप्तं हृदं हृदयं यस्य, स विदूनहृदः (षष्ठी-बहुव्रीहिः)। एवंविधं ***मां*** तोटकाख्यं दासं ***भवसागरदुःखविदूनहृदं*** भवसागरस्य दुःखेन तापत्रयेन विदूनहृदं **पालय** रक्षतादित्यर्थः। कथम्? एतत्स्पष्टीक्रियते - *माम्* ***अखिलदर्शनतत्त्वविदम्*** अखिलानां समस्तानां दर्शनानां वेदान्तप्रतिपाद्यानां विषयाणां तत्त्वविदमात्मविषयकयथार्थज्ञानसम्पन्नम् (षष्ठी-तत्पुरुषः) ***रचय*** कुरु इत्यर्थः। हे शङ्कर! देशिक!! मे शरणं भवेति। इष्टानिष्टप्राप्तिपरिहारयोरलौकिक उपायभूते वेदे त्रीणि काण्डानि सन्ति कर्मोपासनाज्ञानसञ्ज्ञकानि। तेष्वशेषाणां दुःखानां नाशो ज्ञानात्-स्वस्वरूपज्ञानादेवेत्यत्र ध्वनितः। तत्र *'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः'*[९] इति श्रुतिः प्रमाणम्। ननु कर्मोपासना निष्फल इति चेत्? न; परम्परया मोक्षसाधनत्वात्। निष्कामेण कर्मणा चित्तशुद्धिर्भवति, उपासनया तदैकाग्र्यञ्च। ताभ्यां विशुद्धे समाहिते च चेतसि स्वरूपज्ञानं समुदेति। तथैवाहुर्भगवत्पादाः *'अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः स देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्यानुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः। शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते'*[१०] इति।

मोक्षायापेक्षितस्य महावाक्यार्थस्योपदेशात् प्राङ् महावाक्यघटकपदानामर्थविज्ञानाय गुरुस्तदवतारप्रयोजनं विज्ञाप्य स्तूयते -

भवता जनता सुहिता भविता निजबोधविचारण चारुमते ।
कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम् ॥३॥

हे निजबोधविचारण! हे चारुमते! भवता जनता सुहिता भविता, मामीश्वरजीवविवेकविदं कलय; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। निजस्य स्वरूपभूतस्यात्मतत्त्वस्य बोधे ज्ञाने विचारणं

---

९. श्वेताश्वतरोपनिषदि १.११

१०. श्रीमद्भगवद्गीताशाङ्करभाष्योपोद्घाते

विचारो यस्य, स निजबोधविचारणः; तत्सम्बुद्धौ ***निजबोधविचारण*** (षष्ठी-बहुव्रीहिः)। चारुर्मनोज्ञा सुन्दरा मतिर्बुद्धिर्यस्य, स चारुमतिः; तत्सम्बुद्धौ ***चारुमते*** (षष्ठी-बहुव्रीहिः)। अथ वा; चारुः बृहस्पतिरिति कोशः[११]। चारुसञ्ज्ञबृहस्पतिसदृशी मतिर्बुद्धिः स्मृतिर्वा यस्य, स चारुसदृशमतिश्चारुमतिरित्येव; तत्सम्बुद्धौ ***चारुमते***। अत्र मध्यमपदलोपी बहुव्रीहिः। अथ वा; निजबोधविचारणाच्चारुर्मतिर्यस्य, स निजबोधविचारणचारुमतिः; तत्सम्बुद्धौ ***निजबोधविचारणचारुमते*** (षष्ठी-बहुव्रीहिः)। ***भवता*** त्वया ***जनता*** जनसमूहो वेदप्रामाण्यवादी आस्तिक्यबुद्धिमान् ***सुहिता*** सुखी तृप्तश्च ***भविता*** भविष्यतीति श्रीशङ्कराचार्यस्य अवतारप्रयोजनमिङ्गितम्। पूर्वश्लोकगतं मामितिपदमनुवर्तनीयमत्र। मामीश्वरजीवविवेकविदं कलय। वस्तुतस्तु *'तत्त्वमसि'*[१२] इत्येकमुपदेशवाक्यमुपनिषत्प्रसिद्धं; यत्र *'तत्'* *'त्वम्'* *'असि'* इति त्रीणि पदानि विद्यन्ते। इमानि तु क्रमशः ईश्वरस्य जीवस्य तयोरैक्यस्य च वाचकानि। गुरूपदिष्टस्य महावाक्यार्थस्य मननमेव स्वरूपबोधकारणम्। परन्ततः प्राक् सर्वस्य महावाक्यतद्वर्तिपदानां चार्थविवरणमपेक्षते, यदत्र प्रार्थ्यते सादरं गुरुसेविना स्तोत्रा। हे गुरो! मां जीवेश्वरविवेकविदं ***कलय*** कुरु इत्यर्थः। ***जीवेश्वरविवेकविदम्*** इत्यत्र जीवस्य-त्वम्पदवाचकस्य ईश्वरस्य-तत्पदवाचकस्य च विवेको जीवेश्वरविवेकः, तस्य वित्-ज्ञाता इत्यर्थः (षष्ठी-तत्पुरुषः)।

अत्रतावदवतारप्रयोजनं कथितं किल। परं कस्यावतारभूतः श्रीशङ्कराचार्यो भगवत्पाद इति विवक्षायां 'कलौ रुद्रो महादेवो लोकानामीश्वरः परः। करिष्यत्यवतारं स्वं शङ्करो नीललोहितः॥ श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया। उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसञ्ज्ञितम्॥ सर्ववेदान्तसारं हि धर्मान् वेदनिदर्शितान्। सर्ववर्णान् समुद्दिश्य स्वधर्मा ये निदर्शिताः'[१३] इत्यादीनि पुराणवचनानि मनसि निधाय, कलौ वैदिकधर्मस्य पुनरुत्थापनाय स्वगुरुणा कृतान् प्रयत्नान्निरीक्ष्य च, तदीयं दिव्यतमं सामर्थ्यञ्चिन्तयन्नुद्घोषयति -

---

११. शब्दकल्पद्रुमे

१२. छान्दोग्योपनिषदि ६.८.७

१३. कूर्मपुराणे १.३०.३२-३५

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणम् ॥४॥

भवो नाम शिवः परमेश्वरः; *'व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः'*[१४] इत्यमरः। हे गुरो! भवान् भव **एव** असंशयम्। अहं विश्वसिमि यद्भवान् शिवावतार ***इति*** एवं ***मे*** मम ***चेतसि*** मनसि ***नितराम्*** अत्यन्तं कौतुकिता समजायत। यतो हि वर्णाश्रमलक्षणस्य वेदधर्मस्योत्थानाय धर्मब्रह्मनिरूपणपुरस्सरम् अद्वैतवेदान्तसिद्धान्तस्योपन्यासाय तत्रभवतः पराक्रमं प्राकृतं नास्ति। तस्मान्मन्मनसि ***कौतुकिता*** कूतुहलमपूर्ववस्तुदर्शनेच्छा ***समजायत*** प्रमाणनिरूपणपूर्वकमुदेति इत्यर्थः। किं तदपूर्ववस्तु यस्य दर्शनेच्छेति पृष्टे स्पष्टीक्रियते - यदि भवान् शिवस्तर्हि स तु विद्याप्रदाता गुरुर्देवता सर्वस्य लोकस्य; *'विद्याकामस्तु गिरिशम्'*[१५] इति पुराणप्रसिद्धम्। गुरुर्नाम अज्ञानान्धकारनिरोधको ज्ञानोपदेष्टा। अतो ***मम*** मदीयमपि ***मोहमहाजलधिं*** मोहमयं महाजलधिं (कर्मधारयः) ***वारय*** ज्ञानोपदेशद्वारा निवारयेत्यर्थः। अत्र मोहो नामाज्ञानं-मूलाज्ञानम्, तस्य जलधिना समुद्रेण साकं तुलना व्यापकत्वाद्दुस्तरत्वाच्च; तत्कार्याणाम् अविद्याकामकर्मलक्षणानां विस्तरेण तस्य महत्त्वं ज्ञेयम्।

अधुना स्वायोग्यतायां सत्यामपि कृपालुना स्वगुरुणा श्रीशङ्कराचार्येण परिपालनीयोऽहमिति धिया प्रार्थयति -

सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥५॥

बहुधा सुकृतेऽधिकृते भवतः समदर्शनलालसता भविता, अतिदीनमिमं मां परिपालय; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। सुकृतं नाम पुण्यम्। अधिकृतं नाम शास्त्रोचितेन स्वाधिकारानुरोधेन कृतं सम्पादितं कर्म। ***भवतः*** अस्य शिष्यस्य तोटकसञ्ज्ञस्य ममेत्याशयः; ***बहुधा*** मुहुर्मुहुः ***सुकृते*** पुण्यकर्मणि ***अधिकृते*** यथायोग्येन सम्पादिते सति समदर्शनलालसता ***भविता*** भविष्यतीत्यर्थः; यतो हि पापसङ्गविवर्जिते पुण्यैश्च विशुद्धे चित्त एव ब्रह्मदर्शनयोग्यता सम्भवति। तथा हि श्रुतिरपि - *'नाविरतो*

---

१४. अमरकोशे १.१.३४

१५. श्रीमद्भागवतमहापुराणे २.३.७

दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्'[१६] इति। समं नाम ब्रह्म; *'पण्डिताः समदर्शिनः'*[१७], *'निर्दोषं हि समं ब्रह्म'*[१८] इत्यादिगीतोक्तिभ्याम्। अतः ***समदर्शनलालसता*** नाम समस्य ब्रह्मणो दर्शने लालसा इच्छा (सप्तमी-तत्पुरुषः)। हे गुरो! एवंविधा सा लालसता बहुधा सत्कर्मसु सत्सु भविष्यति। किन्तु मदीया तादृशी वृत्तिर्नास्ति; यतो हि ***अतिदीनो*** भीतः सर्वसाधनविवर्जितोऽस्म्यहमित्यर्थः। परं मदीय एको विशेषो विद्यते - अहं तव चरणाश्रितोऽस्मि इत्येव। गुरोर्लक्षणं भवद्भिरेव कथितं किल - *'अधिगततत्त्वः शिष्यहितायोद्यतः सततम्'*[१९] इति। अतस्तल्लक्षणं पुनरनुसन्धाय मनसि इमं ***माम्*** अतिदीनं ***परिपालय*** महावाक्योपदेशव्याजेन मम परिपालनमज्ञाननिरसनं कुरु इत्यर्थः।

अथ महात्मनां सुतपसामवतारप्रयोजनं परिशील्य तेषु महात्मसु विश्वदेशिकस्य श्रीशङ्करभगवत्पादस्य वैशिष्ट्यं प्रकटयति -

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥६॥

कलिताकृतयो महामहसो जगतीमवितुं छलतो विचरन्ति, हे गुरो! अत्र अहिमांशुरिव विभासि; हे शङ्कर! देशिक!! मे शरणं भवेति योजना। महस्तेजः। महद् महर्येषां, ते ***महामहसः*** (षष्ठी-बहुव्रीहिः) तेजस्विनो महात्मनो ब्रह्मसाक्षात्कारसम्पना इत्यर्थः। कलिता कृताऽऽकृतिः मनुष्यदेहलक्षणा यैस्ते ***कलिताकृतयः*** (तृतीया-बहुव्रीहिः)। ते किं कुर्वन्ति? ***छलतो*** लीलया ***विचरन्ति*** अटन्ति; *'मुक्ता अपि लीलया विग्रहं कृत्वा'* इतिश्रुतेः। किमर्थम्? जगतीं तद्वर्तिनं धर्मब्रह्मनिष्ठजनसमूहं यथायोग्याधिकारानुरोधेन तत्त्वोपदेशपूर्वकमवितुं रक्षितुमित्यर्थः; *'महद्विचलनं नृणां गृहिणां दीनचेतसां निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित्'*[२०] इतिपुराणोक्तेः। हे गुरो! ***अत्र*** अस्मिञ्जगतीतले तेषु सर्वेषु

---

१६. कठोपनिषदि १.२.२४

१७. श्रीमद्भगवद्गीतायाम् ५.१८

१८. तत्रैव ५.१९

१९. प्रश्नोत्तरमणिरत्नमालिकायाम् २

२०. श्रीमद्भागवतमहापुराणे १०.८.४

भवान्नहिमांशु इव विभासि मे प्रतीयत इत्यर्थः। हिमा शीतला अंशवो रश्मयो यस्य, स हिमांशुश्चन्द्रमा; न हिमा अंशवो यस्य, स ***अहिमांशुः*** - सूर्य इतितावत्। सर्वेषु तेजस्विमहात्मसु भवान् सूर्य इव ***विभासि*** प्रकाशसे। श्रीसुरेश्वराचार्यस्तु - *'आ शैलादुदयात्तथास्तगिरितो भास्वद्यशोरश्मिभिर्व्याप्तं विश्वमनन्धकारमभवद्यस्य स्म शिष्यैरिदम्। आराज्ज्ञानगभस्तिभिः प्रतिहतश्चन्द्रायते भास्करस्तस्मै शङ्करभानवे तनुमनोवाग्भिर्मनः स्यात्सदा'*[२१] इति।

पुनः श्रीशङ्कराचार्यस्य शिवावतारविषयत्वमभ्यस्य तदद्वितीयत्वं ज्ञापयति —

गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥७॥

हे गुरुपुङ्गव! हे पुङ्गवकेतन!! कोऽपि सुधीस्ते समतां न हि अयताम्; हे शरणागतवत्सल! हे तत्त्वनिधे! हे शङ्कर! देशिक!! मे शरणं भवेति योजना। *'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः'*[२२] इत्यमरोक्तेः गुरुपुङ्गवस्थपुङ्गवांशः श्रेष्ठत्वबोधकः। गुरूणां पुङ्गव इति गुरुपुङ्गवस्तत्सम्बुद्धौ ***गुरुपुङ्गव*** (षष्ठी-तत्पुरुषः); गुरुश्रेष्ठ इत्यर्थः। पुङ्गवो नाम वृषः, केतनं नाम ध्वजः। पुङ्गवकेतनो वृषध्वजः शिव एव; तत्सम्बुद्धौ ***पुङ्गवकेतन*** इति। हे गुरो! भवान् पुङ्गवकेतनः साक्षाच्छिव इत्यर्थः। ***ते*** तव ***समतां*** तुल्यतां ***कोऽपि*** कश्चिदपि ***सुधीः*** विपश्चित्तत्त्ववेत्ता ***न अयतां*** न भजत इत्याशयः। शरणे आ समन्ताद्गतः शरणागतः (सप्तमी-तत्पुरुषः), तस्मिन् वात्सल्यं दोषस्वीकारपूर्वकं स्नेहभावो यस्य, सः शरणागतवत्सलः (षष्ठी-बहुव्रीहिः); तत्सम्बुद्धौ ***शरणागतवत्सल***। तत्त्वस्य उपनिषत्प्रतिपादितस्य आत्मतत्त्वस्य निधिः आधार इति तत्त्वनिधिः (षष्ठी-तत्पुरुषः), तत्त्वम्-आत्मा निधिर्यस्य, स तत्त्वनिधिः (षष्ठी-बहुव्रीहिः); तत्सम्बुद्धौ ***तत्त्वनिधे***। हे एवंविध शङ्कर! देशिक!! मे शरणं भवेति।

गुरोः सकाशाद्विद्योपलब्धयेऽयं नियमः - *'गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थो नोपलभ्यते'* इति नीतिं मनसि निधायाधुना स्तवमुपसंहरति गुरूपासकस्तोटकयतिः -

---

२१. बृहदारण्यकभाष्यवार्त्तिके ६.५.२५

२२. अमरकोशे ३.१.१२०

विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥८॥

विशदा एका कला इति ***विशदैककला*** (कर्मधारयः)। पूर्वोक्ते न्याये एकां विद्यां गुरवे निवेद्य तेनैका विद्या लभ्येति *'विद्यया विद्या'* इत्यंशस्याशयः। किन्तु मया गिरिणा न एकाऽपि कला विशदा विस्तरशो ***विदिता*** अवगता, अतो *'विद्यया विद्या'* इत्यंशोऽसम्भवः। अथो सर्वासां विद्यानामाश्रयो भवान्नित्यतोऽपि। एवञ्च हे गुरो! मद्धस्ते ***किञ्चन*** यत्किमपि ***काञ्चनं*** धनद्रव्यादिकं नैवेद्यमपि नास्ति। अतः पूर्वोक्तस्य न्यायस्य *'पुष्कलेन धनेन वा'* इत्यंशोऽप्यसम्भवः। परं *'गुरुशुश्रूषया विद्या'* इत्यंशो मया भक्त्या चरितार्थः। एतस्माद् ***द्रुतमेव*** यथाशीघ्रं मयि ***सहजां*** भवत्कृपालुस्वभावसिद्धां ***कृपां*** मोहाज्ञाननिवारिणीम् अनुग्रहलक्षणां ***विधेहि*** कुरु इत्यर्थः।

अत्र जगद्गुरोर्भगवतः श्रीशङ्कराचार्यस्य मनःसङ्कल्पेनाद्वैतज्ञानसिद्धः श्रीतोटकवर्यः सर्वत्राद्वयात्मतत्त्वं पश्यन् किमर्थं स्वगुरुणा सह स्तोत्रादिरूपं द्वैतं स्वीकृतवान्? इति शङ्क्यते चेदयुक्तमेतत्; सिद्धेऽप्यद्वैतज्ञाने गुरुणा सहाद्वैतं न भावनीयमिति सम्प्रदायात्। तथैव शिक्षयति स्वयं भगवान् भाष्यकारः - *'अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह'*[२३] इति, *'यावदायुस्त्रयो वन्द्या वेदान्तो गुरुरीश्वरः'*[२४] इति च। अतोऽद्वैतनिष्ठैस्तत्त्वज्ञैः पूर्वाचार्यैः स्वगुरुवन्दनादिकमनवद्यमिति शिवम्॥

॥ इति केनचिच्छङ्करकिङ्करेण नागपालाङ्कुरेण कृतया रमावृत्त्या वलितं
श्रीतोटकाचार्यकृतशङ्करदेशिकाष्टकं सम्पूर्णम् ॥

सन्दर्भग्रन्थाः

1. उप्रैती थानेशचन्द्र (२००६), स्तुतिकदम्ब, श्रीदक्षिणामूर्तिमठप्रकाशन (वाराणसी)
2. गिरि महेशानन्द (१९९०), बृहदारण्यकभाष्यवार्त्तिकम् (खण्डः-२), महेश अनुसन्धान केन्द्र (वाराणसी)
3. गिरि विद्यानन्द (२००१), नित्यानुष्ठानविधिः एवं शाङ्करभाष्ययुतं श्रीविष्णुसहस्रनामस्तोत्रम्, कैलासविद्याप्रकाशन (ऋषीकेश)
4. पणशीकर वासुदेव लक्ष्मण (२०१०), ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा विद्याभवन (वाराणसी)

---

२३. तत्त्वोपदेशे ८७

२४. तत्रैव ८६

5. बहादुर राधाकान्तदेव (?), शब्दकल्पद्रुमः, चौखम्बा संस्कृत सीरिज़ आफ़िस (वाराणसी)
6. मुखोपाध्याय नीलमणि (१८९०), कूर्मपुराणम्, गिरीशविद्यारत्न यन्त्रालय (कलिकाता)
7. शास्त्री रामतेज (१९९३), श्रीमद्भागवतम्, चौखम्बा संस्कृत प्रतिष्ठान (दिल्ली)
8. शास्त्री हरगोविन्द (१९६८), अमरकोशः (मणिप्रभा-हिन्दीटीकोपेतः), चौखम्बा संस्कृत सीरिज़ (वाराणसी)
9. सरस्वती सच्चिदानन्देन्द्र (२०१५), श्रीमद्भगवद्गीता (श्रीशाङ्करभाष्यसमेता), अध्यात्म प्रकाश कार्यालय (होळेनरसिंहपुर)

वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

'तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये': श्रीमद्भगवद्गीतायाः अष्टमाध्यायान्तर्गतानां 'पदम्', 'धाम', 'स्थानम्' च शब्दानां विवेचनम्

आचार्यः रावलः जिज्ञेशः[१]

प्रस्तावना

श्रीमद्भगवद्गीता, भारतीयदर्शनपरम्परायामेको महत्त्वपूर्णोऽपि च लोकप्रियो ग्रन्थः। श्रीमद्भगवद्गीता तत्त्वमीमांसा, कर्ममीमांसा, भक्तिमीमांसा, मुक्तिमीमांसा चेत्यादीन् अत्यन्ताऽऽवश्यकदार्शनिकसिद्धान्तान् सम्यग्रूपेण निरूपयति। भारतीयदर्शनपरम्पराया इतिहासे बहुभिराचार्यैः श्रीमद्भगवद्गीताया आधारेण अद्वैतम्, द्वैतम्, विशिष्टाद्वैतम् इत्यादिसिद्धान्ताः प्रस्फुटीकृताः। तथैव आधुनिकविद्वज्जनैः श्रीमद्भगवद्गीतातः कर्मयोगः, भक्तियोगः, ज्ञानयोगः इत्यादिप्रमुखविषयाः विवर्णिताः। एवं हि विभिन्नव्याख्यानैः अस्माभिः ज्ञायते यद् व्याख्याकारः स्वाभिप्रायेण निजज्ञानेन च ग्रन्थस्य गतिं स्वमनोनिष्ठायां दिशि परिवोढुं समर्थः। एष्वसङ्ख्यव्याख्यानेषु को व्याख्यानो मूलग्रन्थसिद्धान्तसम्मतः? एतद् निर्णीतुं ग्रन्थस्य मूलभूतानाम् अंशानाम् आन्तर्ग्रन्थीयपरिशीलनं कर्तव्यम्। शोधपत्रेऽस्मिन् श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्थितानां पद-धाम-स्थानेति शब्दत्रयाणामुपरि विविधानां भाष्याणां शास्त्रानुशीलपद्धत्या तुलनात्मकम् अध्ययनं क्रियते। प्राप्तभाष्येषु अत्र प्रमुखरूपेण शङ्कराचार्यकृताऽद्वैतभाष्यं[२]

---

[१] PhD Student, Saurashtra University, Rajkot, Address: BAPS Swaminarayan Sanskrit Mahavidyalaya, BAPS Swaminarayan Mandir, Sarangpur, Email: - jigneshravalrj@gmail.com, (M) +91 972 5205 602

[२] शाङ्करभाष्यस्य सर्वाणि उद्धरणानि श्रीहरिकृष्ण गोयंदका, श्रीमद्भगवद्गीता (शाङ्करभाष्य हिन्दी-अनुवादसहिता,२०१७) ग्रन्थतः नीतानि।

रामानुजाचार्यप्रणीतविशिष्टाद्वैतभाष्यं[३] साधुभद्रेशदासविरचितस्वामिनारायणभाष्यं[४] चेति त्रीणि भाष्याणि स्वीकृतानि।

शोधपत्रेऽस्मिन् प्रथमं पद-धाम-स्थानेति शब्दत्रयाणां पूर्वकथितभाष्येषु यद् विवेचनं कृतं तदेव लिख्यते। ततः श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्थितमूलश्लोकानाम्[५] आन्तर्ग्रन्थीयानुशीलनं करिष्ये। अन्तिमचरणे पद-धाम-स्थानेति शब्दत्रयाणाम् आन्तर्ग्रन्थीयानुशीलनं तथा चोक्तेषु भाष्येषु एतेषां शब्दानां यदर्थः कृतः तेषां समालोचनात्मकानुशीलनं कृत्वा मूलग्रन्थविचारैः सह तद्भाष्यणां सुसङ्गतिम् अधिष्यामहे।

विभागः १- पद-धाम-स्थानेति शब्दत्रयाणां विविधभाष्याणि

पद-धाम-स्थानेति प्रत्येकशब्दाः अष्टमाऽध्याये केवलम् एकवारमेव प्रयुक्ताः। सर्वप्रथमं पदेति शब्दस्योल्लेखः अष्टमाध्यायस्यैकादशे श्लोके प्राप्तः- **'यदक्षरं वेदविदो... तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये।'** ततो धामशब्दः एकोत्तरविंशतितमे श्लोके प्रयुक्तः **'अव्यक्तोऽक्षर...तद् धाम परमं मम।'** अन्ते च स्थानेति शब्दः अध्यायस्यान्तिमे श्लोके गुम्फितः **'वेदेषु यज्ञेषु...योगी परं स्थानम्-उपैति चाद्यम्।'** इति।

अथैतच्छब्दत्रयाणाम् उक्तभाष्यत्रयकृतार्थाः तालिकारूपेण प्रदर्शिताः।

शब्दः	भाष्यम्	अर्थः
पदम् (८/११)	**शाङ्करभाष्यम्**	तद् अक्षराख्यं पदम्[६]
	रामानुजभाष्यम्	पद्यते गम्यते अनेन इति पदं तद् निखिलवेदान्तवेद्यं **मत्स्वरूपम्** अक्षरम्[७]

[३] रामानुजभाष्यस्य सर्वाणि उद्धरणानि आदि देवानन्दस्वामी, श्रीरामानुजभाष्यतः नीतानि।

[४] स्वामिनारायणभाष्यस्य सर्वाणि उद्धरणानि स्वामी भद्रेशदासः, श्रीमद्भगवद्गीतास्वामिनारायणभाष्यम्, (२०१२) ग्रन्थतः नीतानि।

[५] गीतायाः मूलश्लोकानां सन्दर्भाः स्वामिनारायणभाष्यतो नीताः।

[६] शाङ्करभाष्यम्, पृ.२१६

	स्वामिनारायणभाष्यम्	पद्यते गम्यते ब्रह्मरूपैः प्रत्यक्षपरमात्मोपासकैः स्वदेहपातोत्तरम् अर्चिरादिपथेन प्राप्यते इति पदम्। गन्तव्यस्थानभूतं परमात्मनित्यनिवासभूतं देशविशेषात्मकम् **अक्षरधामब्रह्मलोकादिशब्दव्यपदिष्टं** पदम् इत्यर्थः।[८]
धाम (८/२१)	**शाङ्करभाष्यम्**	स्थानम्[९]
	रामानुजभाष्यम्	परमं नियमनस्थानम्। अचेतनप्रकृतिः एकं नियमनस्थानम्, तत्संसृष्टरूपा जीवप्रकृतिः द्वितीयं नियमनस्थानम्, अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्थानम् इत्यर्थः। तत् च अपुनरावृत्तिरूपम्। अथवा प्रकाशवाची धामशब्दः, प्रकाशः च इह ज्ञानम् अभिप्रेतं प्रकृतिसंसृष्टात् परिच्छिन्नज्ञानरूपाद् आत्मनः अपरिच्छिन्नज्ञानरूपतया **मुक्तस्वरूपं** परं धाम।[१०]
	स्वामिनारायणभाष्यम्	निवासस्थानम्[११]
स्थानम् (८/२८)	**शाङ्करभाष्यम्**	-
	रामानुजभाष्यम्	-
	स्वामिनारायणभाष्यम्	'तत्ते पदं संग्रहेण प्रवक्ष्ये' (गी.८/११), 'ततः पदं तत्परिमार्गितव्यम्' (गी.१५/४) इत्यादौ पदशब्देन व्यपदिष्टं परमात्मनिलयभूतम् **अक्षरधामाख्यं** देशविशेषम्।[१२]

[७] रामानुजभाष्यम्, पृ.२७८

[८] स्वामिनारायणभाष्यम्, पृ.१८४

[९] शाङ्करभाष्यम्, पृ.२२२

[१०] रामानुजभाष्यम्, पृ.२८५

[११] स्वामिनारायणभाष्यम्, पृ.१८९

विभागः २– अष्टमाध्यायस्थितश्लोकानाम् आन्तर्ग्रन्थीयानुशीलनम्

पूर्वे अस्माभिः पदधामस्थानेति शब्दत्रयाणामुपरि प्राप्तभाष्यमवलोकितम् । इतः परं वयं स्वयं श्रीमद्भगवद्गीता एतान् त्रीन् शब्दान् केन सन्दर्भेण प्रयुज्यते तस्मिन् विषये विहङ्गावलोकनं करिष्यामहे ।

पदशब्दः

पदशब्दः ८/११ श्लोके प्रयुक्तः- **'यदक्षरं...तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये।'** श्लोकेऽस्मिन् 'यद् अक्षरम्' इत्यस्य अन्वयः 'तत् पदम् ' इत्येतेन सह जायते, अर्थाद् यं वेदज्ञैः अक्षरमित्युच्यते तदेव पदम्। इत्यनेन अक्षरमेव पदम् इति सिद्धम्। अथ अक्षरमिति शब्दस्य विचारः क्रियते चेत् श्रीकृष्णेन अष्टमाऽध्यायस्य आदा एव ब्रह्मेति शब्दस्य समानार्थरूपेण अक्षरशब्दः प्रदर्शितः। यदा पार्थः पप्रच्छ **'किं तद् ब्रह्म?'**[१३] तदा पार्थसारथिः प्रत्युत्तत्तार **'अक्षरं ब्रह्म परमम्'**[१४] इति। इत्यनेन सिध्यते यद् ब्रह्मशब्दः अक्षरशब्दस्य पर्यायवाची। अतः गीतायाः मूलश्लोकानां समन्वयेन निष्कृष्यते यत् पदशब्दः अक्षर-ब्रह्मशब्दयोः समानार्थीति ।

धामशब्दः

धामशब्दः ८/२१ श्लोके गुम्फितः **'अव्यक्तोऽक्षर... तद्धाम परमं मम।'** अत्र वासुदेवेनोक्तं 'यद् अव्यक्तशब्देन कथितम् अक्षरं तदेव मे धामेति'। श्लोकेऽस्मिन्नपि अक्षरशब्दः धामशब्दस्य विशेषणम्। पूर्वोक्तरीत्या ब्रह्मशब्दः अक्षरशब्दस्य समानार्थी, अतः गीतायाः मूलश्लोकानां समन्वयेन धामशब्दः अक्षरशब्दः ब्रह्मशब्दः पदशब्दश्चैते सर्वे पर्यायवाचिनः।

स्थानशब्दः

स्थानशब्दः अष्टमाध्यायस्य अन्तिमश्लोके विलसितः **'वेदेषु यज्ञेषु...योगी परं स्थानम्-उपैति चाद्यम्।'** प्रस्तुतश्लोके श्रीकृष्णेन कथितं, 'यो योगी सर्वं तत्त्वतः जानाति, सः परमं स्थानं प्राप्नोति'।

---

[१२] स्वामिनारायणभाष्यम्, पृ.१९८

[१३] गीता ८/१

[१४] गीता ८/३

श्लोकेऽस्मिन् श्रीकृष्णः स्थानशब्दस्याऽग्रे परमेति विशेषणं प्रयुक्तवान्। इदमेव विशेषणं तेन ८/२१तमे श्लोकेऽपि प्रयुक्तः 'तद् धाम **परमं** मम', इदमुक्त्वा परमगन्तव्यस्थानरूपेण श्रीकृष्णेन स्वं धाम उद्देशितम्। अतः 'परं' 'परमम्' इति विशेषणाभ्याम् इदमेव विज्ञायते यत् 'परं धाम' तदेव 'परमं स्थानम्'। इत्यनेन धाम स्थानं चेति द्वौ शब्दौ एकार्थवाचिनौ। पूर्वे धामशब्दस्य निरूपणे एव अस्माभिः दृष्टं यद् 'धाम' तदेव 'पदम्' अर्थात् 'पदं', 'धाम', 'स्थानं' वेति त्रयः शब्दाः किञ्चिद् एकं गन्तव्यं स्थानं निर्दिशन्ति। अतः श्रीकृष्णः अत्र एकं निश्चितगन्तव्यस्थानविशेषं निर्दिशति इति वक्तुं शक्यते।

अतः अस्याऽष्टमाध्यायस्य श्लोकानाम् अनुशीलनं कृत्वा ज्ञायते यद् ब्रह्माऽक्षरपदधामस्थानेति सर्वे शब्दाः निश्चयेन किञ्चिद् एकमेव तत्त्वमङ्गुलीनिर्देशङ्कुर्वते। तात्पर्यार्थतः सर्वे शब्दाः एकस्मिन् प्रकरणे एकदेशिनः अतः सर्वे शब्दाः समानार्थगामिनः एव भवेयुः।

अत्र शब्दत्रयाणाम् अर्थपरीक्षणात् प्राक्प्रकृतचर्चाऽऽनुषङ्गिकं ब्रह्मशब्दाक्षरशब्दयोः विवेचनमपि अनिवार्यम्। प्रथमं ब्रह्माक्षरशब्दयोः अष्टमाध्याये कतिवारं प्रयोगः कृतोऽपि च तयोः शब्दयोः श्रीशङ्कराचार्यः श्रीरामानुजाचार्यः श्रीभद्रेशदासश्च कम् अर्थं निरूपयन्ति तज्ज्ञात्वा सर्वशब्दान् तेषां च भाष्यं समालोचयिष्यामहे।

ब्रह्मशब्दः

ब्रह्मशब्दः अखिलाष्टमाऽध्याये षड्वारं निर्दिष्टः।

८/१ - किं तद् <u>ब्रह्म</u>

८/३ - अक्षरं <u>ब्रह्म</u> परमम्

८/११ - यदिच्छन्तो <u>ब्रह्म</u>चर्यं चरन्ति

८/१३ - ओमित्येकाक्षरं <u>ब्रह्म</u>

एवं ८/२४ - <u>ब्रह्म</u> <u>ब्रह्म</u>विदो जनाः

तथा च अक्षरशब्दः अखिलाष्टमाऽध्याये चतुर्वारं प्रयुक्तः।

८/३- <u>अक्षरं</u> ब्रह्म परमम्

८/११ – यद्-अक्षरं वेदविदो वदन्ति

८/१३ - ओमित्येकाक्षरं ब्रह्म

एवं **८/२१ - अव्यक्तोऽक्षर इत्युक्तः**

अथ द्वयोरपि अक्षरब्रह्मशब्दयोः भाष्यत्रयमधिकृत्य विवेचनं द्रक्ष्यामः।

शब्द	श्लोक क्रमांक	भाष्य	अर्थ
ब्रह्म	८/१	**शाङ्करभाष्यम्**	-
		रामानुजभाष्यम्	-
		स्वामिनारायणभाष्यम्	(पूर्वं) भूयो भूयः ब्रह्मशब्दमाकर्ण्य यथोपदेशं तस्य **जीवेश्वरप्रकृतिपरमात्मेतराऽभिधायित्वम्** आपाततोऽनुमाय ब्रह्मशब्दवाच्यत्वे संशयितस्तन्निश्चयाय पप्रच्छ किं तद् ब्रह्मेति[१५]
	८/३	**शाङ्करभाष्यम्**	**परस्य ब्रह्मणः**[१६]
		रामानुजभाष्यम्	**परमम् अक्षरम्**[१७]
		स्वामिनारायणभाष्यम्	'बृह बृहि वृद्धौ' (पा.धा.पा.७३५,७३६) इति पाणिनीयधातुपाठबलाद् वृद्ध्यर्थे व्युत्पादयते ब्रह्मशब्दः। तथा च बृंहति बर्हति वेति ब्रह्म। एवं स्वरूपतः स्वभावतो गुणतश्च बृहत्त्वाद् बृहणत्वाच्च ब्रह्मशब्दोयम् अक्षरं ब्रह्माभिधत्ते। बृहत्त्वमुत्कर्षः। तस्य च कस्मादिति अनुयोगिसापेक्षत्वात् परमात्मातिरिक्तसर्वजीवेश्वरमायाऽक्षरमुक्तेभ्योऽतिशयोत्कर्षविशिष्टम् **अक्षरं ब्रह्म** इति ब्रह्मशब्दार्थः।[१८]

[१५] स्वामिनारायणभाष्यम्, पृ.१७२

[१६] शाङ्करभाष्यम्, पृ.२१२

[१७] रामानुजभाष्यम्, पृ.२७१

[१८] स्वामिनारायणभाष्यम्, पृ.१७५

	८/११	**शाङ्करभाष्यम्**	-
		रामानुजभाष्यम्	-
		स्वामिनारायणभाष्यम्	**ब्रह्मणि चर्या** एव ब्रह्मचर्यम्। साक्षाद्-ब्रह्मस्वरूपगुरुप्रसङ्गादिभिस्तेन सह आत्मगृहीत्या च स्वयमपि ब्रह्माहम् अहमअक्षरम् इत्यादिरूपेण अनवरतं परमात्मोपासनानुकूलस्वात्मब्रह्मरूपत्वाऽनुकूलाऽनुशीलनलक्षण: चर्यात्मको व्याहारो ब्रह्मचर्यम् इति।[१९]
ब्रह्म	८/१३	**शाङ्करभाष्यम्**	**ब्रह्मण**:[२०]
		रामानुजभाष्यम्	**मद्वाचकम्**[२१] (इत्युक्ते परमात्मवाचकम्)
		स्वामिनारायणभाष्यम्	'ॐ इत्येतद्। एतद्ध्येवाक्षरं ब्रह्म' (कठ.२/१५,१६) इत्यादिश्रुतिप्रसिद्धं **प्रणववाच्याऽक्षरं** ब्रह्म[२२]
	८/२४	**शाङ्करभाष्यम्**	-
		रामानुजभाष्यम्	-
		स्वामिनारायणभाष्यम्	अपुनरावृत्तिकरं **ब्रह्माख्यं लोकमक्षरधामे**तियावद्'[२३]
अक्षर			
अक्षर	८/३	**शाङ्करभाष्यम्**	न क्षरति इति **परमात्मा**[२४]
		रामानुजभाष्यम्	प्रकृतिविनि**र्मुक्तात्म**स्वरूपम्[२५]
		स्वामिनारायणभाष्यम्	अक्षरम् एव ब्रह्मतत्त्वम् उच्यते इत्यर्थ:। तथा हि अक्षरमितिपदेन अत्र ब्रह्म व्याख्यातम्।[२६] (अक्षरशब्देन जीवेश्वरमुक्तपरब्रह्मभिन्नं ब्रह्मतत्त्वम्)

[१९] स्वामिनारायणभाष्यम्, पृ.१८४

[२०] शाङ्करभाष्यम्, पृ.२१८

[२१] रामानुजभाष्यम्, पृ.२७८

[२२] स्वामिनारायणभाष्यम्, पृ.१८५

[२३] स्वामिनारायणभाष्यम्, पृ.१९५

[२४] शाङ्करभाष्यम्, पृ.२११

[२५] रामानुजभाष्यम्, पृ.२७१

	८/१ १	**शाङ्करभाष्यम्**	न क्षरति इति अक्षरम् **अविनाशि**[२७]
		रामानुजभाष्यम्	**अस्थूलत्वादिगुणकम्**[२८] **(परमात्मस्वरूपम्)**
		स्वामिनारायणभाष्यम्	**अक्षरब्रह्मतत्त्वम्**[२९]
	८/१ ३	**शाङ्करभाष्यम्**	-
		रामानुजभाष्यम्	हृदयकमलनिविष्टे **मयि अक्षरे**[३०]
		स्वामिनारायणभाष्यम्	'ॐ इत्येतद्। एतद्ध्येवाक्षरं ब्रह्म' (कठ.२/१५,१६) इत्यादिश्रुतिप्रसिद्धं प्रणववाच्याऽक्षरं **ब्रह्म**[३१]
	८/२ १	**शाङ्करभाष्यम्**	अक्षरसञ्कम् **अव्यक्तभावम्**[३२]
		रामानुजभाष्यम्	प्रकृतिसंसर्गवियुक्तस्वरूपेण अवस्थित **आत्मा**[३३]
